CC0. In Public Domain, Digitizagtion by eGangotri

५·१

॥ गीतगौरीपतिः ॥

GITAGAURIPATI

[रागकाव्यम्]

[RAGAKAVYAM]

रचयिता
Written by
महाकविभानुदत्तः
MAHAKAVIBHANUDATTA

सम्पादकः
Editor
प्रभातशास्त्री
PRABHATSHASTRI

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतगौरीपतिः

[रागकाव्यम्]

आदरणीया श्री [illegible] को
सादर भेंट
प्रभातशास्त्री
२०।२।८३

रचयिता

महाकविभानुदत्तः

सम्पादकः

प्रभातशास्त्री

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

- प्रकाशक:

साहित्यकार संघ

नया बैरहाना, इलाहाबाद–३

- प्रथमसंस्करणम्

संवत्—२०३८

सन्—१९८१

मूल्यम्—पञ्चदशमुद्राः

- मुद्रक:

देववाणीमुद्रणालयः

दारागंज—प्रयागः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

GITAGAURIPATI

[Raga Kavyam]

BY

Mahakavi Bhanudatta

Edited by

PRABHAT SHASTRI

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

• **PUBLISHED BY**
Sahityakar Sangh
New Bairahana, ALLAHABAD–3

• **FIRST EDITION**
Publication year 1981
Price Rs. Fifteen

• **PRINTED AT**
DEVAVANI MUDRANALAYA
Daraganj, Allahabad-6

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रस्तावना

भानुदत्तस्य जन्मप्रदेशः—गीतगोविन्दपरम्परायां लिखितस्य प्रस्तुतगीतगौरीपतिरागकाव्यस्य रचयिता महाकविर्भानुदत्तः। अस्य कविवरस्य पितृनाम जन्मप्रदेशश्च संस्कृतभाषायाः अन्यग्रन्थकाराणामिव विवादविजृम्भितो न वरीवर्ति। अनेन कविवरेण नायकनायिकाभेदविवेचनात्मकस्य सहृदयसुधीसमाजे लोकप्रियस्य रसमञ्जरीनामकग्रन्थस्यैकस्मिन् श्लोके तदानीन्तनविद्वद्वर्गे 'कविकुलालङ्कारचूडामणिः' इत्युपाधिना विभूषितस्य स्वपितुः स्वजन्मप्रदेशविदेहभुवश्च सादरं समुल्लेखो विहितः। [1]रसमञ्जरीस्थेनाऽनेन श्लोकेन प्रतीयते यत् भानुदत्तस्य जन्मप्रदेशो जनकजाजन्मभूमिर्मिथिलाऽऽसीत्। अतो जन्मस्थानविषये शङ्काऽङ्कुरस्यावसर एव न दृश्यते। अथापि कियन्तो विवेकविहीनाः स्वप्रदेशपक्षपाताऽऽग्रहग्रस्ता दाक्षिणात्याः समीक्षकविचक्षणा 'विदेहभूः' इत्यस्य स्थाने 'विदर्भभूः' इति पाठं परिकल्प्य कविवरं भानुदत्तं विदर्भदेशनिवासिनं मन्यन्ते। तेषां मतमिदं दुराग्रहग्रस्तं—यतो हि विदर्भप्रदेशः 'सुरसरित्कल्लोलकिर्मीरितो' न वर्तते। मम कथनस्याऽयमाशयो यत् तस्मिन् प्रदेशे पतितपावनी सुरसरिन्न, किन्तु मिथिलाया दक्षिणभागे प्रवहति गङ्गा।

भानुदत्तः मिथिलाप्रदेशवासी आसीदित्यस्मिन् विषये प्रमाणान्तरमपि प्राप्यते।

१—तातो यस्य गणेश्वरः कविकुलालङ्कारचूडामणिः,
देशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्मीरितः।
पद्येन स्वकृतेन तेन कविना श्रीभानुना योजिता,
वाग्देवी श्रुतिपारिजातकुसुमस्पर्धाकरी मञ्जरी॥

रसमञ्जरीपृष्ठम् १३८।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भानुदत्तेन 'अलङ्कारतिलक' नामकस्य[1] स्वपुस्तकस्यैकस्मिन् श्लोके मैथिलनृपतेः वर्णना विहिता। तेन श्लोकेन अलङ्कारतिलके एव अन्यत्र पामरार्थे मैथिलभाषायां प्रयुक्तस्य[2] रण्डशब्दस्य प्रयोगेन चाऽयं मिथिलाप्रदेशवासीति सिद्धो भवति।

भानुदत्तस्य जन्मकालः — महामहोपाध्यायडा०पी०वी०काणेमहोदयेन 'संस्कृत काव्यशास्त्र का इतिहास' नामके ग्रन्थे ईशवीय[3]पञ्चदशशताब्द्या मध्यभागः प्रतिपादितः। इदमेव मतं प्रसिद्धविदुषा डा०सुशीलकुमारडेमहाभागेनाऽपि 'संस्कृत काव्यशास्त्र का इतिहास' [4]पुस्तकस्य प्रथमभागे सादरं स्वीकृतम्।

भानुदत्तस्य पितृनाम—भानुदत्तेन न केवलं रसमञ्जर्यामपि त्वन्येष्वपि

१—उत चन्द्र उत पुरन्दर उत राजा विक्रमादित्यः।
उत गन्धर्वं उत स्मर उत सुन्दरि ! मैथिलो नृपतिः॥

'अलङ्कारतिलकस्य' तृतीयाध्याये।

२—देशे संकेतितं देश्यम्। यथा—वेदं विना द्विजो रण्डः। रण्डः इति पामरे मैथिलसंकेतितम्। 'तत्रैव'।

३—भानुदत्त का समय लगभग १५४० था। 'संस्कृत काव्यशास्त्र का इतिहास' पृष्ठम् ३८१। (ग्रन्थोऽयमांग्लभाषायां लिखितस्य 'हिस्ट्री आफ् संस्कृत पोएटिक्स' पुस्तकस्य हिन्दीभाषायामनुवादात्मकः। प्रकाशकः मोतीलाल-बनारसीदास चौक वाराणसी)।

४—इस विषय पर डा० पी० वी० काणे ने नई सामग्री प्रस्तुत की है। उनका कथन है कि भानुदत्त ने विवादचन्द्र के लेखक तथा स्मृतिकार मिसरूमिश्र की बहन से विवाह किया था। ये मिश्र १५ वीं शती के मध्य-भाग में हुए हैं। अत एव भानुदत्त को १४५० से १५०० ई० की मध्या-वधि में निर्धारित करना युक्तियुक्त होगा। 'संस्कृत काव्यशास्त्र का इतिहास' पृष्ठम् २२९। (अयमपि ग्रन्थः 'हिस्ट्री आफ् संस्कृत पोएटिक्स' पुस्तकस्यानुवादः। प्रकाशकः विहारग्रन्थ अकादमी पटना)।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वकीयेषु ग्रन्थेषु स्वपितृपादानां नामोल्लेखनं कृतम् ।[१] गीतगौरीपतिकाव्ये तु वारद्वयं नामोल्लेखितम् । रसतरङ्गिण्यामलङ्कारतिलकस्य पद्ये चाप्यनेन सादरं स्वपितृचरणा अस्मारिषत । इत्थममुना भानुदत्तेन स्वपितृपादानां नामोल्लेख: 'गणेश्वर:' 'गणनाथ:' 'गणपति:' गणेशश्चेति चतुर्धा विहित: ।

जनसमाजे कस्याऽपि पितुरनेकनामानि व्यवहारविरुद्धत्वात् न श्रूयन्ते । अस्यां दशायां पाठकानां पुरत: प्रश्न: समुपस्थितो भवति यदुक्तचतुर्णां नाम्नां मध्ये भानुदत्तस्य पितुर्वास्तविकं नाम किमासीत् ? अस्मिन् प्रसङ्गे डा० यतीन्द्रविमल-चौधरीमहोदयेन सुभाषितपद्यसंग्रहात्मिकायां हरिभास्करप्रणीतपद्यामृततरङ्गिणी-[२] भूमिकायां मैथिलभूसुरमूलगोत्रज्ञापकतालपत्रपञ्जिकास्थो भानुदत्तस्य वंशवृक्षो यथा समुदलेखि तथाऽत्र गृहीतानुपूर्वीक उद्ध्रियते—



१—कविगणनाथसुतस्य, कवेरिति वचनं त्रिजगति धन्यम् ।
निगदतु को वा विलिखतु को वा शैलसुतालावण्यम् ।।
'गीतगौरीपतिकाव्यस्य'—षष्ठसर्ग: ।

कृतहरविनयो गणपतितनयो निगदति हितकारणम् ।
हिमकरमुकुटे विजयिनि निकटे विरचय न च वारणम् ।।
गीतगौरीपतिकाव्यस्य'—दशमसर्ग: ।

२—पद्यामृततरङ्गिणीभूमिकापृष्ठम् ६१ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनेन वंशवृक्षेण निश्चीयते यत् विभिन्नपद्येषु अस्य जनकस्य प्रयुक्तेषु चतुर्षु नामसु वास्तविकं नाम गणपतिरासीत्। छन्दोभङ्गभिया तु तत्र तत्र पद्येषु गणपतिपर्यायवाचिनो गणेश्वरगणनाथगणेशशब्दाः प्रयुक्ताः। अद्यावधि अप्रकाशिते इंडिया आफिस लन्दनस्थितकुमारभार्गवीयचम्पूकाव्ये भानुदत्तेन स्वयमेव स्वपूर्वजानां श्लोकात्मकः संस्तवः संप्रदत्तः। ते सर्वे श्लोकाः मुद्रितात् तदीयसूचीपत्रादत्रोद्ध्रियन्ते—[1]

शरजन्मकर्मसुकं (?) गौरीहितकारि चेष्टितं यस्य।
भवसूनोस्तु कथां भानुसत्कविः कुरुते॥
गुरुप्रकाशो जगदम्बिकाया रत्नेश्वरो रत्नमिवाविरासीत्।
परिस्फुरन् यः क्षितिमण्डलानामन्तस्तमस्तीव्रमपाचकार॥
चञ्चद्गीतिविचित्रवीतिबहुलस्फीतिक्वणत्कङ्कणो,
नृत्यन्तीं वसनाङ्गने भगवतीमालोकितुं भारतीम्।
नाभौ पद्मसमुद्भवो हृदि हरिर्नीले (?) भवानीपति-
श्चक्रे यस्य चिराय दर्शितसमुल्लासा निवासोद्भवं॥
सुरेश्वरः सुराचार्य इव तस्यात्मजोऽभवत्।
यः पोतं वार्त्तिकं चक्रे वेदान्तक्षीरनीरधौ॥
बाल्य एवाभवद् यस्य विश्वख्यातो गुणोदयः।
पञ्चमः कोकिलस्येव मदनस्येव सौरभम्॥
पुत्रस्तस्य प्रथितचरितः श्रौतपावित्र्यसिन्धु-
र्दुःखार्तानां सदयहृदयो विश्वनाथोऽवतीर्णः,

१—कैटलॉग आफ दि संस्कृतमैनुस्क्रिप्ट्स इंडिया आफिसलाइब्रेरी, भाग: ७, संस्कृतसाहित्य-काव्यम्। संपादकः जे० इगलिंग, लन्दन, १९०४, पृष्ठम् १५४०, ग्रन्थ अनुक्रमांक: ४०४० (४०८)।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वाचां देव्याः सुरसगणितं मौलिरत्नं प्रदीपो ।
यस्यागारे समजनि तमःक्षालितासु क्षपासु ॥
अजनि दलितदोषः क्लृप्तभूचक्रतोषो ।
रविरिव (र) विनायस्तस्य पुत्रः पवित्रः,
विकचकमलकान्तैर्भारतीलोचनान्तै-
र्यदुपरि परितुष्टा पुष्पवृष्टिं चकार ॥
बहुविधगुणधामा श्रौतसौजन्यसीमा,
समजनि भवनाथो भूषणं भूतधात्र्याः ।
प्रसरति बहिरन्तः पूरयित्वा मुरारेः,
स्मितचयवचनापच्छद्मना यस्य कीर्तिः ॥
स्वामी त्रिभुवनवन्द्यः श्रीवत्सं लाञ्छनं कृतवान् ।
इति किं पतिव्रतासौ भवनाथलक्ष्म (तु) मेदिनी विदधे ॥
वेल्लद्वेदविधिर्महोन्नतिनिधिः पावित्र्यवाचां निधि-
स्तस्मात् पुण्यवशादजायत महादेवो गुणस्यावधिः ।
नृत्यन्तः शशिनं विधाय तिलकं यत्कीर्तिवामभ्रुवो (?)
मुक्तामौक्तिकघर्घरी वितनुते भावावतारश्रियं ॥
पाद्यप्रौढमतिर्नये कृतरतिर्वंशे शिरोऽलंकृतिः,
प्रीतौ कैरविणीपतिर्गणपतिस्तस्यात्मजोऽराजत ।
दृष्ट्या यस्य यशो भियाऽपसरतो यज्ञोपवीतं पथि,
प्रभ्रष्टं रजनीपतेः सुरसरिद्व्याजादिवोन्मीलति ॥

एतानाधृत्य किञ्चित् परिवर्तितो वंशवृक्षो यथा—

|
रत्नेश्वरः
|
सुरेश्वरः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

|

विश्वनाथः

|

रविनाथः

|

भवनाथः

|

महादेवः

|

गणपतिः

|

भानुदत्तः

|

पञ्जिकाप्रदर्शितवंशवृक्षाऽपेक्षया भानुदत्तेन लिखितोऽयं कुमारभार्गवीयचम्पू-काव्ये मिश्रोपाधिरहितः श्लोकात्मकवंशवृक्षः प्रामाणिकतरो भवेदिति मन्महे।

गणपतेः कवित्वम् :—भानुदत्तस्य पिता गणपतिरपि संस्कृतभाषाया रससिद्धः काव्यकलाकुशलः कविरासीत्। अनेन स्वपितुः काव्यस्य चर्चा धर्मशास्त्र-विषयकपारिजातग्रन्थे एकस्मिन् श्लोके कृता—

यथा गणपतेः काव्यं, काव्यं भानुकवेस्तथा।
अनयोः सङ्गमःश्लाघ्यः, शर्कराक्षीरयोरिव॥

गणपतिप्रणीताः सरसाः सहृदयहृदयहारिणो बहवः श्लोकाः सादरं ग्रन्थकारेण रसतरङ्गिण्यां रसमञ्जर्याञ्च उदाहृताः। इमे सर्वे श्लोकाः शेषाश्चाऽन्ये श्लोकाः भानुदत्तस्य[1] रसपारिजातनामके ग्रन्थे सङ्गृहीता राराजन्ते।

भानुदत्तपितुः कविगणपतेः श्लोकाः लक्ष्मणभट्टसङ्गृहीतायां सुभाषित-श्लोकात्मिकायां पद्यरचनायामपि प्राप्यन्ते। एतेन प्रतीयते यत्तत्कालीनसुधी-समाजे अस्य पितृपादानां रससिक्ताः कृतिततयः लोकप्रिया आसन्।

भानुदत्तस्य नामान्तरम्—भानुदत्तस्य नामान्तरं भानुकरोऽप्यस्ति—

१—ग्रन्थोऽयं पण्डितबद्रीनाथझामहोदयेन संपादितः। प्रकाशकः मोतीलाल-बनारसीदास लाहौरः १९३९।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति [१]डा० यतीन्द्रविमलचौधरीडा० [२]हरदत्तशर्मश्रीजी० वीदेवस्थलीप्रभृतयो विद्वांसः स्वीकुर्वन्ति । इमे स्वमतसमर्थने कथयन्ति यत् लक्ष्मणभट्टस्य पद्यरचनायां हरिभास्करस्य पद्यामृततरङ्गिण्यां वेणीदत्तस्य पद्यवेण्यां गोविन्दजित्भट्टस्य सभ्यालङ्करणे सुन्दरदेवस्य सूक्तिसुन्दरे सुभाषितश्लोकात्मके ग्रन्थे च ये ये श्लोकाः भानुकरनाम्ना वर्तन्ते ते सर्वे श्लोकाः भानुदत्तप्रणीतरसमञ्जरीरसतरङ्गिणीरसपारिजातग्रन्थेषु प्राप्यन्ते । अस्मात् कारणात् भानुदत्तस्यैव भानुकर इति नामान्तरमस्ति । किन्तु मतमिदं डॉ० पी० वी० काणे डॉ० राघवन् महोदयौ न स्वीकुरुतः । अत एव विवादात्मकेऽस्मिन् विषये अन्वेषणस्य महती आवश्यकता वरीवर्ति । समासेन चर्चा विहिताऽत्र । व्यासेन विश्लेषणं विवेचनञ्चाप्रासङ्गिकत्वात्त्यज्यते ।

भानुदत्तस्य धार्मिकता देशाटनञ्च—भानुदत्तः शैव आसीत् उत वैष्णवः इत्यत्र प्रबलप्रमाणाऽभावेऽपि प्रस्तुतगीतगौरीपतिकाव्येन स्पष्टतया ज्ञायते यदयं कुमारसंभवकर्ता कालिदास इव शिवभक्त एवासीत् । महाकविर्बाणभट्ट इव भ्रमणप्रियोऽयं भानुदत्तः देशाटनस्य मूर्तिमान् अवतारः । भारतस्य बहून् प्रदेशानयं बम्भ्रम्यते स्म ।[३] अनेनैकस्मिन् श्लोके देशाटनस्य चर्चा स्वयमेव कृता । भानुदत्तेन दक्षिणभारतस्याऽपि यात्रा विहिता । भ्रमणकालेऽयं तत्रत्यानां राज्ञां राज्याश्रयत्वमवाप । तेषु दक्षिणभारतस्थितदेवगिरिदौलताबादनृपतिनिजामशाहस्य विजयनगराधीशकृष्णदेवरायस्य विन्ध्यप्रदेशस्य रेवा (रीवाँ) धिपतेर्वीरभानोश्चाश्रये आसीदयम् । एतेषां सर्वेषां राज्ञां प्रशंसायां भानुदत्तेन कतिपये श्लोका लिखिताः ।

१—पद्यामृततरङ्गिणीभूमिकापृष्ठम् ६० ।

२—अनल्स आफ् भाण्डारकर ओरियन्टल रिसर्च ईन्स्टीच्यूट पूना । प्रथमभागः ।

३—क्षोणीपर्यटनं श्रमाय विदुषां वादाय विद्यार्जिता,
मानध्वंसनहेतवे परिचितास्ते ते धराधीश्वराः ।
विश्लेषाय सरोजसुन्दरदृशामास्ये कृता दृष्टयः,
कुज्ञानेन मया प्रयागनगरे नाऽऽराधि नारायणः ॥

'रसतरङ्गिणीपञ्चमस्तरङ्गः' ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ते सर्वे श्लोका अवसीये रसपारिजातनामके ग्रन्थे सङ्गृहीता: सन्त: शोभन्ते। [1]ग्रन्थेऽस्मिन् देवगिरिनृपतिनिजामशाहस्य विषये चतुर्दशश्लोका: विजयनगरराजस्य कृष्णदेवरायस्य स्तुतौ द्वौ रेवाधिपतिश्रीवीरभानो: प्रशंसायां पञ्चश्लोका वर्तन्ते। प्रशंसात्मकेषु अवसीयेषु श्लोकेषु कतिपये श्लोका: पद्यरचनाप्रभृतिसुभाषितग्रन्थेष्वपि प्राप्यन्ते[2]।

भानुदत्तस्य ग्रन्था:—भानुदत्त: न केवलं संस्कृतभाषाया: सुकविरपि तु काव्यशास्त्रस्य प्रकाण्डपण्डित:। अनेन अधस्तना ग्रन्था लिखिता:—

(१) रसमञ्जरी—ग्रन्थेऽस्मिन् प्राधान्येन नायिकाया विभिन्नभेदा वर्णिता राराजन्ते। तत्प्रसङ्गे नायकस्य शृङ्गाररसस्यापि च समासेन विवेचनं दरीवर्ति। सहृदयसुधीसमाजे ग्रन्थोऽयमत्यन्तलोकप्रिय आसीत्। अस्मात् कारणादेवास्य ग्रन्थस्योपरि प्रत्नै: पण्डितरत्नै: नैकाष्टीका निरमायिषत। तासां सर्वासां टीकानां संस्तव: प्रसिद्धविदुषा डा० सुशीलकुमारडेमहोदयेन 'संस्कृत काव्यशास्त्र का इतिहास' [3]नामकस्य ग्रन्थस्य प्रथमभागे कृत:। तासु टीकासु मध्ये अद्यावधि कियत्य: प्रकाशिता: कियत्य: अप्रकाशिताश्च सन्ति। ग्रन्थोऽयम्,—अनन्तपण्डितस्य 'व्यङ्ग्यार्थकौमुदी' प्रसिद्धवैयाकरणनागेशभट्टस्य 'रसमञ्जरीप्रकाश' इति टीकाद्वयेनोपेत: बनारससंस्कृतसीरीजग्रन्थमालायां १९०४ ई० वर्षे प्रकाशितोऽस्ति। अस्य संपादक: पण्डितरामशास्त्री तैलंग:। हिन्दीभाषायां रीतिकालिका: ये ये ग्रन्था: सन्ति तेषां सर्वेषां ग्रन्थानामुपजीव्योऽयमेव ग्रन्थो भाति। तथ्यमिदं हिन्दीभाषाया: सुकवि: नन्ददास: स्वकीये 'रसमञ्जरीनामके' ग्रन्थे स्पष्टतया स्वीकरोति—

१—महामहोपाध्याय श्री पी० वी० काणेकृत 'संस्कृत काव्यशास्त्र का इतिहास, पृष्ठम् ३८२।

२—एतेषु केचन श्लोका: परिशिष्टे द्रष्टव्या:।

३—'संस्कृत काव्यशास्त्र का इतिहास' पृष्ठम् २३१। अयं ग्रन्थ: 'हिस्ट्री आफ् संस्कृत पोएटिक्स' पुस्तकस्यानुवाद:। प्रकाशक:, विहारग्रन्थ अकादमी, पटना।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रसमञ्जरि अनुसारि करि, नन्द सुमति अनुसार।
वरनत वनिताभेद जहँ, प्रेमसार विस्तार॥

एवमेव हिन्दीभाषायाः ग्वालनामकः कविः 'रसिकानन्द'ग्रन्थे निगदति—

भानुदत्त जो लिख्यो, रसमञ्जरि के माहि।
सो लच्छन हम लिषत हैं, हमैं दोष कछु नाहि॥

भानुदत्तेन स्वग्रन्थे नवोढानायिकायाः निम्नलिखितश्लोकेनोदाहरणं दत्तम्—

हस्ते धृताऽपि शयने विनिवेशिताऽपि,
क्रोडे कृताऽपि यतते बहिरेव गन्तुम्।
जानीमहे नववधूरथ तस्य वश्या,
यः पारदं स्थिरयितुं क्षमते करेण॥

हिन्दीभाषायाः सुकवेर्नन्ददासस्य नवोढानायिकायाः उदाहरणस्येदं पद्य-मुपर्युक्तश्लोकस्याऽनुवादात्मकमेव प्रतिभाति—

प्रीतम जब कर पंकज धरै।
बल करि सेज निवेसित करैं॥
क्रोड़ीकर सब अंगन गहै।
तदपि सुतिय वह गयन्यो चहैं॥
तनकरि भागै मन करि रमै।
कहि न जाय वै संधि समै॥
जो पारदि कहुँ करथिर करैं।
सो नऊढ़ बाला उरधरै॥

अनेन विश्लेषणेनेदं प्रतीयते यत् रीतिकालिकानां हिन्दीकवीनां समाजे 'रसमञ्जरी' ग्रन्थोऽत्यन्तलोकप्रिय आसीत्।

(२) रसतरङ्गिणी—मुख्यतया रसविवेचनात्मकोऽयं ग्रन्थः। भानु-दत्तस्य सुप्रथिता कृतिरियं विद्वद्वर्गे अतीवाऽऽदरास्पदम्। ग्रन्थेऽस्मिन् अष्टतरङ्गा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विलसन्ति। अस्य ग्रन्थस्य सप्तमस्तरङ्गस्त्वतीवमहत्त्वपूर्णः। अस्मिन्नेव तरङ्गे रसस्य व्यभिचारिस्थायिभावानाञ्च पाण्डित्यपूर्णं विश्लेषणं विवेचनञ्च वरीवर्ति। प्रायः ग्रन्थेऽस्मिन्नुदाहरणे सर्वे श्लोकाः ग्रन्थकारेण स्वयमेव प्रणीताः। विवेचन-प्रसङ्गे हृद्यस्य गद्यस्य भाषा सर्वथा सरला सुबोधा नव्यन्यायशास्त्रीयभाषा-प्रयोगप्रभावरहिता चास्ति। अस्मिन्नेव तरङ्गे नवरसेभ्योऽतिरिक्तो दशमो माया-रसोऽपि भवतीति स्पष्टतया प्रतिपादितः। भानुदत्तस्येयमपि कृतिः रसमञ्जरीव विदुषां समाजे बहुलोकप्रियाऽस्ति। अत एवाऽस्य ग्रन्थस्य पण्डितैर्बह्व्यष्टीका निर्मिताः। तासु टीकासु अद्यावधि कतिपया एव मुद्रिता अन्या अमुद्रिताः सन्ति। रसतरङ्गिण्याः प्रकाशनं १८८४ ईशवीये वर्षे पेरिसदेशादपि सञ्जातम्। अस्य संपादकः रेनोमहोदयः। संस्करणेऽस्मिन् मूलपाठः रोमनलिप्यां वर्तते। गङ्गाराम जडीलिखितनौकानामिकया टीकया सहितमस्य मुद्रणं वाराणसीतोऽपि १८८६ ईशवीये वर्षे बभूव। भानुदत्तस्य रसमञ्जरीरसतरङ्गिणीग्रन्थद्वयस्य प्रचारः प्रसारश्च चिरकालात्समग्रे भारते आसीत्। द्वयोरनयोः प्रायः सर्वे टीकाकर्तारो विद्वत्तल्लजाः दाक्षिणात्या पण्डिता आसन्। रसमञ्जर्या एकं संस्करणं तेल-गुलिप्यां श्रीवेंकटरामशास्त्रिसंपादकत्वे मद्रासनगरादपि १९०६ ईशवीयवर्षे प्रकाशितम्।

३—अलङ्कारतिलकः—नाम्नैव ज्ञायते यदयं ग्रन्थो ऽलङ्कारविवे-चनात्मकः। सन्त्यत्र पञ्चपरिच्छेदाः। विवेचनप्रसङ्गे ग्रन्थेऽस्मिन् ग्रन्थकार-भानुदत्तेन गद्यस्य प्रयोगः संविहितः। अद्यावधि ग्रन्थस्याऽस्य पुस्तकाकाररूपेण प्रकाशनं सञ्जातम्। श्रीजी०वी०देवस्थलीमहोदयेन संपाद्य 'जर्नल आफ बम्बई ब्रांच आफ रायल एशियाटिक सोसायटी' पत्रिकायां १९४७ ईशवीये वर्षे २३ भागे १९४८, ४९ वर्षे च २४-२५ भागे मुद्रितम्। पत्रिकेयं प्रयागविश्वविद्यालय-पुस्तकालये वर्तते।

४—रसपारिजातः—ग्रन्थेऽस्मिन् भानुदत्तेन स्वपितुर्गणपतेः पद्य-रत्नानां स्वकीयश्लोकानाञ्च संकलनं कृतम्। समग्रोऽपि ग्रन्थो दशपल्लवेषु विभक्तः। अत्रैव ग्रन्थे निजामशाहवीरभानुकृष्णदेवरायस्यज्ञां प्रशंसायां लिखिता ललिताः श्लोकाः प्राप्यन्ते।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५—चित्रचन्द्रिका–ग्रन्थस्याऽस्य चर्चा भानुदत्तेन अलङ्कारतिलके कृता। अलङ्कारतिलकस्य चतुर्थपरिच्छेदे अनेन कथितम्—'चित्रगूढप्रहेलिकाप्रश्नोत्तराणि चित्रचन्द्रिकायां दर्शयिष्यामः'। अनेन प्रतीयते यत् भानुदत्तः 'चित्रचन्द्रिका' नामकं कमपि ग्रन्थं जग्रन्थ। भानुदत्तस्य चित्रकाव्यविवेचनात्मिका कृतिरियमद्यावधि न प्राप्ता। अतः प्रकाशनस्य प्रश्न एव न समायाति।

६—गीतगौरीपतिः—प्रस्तुतं रसरञ्जितमिदं रागकाव्यं दशसर्गेषु विभक्तम्। भव्येऽस्मिन् काव्ये भानुदत्तेन पार्वतीशङ्करयोः पवित्रा प्रणयगाथा भक्तिभावभरितेन ललितेन गीतेन हृद्येन पद्येन च चित्रिता। अस्य काव्यस्याऽपि प्रतिसर्गं गीतप्रारम्भे कविकोकिलजयदेवस्य गीतगोविन्दकाव्य इव संगीतशास्त्रचर्चितानां रागाणां नामोल्लेखनं संशोभते। गीतानां मध्ये मध्ये कथासूत्रसंयोजनाय श्लोकानां संरचनाऽपि कविना कृता। प्रस्तुतसंस्करणस्य प्रतिद्वयाधारेण संपादनं कृतम्।

प्रथमा प्रतिः—काशीहिन्दूविश्वविद्यालयप्राच्यविद्याविभागस्य साहित्यविभागाध्यक्षेण डॉ॰रेवाप्रसादद्विवेदिमहाभागेन प्रदत्ता। मूलमात्रमातृकेयं त्रुटिपूर्णा। अस्या अवाप्तिकथा द्विवेदिमहोदयेन ग्रन्थान्ते स्वयमेव संप्रदत्ता। यथा—

श्रीमत्प्रवीरचन्द्रस्य, वस्तराणामधीशितुः।
भूतपूर्वस्य शयनीयशिरसि प्राप्तसंस्थिति॥
काव्यमेतन्मया रेवाप्रसादेन द्विवेदिना।
प्रतिलिप्तं यथामूलं शोधयित्वा च कुत्रचित्॥
गणतन्त्रे महापर्वदिने पञ्चदशे रवौ।
रायपूरे कृता पूर्तिरनया तुष्यतु प्रभुः॥

अस्या मातृकाया अन्ते लेखनकालः लिपिकारस्य पद्यात्मकसंस्तवश्चाऽपि वरीवर्ति। तद् यथा—श्रीशके १६४८ पराभवसंवत्सरे कृष्णपक्षे अमावास्यायां मन्दवासरे तद्दिने समाप्तः।

देवश्रीपतिपुत्राय आपदेवाय धीमते।
वाजिना लिखितो गीतगौरीशोऽयन्निवेदितः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीया प्रतिः—मदीयपूर्वजानां वाराणसीये भवने संस्थितपुस्तकसंग्रहात् छात्रजीवने समधिगता। प्रतिरियं टीकया सहिता नाऽऽतीव शुद्धा देवनागरी-लिप्यां लिखिता लेखनकालरहिता चाऽऽसीत्। यथा मति अस्याः प्रतेः मया प्रतिलिपिं विधाय पञ्चवर्षपूर्वं टङ्कणं कारयित्वा सुरक्षीकृता। प्रत्ना सेयं मूलप्रतिः विगते वर्षे १९८०-ईशवीये प्रयागनगरे जातया भयङ्करजलवृष्ट्या धराशायिभूते मदीयभवने विनष्टा।

प्रस्तुतसंस्करणम्—प्रतिद्वयमिदमाधारीकृत्य प्रस्तुतसंस्करणं मया संपादितम्। संपादनप्रसङ्गे टीकाकारेणाऽनुमोदितः अरुचिकरः पाठोऽपि मया उररीकृत इत्यस्ति पाठनिर्धारणविषयिणी मदीया सरणिः।

टीकाकारः—अस्य रचयितुः किन्नामासीत्। कदा कस्मिन् काले बभूव जन्म इति च न प्रतीयते किन्त्वयं मैथिल इत्यत्र सन्देहो नास्ति। यतो ह्यनेन अङ्गारकलताकृते तदानींतनमैथिलभाषायां प्रयुक्तस्य [1]'पिवलाकोरण्टा' शब्दस्य प्रयोगो विहितः। टीकाकारेण टीकाकृते स्वयमेव टीकणटिप्पणशब्दः प्रयुक्तः। अतो नेयं गीतगौरीपतेः विस्तृता पाण्डित्यपरिचायिका व्याख्या; किन्तु समासेन काव्यार्थबोधिका सरलतमा टीका। टीकेयं यत्र तत्र च्युतसंस्कृतदोष-दूषिताऽऽसीत्; तत्र तत्र तदंशः यथामति मया संशोधितः। एवमेव टीका-कारेण यत्र सहृदयहृदयोद्वेजकं रागकाव्यदृष्ट्या सर्वथाऽसमीचीनं भ्रष्टपाठ-मुररीकृत्य टीका कृता तत्राऽपि मया टिप्पणी विहिता।

प्रस्तुतकाव्यम्—कृतिरियं पूर्णतः महाकविजयदेवरचितगीतगोविन्देन प्रभाविता वरीवर्ति। यथा गीतगोविन्दस्य प्रारम्भे जयदेवेन भगवतः विष्णोः दशावतारस्य वर्णनं विहितं तथैव भानुदत्तेनाऽपि काव्यारम्भे भगवतः शङ्करस्य [2]अष्टमूर्तिस्तवो रचितः। मम कथनस्यायमाशयः यदिदं रागकाव्यं गीत-गोविन्दस्यानुकरणात्मकम्। इयमेव विचारधारा समीक्षकचणस्य डॉ० सुशील-

---

१—प्रस्तुतकाव्यस्य पृष्ठम् २६।

२—अवलोक्यताम्—गीतगौरीपतिकाव्यम्। पृष्ठम् ३।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुमारडेमहोदयस्याऽपि । तेन स्वकीये 'संस्कृतकाव्यशास्त्र का इतिहास' नामके ग्रन्थे यल्लिखितम् तस्याऽयमाशयोऽस्ति—महाकविजयदेवस्य गीतगोविन्दकाव्येन प्रभावितो भानुदत्तः 'गीतगौरीपतिकाव्यं' व्यरचयत् ।.

काव्यसंस्तवः—अस्य काव्यस्य कथाऽतीव संक्षिप्ता लोकप्रसिद्धा पार्वती-शङ्करयोः प्रणयगाथात्मिका चेति पूर्वमेव प्रतिपादितम् । कथानके सरसतासंपादनाय कविना उमायाः सन्देशवाहिका विपदि विरहे च धैर्यदायिका विजयानामिका एका सखी कल्पिता । काव्येऽस्मिन् पात्राणां बाहुल्यन्नास्ति । काव्यस्य भाषाऽपि सरला सुबोधा प्रसादगुणगुम्फिता च वरीवर्ति । अप्रसिद्धच्छन्दसां प्रयोगोऽप्यत्र नैव दृश्यते । केवलं पञ्चदशवृत्तानां प्रयोगो रागकाव्येऽस्मिन् प्राप्यते । तेषु शार्दूल-विक्रीडितवृत्तस्य प्रयोगे महती प्रीतिः प्रदर्शिता कविना ।

काव्याऽऽरम्भे कविरयमन्यग्रन्थकार इव निर्विघ्नस्वकृतिसमाप्तये सोद्देश्यं मङ्गलाचरणं विदधाति । प्रकारान्तरेणानेन माङ्गलिकेन हृद्येन पद्येन न केवल रागकाव्यपठनेनैवाऽपि तु श्रवणेनाऽपि जनानां मनस्यमन्दानन्दो जायतामिति भणितं भानुदत्तेन । अवलोक्यताम् तत्प्रसङ्गः—नदति मृदङ्गः, तन्मध्ये मन्दं मन्दं सानन्दं गीतस्य सञ्चरति सरसा स्वरलहरी; तां संश्रुत्य शङ्करभुजङ्गमोऽपि अनुबोभवीति महामोदम् । तज्जनितेन नयनसलिलेनाऽऽप्लुतेन आशुतोषेण किञ्चिन्तितमिति पठ्यतां कविशब्देषु—

सन्ध्यानृत्यविधौ भुजङ्गमपतेर्गीतामृतं शृण्वतः,
प्रत्यक्षिस्खलितं प्रमोदसलिलस्तोमे तनौ सर्पति ।
मौलेरुत्पथगा किमु त्रिपथगा जातेति शङ्काजुषः,
देवस्य त्रिपुरान्तकस्य चकितं व्यालोकितं पातु वः । पृष्ठम्—१

माङ्गलिकेऽस्मिन् श्लोके कवेः वर्णने किमपि नावीन्यमथ च काव्यप्रतिभा-प्रावीण्यं वैशिष्ट्यं वा न प्रकटीभवति । ग्रन्थाऽऽरम्भे मङ्गलाचरणं करणीयमिति शिष्टानां परम्परापालनमेव कृतं कविना । किन्तु शार्दूलविक्रीडितवृत्ते निर्मित-स्यास्य श्लोकस्य टीकायां टीकाकारस्य 'प्रायः सारंगरागेण पठनरीतिरस्येति' कथनं महन्महत्त्वपूर्णम् । श्लोकानामपि गायं गायं पठनस्य परम्परा नास्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राचीनाऽर्वाचीना वा पण्डितसमाजे । प्रसिद्धटीकाकारेण मल्लिनाथेन संगीतशास्त्रीय-रागेषु निबद्ध्यानां श्लोकानां गायनविधानस्योल्लेख: कस्याऽपि काव्यस्य टीकायां क्वाऽपि न विहित: । अनेन प्रतीयते यन्मिथिलायां श्लोकान् स्वरताललयबद्धान् विधाय गायनकरणस्य रीतिरासीत् पुराकाले । परन्तु टीकाकारस्य कथनमिदं 'गीती शीघ्री शिर: कम्पी·· षडेते पाठकाऽधमा:' इति पाणिनीयशिक्षाप्रति-पादितसिद्धान्तेन सह सामञ्जस्यं नाऽऽवहति प्रत्युत विरोधमेव प्रकटयति ।

इत्थं पारम्परिकं माङ्गलिकश्लोकं विलिख्य कवि: मदीयं काव्यमेकत: अमृत-समानं मधुरतरमन्यतश्शङ्करस्य डमरुडिण्डिम इव श्रुतिमनोहरमस्तीति गर्वोक्ति-मिश्रितां घोषणां विदधाति । अधीयतां तदीयशब्दावलीषु गर्वोक्तिरियं पाठकवर्गैः:—

भानोर्गीतं सुधास्फीतं शम्भोर्डमरुडिण्डिमः ।
विदुषां रसनारङ्गभूमिर्भारति ! नृत्यताम् ।। पृष्ठम्—१

कविवरभानुदत्तस्य काव्यमिदं सुधासमानं स्फीतं शङ्करस्य डमरुडिण्डिम इव कर्णप्रियं वस्तुतो वरीवर्ति प्रत्युत ग्रन्थकारस्य गर्वोक्तिमात्रमेतदित्यस्मिन् विषये काव्यमर्मज्ञा विज्ञाः पाठका एव प्रमाणम् ।

रसभृतिः कृतिरियं रसराजश्रृङ्गाररसप्रधाना । अत: प्रथमम् विप्रलम्भ-श्रृङ्गारस्य पृष्ठभूमिमुपस्थापयितुं कवि: पार्वतीद्वारा शङ्करस्य भर्त्सनां कारयति—हे नटराज ! केलिकरणे कुशल: कोऽपि कामी किम्-अनिन्द्यसुन्दरीं कामपि कामिनीं मूर्ध्ना धारयति ? त्वन्तु मदीयसपत्नीसमानां जाह्नवीं शिरसि धारयसि । किमिदमुचितम् ? इत्यभिधाय रोषान्विता शिवा वासन्तिके कमनीये कुञ्जे निर्जगाम । इमामेव भावनां भानुदत्तः इत्थं चित्रयति—

के वा केलिकलाकलापकुशला: क्रीडन्ति नो कामिनः,
कान्ता क्वाऽपि कदाऽपि काऽपि शिरसा केनाऽपि किं धार्यते ?
गंगां मूर्ध्नि दधासि नाऽपि वहसि व्रीडां न धत्से कथम्,
किं वाऽवाच्यमिदं निगद्य गिरिजा कुञ्जान्तरं निर्ययौ ।। पृष्ठम्—५

श्लोकोऽयं वार्तालापप्रसंगात्मक: । तस्मादत्र कविना सकलाऽपि शब्दावलि-स्तदनुकूला प्रयुक्ता न तु समासबहुला । श्लोकस्य द्वितीयपङ्क्तौ 'अपि' शब्दस्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नेकधा प्रयोगस्तु पाठकानां हृदि मनोमोदावहां काम्पि चमत्कृतिञ्जनयति। पद्येऽस्मिन् कवेः शब्दप्रयोगपटिमा प्रशंसनीयः श्लाघनीयश्च।

एवमाशुतोषशिवस्य व्यवहारेण कुञ्जस्थितां रोषान्वितां खिन्नां दीनामुदासीनाञ्च शिवां संवीक्ष्य व्यथितहृदया तदीया सखी विजया तामुवाच—हे शिववल्लभे ! सखि पार्वति ! कथमिदानीं त्वं रोषान्विताऽसि ? कथं खिन्नासि ? कथमुदासीनाऽसि ? कथं दीनाऽसि ? साम्प्रतं महीरुहाणामपि मनसि हर्षं जनयन् शीतभीतं परभृतं मुखरयन् हन्त ! विशालःवसन्तकालः समायातः। पश्य, अधुना मधुना निखिलायामिलायां वासन्ती विभा विराजते। धैर्यं धर। हृद्गतां दीनतां परिहर। अणुमात्रमपि रोषं मा कुरु। खिन्नतां त्यज। उदासीनतामपहाय त्वमपि मोदस्व। सम्प्रति भवं प्रति क्रोधभावो न रोचते। इममेव प्रसंगमादाय कविना लिखितं वसन्तवर्णनात्मकमेकं स्फीतं गीतं सहृदयाः पाठकाः पठन्तु-अनुभवन्तु च गीते प्रयुक्तपदशय्याजनिताऽमन्दानन्दसन्दोहम्। कविस्तु वसन्तरागेण गीयमानं गीतमिदममृतद्रवसमानं मधुरं मन्यते। अधस्तनगीतस्य माधुर्ये काव्यसौन्दर्ये च विज्ञाः काव्यमर्मज्ञा अध्येतार एव प्रमाणम्। प्रस्तूयते पाठकान् पुरतो गीतः।

चम्पकचर्चितचापमुदञ्चितकेसरकृततूणीरम्।
मधुकरनिकरकठोरकवचचयपरिचितचारुशरीरम्॥
जनुरनुरञ्जय पश्य वसन्तम्।
विकचवकुलकुलसङ्कुलकाननकुसुममिषेणह सन्तम्॥

सरसिजसौरभसुभगसमीरणसुमुदितपथिकविषादम्।
कोकिलकलरवकपटलताततिविरचितमृणितनिनादम्॥

विकसितकिंशुककुसुममसमशरविशिखविलासनिनादम्।
युवतिमानमधुपानसमुन्नतरसनामिव विनिधानम्॥

अविरलमदजलसिन्धुरबन्धुरकुसुमितबालतमालम्।
त्रुटितरजनिघटिकाविघटितकणकोमलमधुकरजालम्॥

तरुणलवंगरसालविचित्रितविविधकुसुमकमनीयम्।
मदनापणमिव दिशि दिशि निहितं नानामणिरमणीयम्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रतिपतिरयपयद्वारतारतरकेतकमञ्जुनिकुञ्जम् ।
स्मरनटनटनपतितमुकुटमणिपटुतरपाटलपुञ्जम् ॥

यामवतीयुवतीयुवतीतनुकर्पणशिथिलितदिनकरयानम् ।
विरहिविदारणवहलतमः श्रमविहितहिमानोपानम् ॥

भानुदत्तकविकृतमधुवर्णनममृतद्रवसंकाशम् ।
जनयतु गौरीनयननिषेवितपुरहरहृदयविकाशम् ॥ पृष्ठम्–७-६

गीतेऽस्मिन् कविकृतशब्दालङ्कारचमत्कारभारभङ्गिमा पदावल्यां त्रदिमा च बाभात्येत्र, तेन सार्धमर्थसौन्दर्यगरिमाऽपि दन्ध्वनीति। एतादृशानि बहूनि गीतान्यत्र सन्ति. तानि विस्तारभिया नाऽत्रोद्ध्रियन्ते ।

संस्कृतभाषाकाव्येषु प्रायः सर्वेषामृतूनां वर्णनस्यैका प्रत्नतमा परम्परा दृग्गोचरीभवति । आदिकविमहर्षिवाल्मीकिनाऽपि स्वीये रामायणे सकलर्तूनां मनोमुग्धकारिवर्णनं विहितम्। तदीयं रमणीयं वर्षावर्णनं सहृदयसुधीससमाजे अतीव लोकप्रियं वरीवर्ति । महाकविकालिदासेन तु ऋतूनभिलक्ष्य ऋतुसंहारनामकं काव्यमेव व्यरचि। एतादृशानि अन्यैः कविवरैः प्रणीतानि बहूनि काव्यानि संस्कृत-भाषायामुपलभ्यन्ते । अत एव साहित्यशास्त्रस्याचार्यवर्यैः महाकाव्येषु समेषाम्–ऋतूनां वर्णनमनिवार्यमुद्घोषितम् । यद्यपि महाकविजयदेवेन स्वकीये गीतगोविन्दे सर्वेषाम्-ऋतूनां वर्णनन्तु न विहितम् किन्तु कविवरकालिदासेन 'सर्वं प्रिये! चारुतरं वसन्ते' इति सूक्त्या प्रशंसितस्य ऋतुराजवसन्तस्यैव 'ललितलवंगलता परिशीलनकोमलमलयसमीरे' प्रसिद्धेन लोकप्रियेण इति गीतेन ,हृदयहारि चित्रणं कृतम् । अन्येषाम्-ऋतूनां वर्णनन्तु गीतगोविन्दे नैव वर्तते । तत् परम्परायां लिखितेषु सर्वेष्वपि रागकाव्येषु प्रायः वसन्तस्यैव वर्णनं प्राप्यते । अतोऽस्मिन्नपि काव्ये वसन्तस्यैव वर्णनं विहितं कविना–अन्येषाम् ऋतूनां वर्णनन्तु नैव । अस्तु प्रकृतमनुसरामः

रागकाव्येषु कविवर्याः प्रसादगुणपरिचायकानां कोमलानां कर्णप्रियाणाञ्च शब्दानाम् प्रायः प्रयोगं कुर्वन्ति । रागकाव्यप्रवर्तकेन महाकविजयदेवेन प्रसिद्धे स्वकीये गीतगोविन्दकाव्ये इयमेव रीतिः गीतेषु प्रवर्तिता । किन्तु प्रस्तुते रागकाव्ये महा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कविभानुदत्तेन गीतेषु श्लोकेषु चैतद्विपरीतं पाण्डित्यप्रकटनाय साधारणपाठक-समाजे अप्रचलिताः अप्रसिद्धाश्च शब्दाः संप्रयुक्ताः। महिषकृते कासरशब्दस्य, यमराजाय शमनशब्दस्य जलार्थे गीतेषु—पाथशब्दस्य च प्रयोगो विहितः यथा—

प्रसरति केसरकुसुमजधूली ।
किमु यमकासरखुरपुटधूली ।। पृष्ठम्—२६

शमनमहिषचिररोमन्थच्युतफेनकपटसङ्काशम् ।
गणयति कुञ्जमञ्जुकरुणद्रुमकोरकमुदितविकाशम् ।। पृष्ठम्—६०

उत्प्रेक्षागर्भितेषु श्लोकेष्वपि दृश्यताम्—

वारुण्या किमु तिग्मभानुविरहव्याधिव्ययाखिन्नया,
सन्तापोपशमाय काऽपि दलिता रम्भेति सम्भाव्यते।
तस्याः गर्भदलं निशाविगलितं पाथः पुनः कौमुदी,
कर्पूरं किमु तारका हिमकरं कन्दं किमुन्मीलति ।। पृष्ठम्-७१

उत्प्रेक्षाऽन्वितं पद्यमिदं कवेरद्भुतकल्पनाजल्पनायाः कौशल्यं प्रकटयति यद् वीक्ष्य श्लोकस्याऽभिप्रायमनुभूय च पाठकानां मनः हर्षोत्कर्षसिन्धौ निमज्जति। गीतकाव्येऽस्मिन् एतादृशाः अतिशयोक्तिगर्भिता विचित्रकल्पनाकलिताः ललिताः श्लोकाः बहवः सन्ति। तेषु एकस्य श्लोकस्यात्रोद्धरणं दीयते—

न्यस्तो मणिस्त्वयि मया सहजोऽनुरागः,
साक्षी मनः समजनि प्रतिभूर्मनोभूः ।
प्राण ! प्रयासि यदि तत् परिहृत्य हन्त,
क्रूरेण किं निगदितं रजनीकरेण ।। पृष्ठम्—३१

अनुभवजन्याऽमूर्तरूपस्वाभाविकप्रीतिकृते, प्रतिपलं दृग्गोचरीभूतमूर्तरूप-मणिरिति कल्पना, मनः तदीयसाक्षीति जल्पना, मनोभूः प्रतिभूरित्यवधारणा च कविवरभानुदत्तस्य प्रगल्भप्रतिभायाः परिचयं प्रददति श्लोकेऽस्मिन्। अस्य कविवरस्य रससिक्तस्यैकस्याऽन्यस्य श्लोकस्याऽपि-उद्धरणकरणं नाप्रासङ्गिकम्। भानुदत्तेन यवननृपाणां प्रशस्तौ कियन्तः श्लोकाः लिखिताः ते सर्वे अदसीये निज-श्लोकसङ्ग्रहात्मके रसपारिजातनामके सुभाषिते ग्रन्थे प्राप्यन्ते। अनेन प्रशस्ति-विषयकश्लोकेन भानुदत्तस्य यवननृपतिभिस्सह सम्बन्धः यवनभाषया कविभिस्सार्धं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संपर्कश्च निश्चप्रचमासीदिति निर्विवादः। अस्यां दशायां भानुदत्तः 'यवनभाषा-कविक्रियमाणविषयवर्णनपद्धत्या पूर्णरूपेण परिचितः'—इति कथनमसमीचीनम्। अस्तु सांप्रतमेतदीयः यवनभावावर्णनविधासंस्तवसन्दायकःप्रसादगुणपोषकः कवि-रसिकताद्योतकश्चैकः श्लोकोऽत्र प्रस्तूयते—

चेतसा मिलितं चेतो वचसा मिलितं वचः।
चक्षुषा मिलितं चक्षुर्दोष्णा किन्नपराध्यते ॥ पृष्ठम्—८६

अनवद्यं हृद्यं पद्यमिदं सहृदयहृदयसंवेद्यमनुभवगम्यञ्च। अतोऽस्य विवेचन-विश्लेषणेनालम्। सांप्रतमस्य रागकाव्यस्य विषये स्वविचारं समासेन प्रतिपाद्य विरमाम्यहम्। यादृशाः सरसाः सरलाः प्रौढाः कोमलपदावलीपरिलसिताः ललिताः कलात्मकाः सहृदयहृदयाकर्षकाः मर्मस्पर्शिनः रसस्यन्दिनश्च श्लोकाः अस्य कवि-वरस्य प्रसिद्धायां रसतरङ्गिण्यां रसमञ्जर्याञ्च प्राप्यन्ते, तादृशाः रसरञ्जिताः श्लोकाः गीतकाव्येऽस्मिन् न दरीदृश्यन्ते। इयमेव स्थितिरस्य रागकाव्यस्य गीतेष्वपि वर्तते। अत एव अनुमोमहे सिद्धसारस्वतस्य महाकविभानुदत्तस्य बाल्यकालिका प्रथमा कृतिरियम्। अस्मादेव कारणादस्मिन् रागकाव्ये गीतेषु गतिहीनता श्लोकेषु च अप्रौढता दरीदृश्यते। टीकाकारस्याऽनवधानतया यत्र तत्र गीतस्य प्राणभूते अन्त्यानुप्रासे शिथिलताऽपि समागता। एतद्विषये स्थले स्थले स्वमतं टिप्पण्या प्रकटीकृतम्। अधिकं किं लिखामः। यद्यपि काव्यमिदं जयदेवस्य गीतगोविन्देन पूर्णतः प्रभावितं तथापि जयदेवस्य स्फीतेषु गीतगोविन्दगीतेषु हृद्येषु पद्येषु च यादृशी सरसता पदावलीषु पेशलता हृदयस्पर्शिभावप्रवणता च राराजते न तादृशी काव्येऽस्मिन् दृश्यते।

प्रस्तुतगीतकाव्यस्य मुद्रणयोग्यस्वच्छप्रतिलिपिकरणे प्रयागनगरस्थमहानिर्वाणवेद-विद्यालयस्य व्याकरणाध्यापकपण्डितसुन्दरलालद्विवेदिनः तथा प्रूफसंशोधनकार्ये पण्डितप्रवरश्रीतारिणीशझामहाभागादेवं सुहृद्वरश्रीशेषधरद्विवेदिनः महती सहायताऽधिगता। एतदर्थमेते स्वजनकल्पा विद्वज्जना धन्यवादार्हाः। अस्य काव्यस्य टङ्कितां द्वितीयां मातृकां संप्रदाय काशीहिन्दूविश्वविद्यालयप्राच्यविद्याविभा-गस्य साहित्यविभागाध्यक्षेण मम मित्रेण डॉ० रेवाप्रसादद्विवेदिमहोदयेन कृति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संपादनकार्ये महत् सौकर्यमापादितम् । एतत्कृते तेभ्योऽप्यनेकान् साधुवादान् वितरामः ।

प्रस्तुतरागकाव्यस्य कियानंशः यत्र तत्र त्रुटित आसीत् । तस्य पूर्तिकरणे गुजरातप्रदेशस्य बड़ौदाविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण विद्वद्वर डॉ० ए० एन्० जानीमहोदयेन स्वविद्यालयस्थितमातृकातः त्रुटितांशेन सम्बधिन्तांशस्य प्रतिलिपिं विधाय संप्रेष्य च प्रस्तुतकाव्यस्य शुद्धरूपप्रकाशने यत् योगदानं कृतं तदर्थं तेऽपि धन्यवादार्हाः ।

प्रस्तुतगीतकाव्यस्यैकवर्षात् पूर्वमेव मुद्रणे सञ्जातेऽपि प्रस्तावनाऽऽभावादद्यावधि प्रकाशनन्न सञ्जातम् । एकवर्षाभ्यन्तरे यदा प्रस्तावना लेखनाय प्रयत्नः कृतस्तदा सदा मध्ये मध्ये महती बाधा समुपस्थिता । सा कदाचित् गार्हिकी कदाचित् मदीयस्वास्थ्यविषयिणी । सांप्रतमपि मम पत्नी मासत्रयात् वातव्याधिना पीडिता सती पादसञ्चालनेऽप्यसमर्थाऽस्ति । अहमपि वातव्याधिपीडितः । अतो यथाकथञ्चित् उदासीनमनसा प्रस्तावना लिखिता । अस्यां दशायां त्रुटिरत्र स्वाभाविकी । तत्कृते सहृदयाः पाठकाः क्षमां विधास्यन्तीति शम् ।

प्रभातशास्त्री

गान्धीजयन्ती
२ अक्टूबर १९८२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुक्रमः

प्रस्तावना	५–२३
प्रथमसर्गः	१– ९
द्वितीयसर्गः	१०–१६
तृतीयसर्गः	१७–२४
चतुर्थसर्गः	२५–३१
पञ्चमसर्गः	३२–४५
षष्ठसर्गः	४६–५४
सप्तमसर्गः	५५–६८
अष्टमसर्गः	६९–७८
नवमसर्गः	७९–८८
दशमसर्गः	८७–९६
परिशिष्टः	९७–

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ गीत गौरीपतिः ॥

●

सटीकम्

●

प्रथमसर्गः

●

प्रथमतः कविर्भानुदत्तः प्रारीप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये शिष्यशिक्षार्थं मङ्गलमातनोति—

सन्ध्यानृत्यविधौ भुजङ्गमपतेर्गीतामृतं श्रृण्वतः,
प्रत्यक्षिस्खलितप्रमोदसलिलस्तोमे तनौ सर्पति ।
मौलेरुत्पथगा किमु त्रिपथगा जातेति शङ्काजुषो,
देवस्य त्रिपुरान्तकस्य चकितं व्यालोकितं पातु[1] वः ॥१

सन्ध्येति—सन्ध्यायां नृत्यविधिः तस्मिन् प्रचलिते गीतामृतम् गीतममृतमिव तच्छृण्वतो भुजङ्गमपतेः शेषस्य तेन प्रत्येकतोऽक्षणः स्खलितं यत् प्रमोदसलिलं तस्य स्तोमे समूहे तनौ शरीरे सर्पति सृपेःशतरि रूपं, मौलेः जटाजूटतः त्रिपथगा शिरोगता जाह्नवी उत्पथगा उच्चलिता जाता किमु ? इति शङ्काजुषः शङ्काभागिनस्त्रिपुरान्तकस्य त्रिपुरासुरस्यान्तकस्य शम्भोश्चकितं ससम्भ्रमं व्यालोकितमवलोकितं वः युष्माकं पातु रक्षत्वित्यर्थः । प्रायः सारङ्गरागेण पठनरीतिरस्य ।१

इदानीं कविः काव्यं चिकीर्षुर्ग्रन्थोन्नत्या गानसाहित्यमाह—

भानोर्गीतं सुधास्फीतं शम्भोर्डमरुडिण्डिमः ।
विदुषां रसनारङ्गभूमिर्भरति!नृत्यताम् ॥२

भानोरिति—भानोर्भानुदत्तकवेः । 'विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो-

---

१—नः ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वक्तव्यः'। गीतं प्रबन्धादि सुधास्फीतं सुधेव स्फीतं मधुरं शम्भोः शङ्करस्य यो डमरुर्वाद्यविशेषस्तस्य डिण्डिमस्तालः रङ्गभूमिस्तु विदुषां रसना इति गान-साहित्येन हे भारति ! वाग्देवि ! नृत्यताम् त्वयेति शेषः ।२

इदानीं काव्यारम्भपूर्वकमष्टमूर्तित्वेन श्रीशङ्करं स्तौति—

अन्तश्चारिणि शैत्यकारिणि सुधाधाराचमत्कारिणि,
ध्वान्तार्कर्षिणि[1] हृव्यवर्षिणि नटन्नक्षत्र[2] मुद्योतिनि ।
मायाकच्छपपृष्ठरोहिणि सुराधीशद्रु मद्रोहिणि,
क्रीडाक्लिपतवेषधारिणि पुरारातौ मनो [3]मज्जतु ॥३

अन्तश्चारिणीति–अन्तश्चारिणि वायौ 'अन्तश्चरसि भूतानामिति' हि श्रुतिः। शैत्यकारिणि शीतस्य भावः शैत्यं तत्करोति इति ताच्छील्ये णिनिः 'शीतस्पर्श-वत्यापः' उदके इत्यर्थः। सुधाधाराचमत्कारिणि सुधाधाराभिरमृतफूत्कारै-श्चमत्करोतीति आश्चर्यमुत्पादयतीति नाम सुधाकरे चन्द्रे । ध्वान्तार्कर्षिणि ध्वान्तं गाढान्धतमः तदाकर्षति सूर्ये । हृव्यवर्षिणि हव्यं हविः तद्वर्षतीति होतरीत्यर्थः । नक्षत्रं नक्षत्राणि जात्यैकवचनमुद्योतयतीति आकाशे इत्यर्थः । मायाकच्छप-पृष्ठरोहिणि पृथिव्याम् । सुप्रसिद्धं कूर्मावतारपृष्ठाधारित्वं पृथिव्याः । उक्तञ्च जयदेवेन कूर्मावतारविशेषणं जगन्ति वहते इति । सुराधीशद्रुमद्रोहिणि कल्प-वृक्षानपि स्वकीयतेजःशिखाभिस्तुच्छीकरोतीति तेजोरूपेऽग्नावित्यर्थः । एवं क्रीडया लीलया कल्पिताः वेषाः नहि वस्तुतः तान् धारयति स्वभाव एवायं पुरारातौ श्रीशङ्करे मनो मज्जतु चित्तं संलग्नमस्त्वित्यर्थः । दृढा भक्तिरस्तु इति यावत् । ३

ता एवाष्टमूर्तीः पुनर्गीतिनाह । रीतिर्हीयं गीतगोविन्दे—यथा प्रलयपयोधीति गीतमुक्त्वा 'वेदानुद्धरत' इति संक्षिप्यान्ववदत्–[4]अथ प्रथमप्रवन्धो मालवरागेण रूपकताले गीयते—

भ्रमसि जगति सकले प्रतिलवमर्मविशेषम् ।
शमयितुमिव जनखेदमशेषम् ।
पुरहर ![5]धृतसमीरशरीर ! जय भुवनाधिपते !॥१ ध्रुवपदम्

१—हृव्यकर्षिणि ख । २–विद्योतिनि ख । ३—मण्डतु ख । ४—खपुस्तके 'मालवरागेण गीयते' इत्यस्ति शेषांऽशो नास्ति । ५—कृतमारुतवेष क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्रमसीति—प्रतिलवं—लवं लवं प्रति प्रतिलेशम् । अव्ययमित्यादिनाऽव्ययीभावः । 'लवो लेशे विनाशे चेति मेदिनी' अशेषं जनखेदं शमयितुमिव शान्तं कर्तुमिव ।१

प्रवहसि मधुमथनं नवनीरदललितम् ।
मरकतमणिमिव वक्षसि तुलितम् ।
पुरहर ! [1]धृतजलधिशरीर ! जय भुवनाधिपते ! ।।२

मधुमथनं, मथ्यते इति मथनं भावे ल्युट् मधु च तन्मथनञ्च नीरदो मेघः वक्षसि हृदि ।२

[2]क्षीरसिन्धुलहरीरुचिरं रुचिजालम् ।
परमधाम किमु वहसि विशालम् ।
पुरहर ! [3]धृतहिमकररूप ! जय भुवनाधिपते ! ।।३.

क्षीरसिन्धुः पयःसमुद्रः तस्य लहर्य इव रुचिरं शोभनं रुचिजालं रुच्याः दीप्त्याः जालं समूहो यस्मिंस्तत् । 'रुचिः स्त्री दीप्तौ शोभायामिति मेदिनी' । परमं धाम तेजःसमूहः विशालं पृथुलम् ।३

घनतिमिरचयं चिरमपगतशङ्कम् ।
हरसि लग्नमिव जगतीपङ्कम् ।
पुरहर ! [4]धृतदिनकररूप ! जय भुवनाधिपते ! ।।४

घनतिमिरचयं गाढान्धकारसमुदायं जगतीपङ्कं 'पङ्कोऽस्त्री कर्दमे पापे' इति मेदिनी ।४

कलयसि देवकुलं हविषा सानन्दम् ।
घन इव पयसा चातकवृन्दम् ।
पुरहर ! [5]धृतयजमानशरीर ! जय भुवनाधिपते ! ।।५

कलयसि—कल सङ्ख्याने हविषा हविरत्र हेतुः अत एवायं दृष्टान्तः घन इवेति ।५

१—कृत क । २—क्षीरसिन्धुरुचिरं रुचिवरजालम् ख । ३—कृत क । ४—कृत क । ५—कृत क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वहसि ग्रहनिवहं परिहृत[1]तापम् ।
करुणतरोरिव कुसुमकलापम् ।
पुरहर ![2] धृतगगनाकार ! जय भुवनाधिपते ! ॥६

परिहृतस्तापो येन एतादृशं ग्रहनिवहं ग्रहसमूहं वहसि धारयसि । अनेन तापहारकत्वं त्वय्येवेति ज्ञापयति । अत एवोपमायां करुणतरोरिवेति । तरुणेति-कुत्रचित् पाठः ।६

कपटकोलदशने रचयसि [3]सुविलासम् ।
कुन्ददामगतमधुकरभासम् ।
पुरहर ! [4]धृतधरणीरूप ! जय भुवनाधिपते ! ॥७

कपटकोलदशने विष्णुकृतवाराहदन्ते सुविलासं रचयसि सक्रीडं वतंसे । कुन्ददामगतमधुकरभासं कुन्दपङ्क्त्युपरि भ्रमर इव ।७

वहसि शिखानिचयं [5]हिमनिकरहरम् ।
प्रेमतरोरिव [6]शाखानिचयम् ।
पुरहर ! [7]धृतहुतवहदेह ! जय भुवनाधिपते ! ॥८

शिखानिचयं शिखानां ज्वालामालादिनाम्नां सप्तानां निचयं वहसि धारयसि । प्रेम एव तरुः । शाखानिचयमिव स्कन्धसमूहमिव ।८

भानुवत्तरचितं शशिशेखरगीतम् ।
भवतु श्रवणयुगलपुटपीतम् ।
पुरहर ! [8]धृतवसुमितरूप ! जय भुवनाधिपते ! ॥९

श्रवणयुगलपुटपीतं श्रवणस्य युगलं द्वयं तस्यपुटं तेन पीतं यथा तथा भवतु जना. सादरं शृण्वन्त्वित्यर्थः । एवं प्रथमः प्रबन्धः । एनमष्टपदीति कथयन्ति । अष्टानां

१—संतापम् ख । २—कृत क । ३—सविलासम् ख । ४—कृत-धरणीकाय क । ५—हिमसङ्घातहरम् क । ६—गीतदृष्ट्या 'ख' पुस्तकस्थपाठः 'शाखानिकरम्' इति समीचीनः । ७—कृत क । ८—कृत क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदानां समूहः । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः द्विगोरिति ङीपि भसंज्ञायाम् यलोपः । ६

इदानीं वियोगश्रृङ्गारमुपक्रमते—

के वा केलिकलाकलापकुशलाः क्रीडन्ति नो कामिनः,
कान्ता क्वाऽपि कदाऽपि काऽपि शिरसा केनाऽपि किं धार्यते ।
गङ्गां मूर्ध्नि दधासि नाऽपि वहसि व्रीडां न धत्से कथं,
किं वाऽवाच्यमिदं निगद्य गिरिजा कुञ्जान्तरं निर्ययौ ।।५

के वेति—गिरिजा गिरेर्जाता पार्वती जनेर्डः । केलिकलाकलापकुशलाः केलीनां श्रृङ्गारक्रीडानां कलापास्तेषु कुशला प्रवीणाः कामिनो मदनशरार्त्ताः के वा नो क्रीडन्ति, अपि तु क्रीडन्त्येव परञ्च तेषु कान्ता स्त्री क्वाऽपि कुत्राऽपि कदाऽपि कस्मिन्नपि काले केनाऽपि कामिना काऽपि धार्यते किम् ? नैव । एवं सिद्धे गङ्गां मूर्ध्नि दधासि वहसि नाऽपि इति पुनः पृच्छति । वहस्येवेयं दृश्यते मयेत्यर्थः । एवं स्त्रियं मूर्ध्नि प्रधार्य कथन्न व्रीडां धत्से कथन्न लज्जसे । किं वाऽवाच्यमिदम्, किमिदमवाच्यं, अथवा किं वा इदम्—वाच्यम्, मद्वाचाननुसरणादिदं मयाऽवक्तव्यमेवेत्युक्त्वा शङ्करमित्यध्याह्रियते । कुञ्जान्तरम् अन्यत् कुञ्जं लतामण्डपं निर्ययौ, अगच्छत् । या प्रापणे प्रापणमिह गतिः लिट् ।५

माधवीमुकुलामोदप्रमोदमद [1]बिभ्रती ।
विजया प्रणयादूचे गौरीमूरीकृत[2]स्मराम् ।।६

माधवीमुकुलामोदप्रमोदमदबिभ्रती—माधव्या वासन्तीलतायाः, 'वासन्ती-माधवीलतेत्यमरः' । ये मुकुलाः कुड्मला तेषामामोदः सुगन्धः तस्माद्यः प्रमोदः तेन मदं बिभ्रती अनेन बुभुक्षितान्नवर्णनन्यायेनाग्रेतनग्रन्थरसवर्णनश्लाघोक्ता । सा विजया प्रणयात् प्रेमतः ऊरीकृतस्मरां स्मरयुक्तां गौरीमूचे ।६

देवि ! पश्य मधोः सन्धिं पश्य तस्य महोत्सवम् ।
विधेहि नर्तितानङ्गैरपाङ्गैस्तोरणस्रजम् ।।७

किं तदाह—देवीति—हे देवि ! मधोः सन्धिं पश्य तस्य महोत्सवमपि पश्य,

१—बिभ्रति ख । २—स्मरम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नर्तितानङ्गैः नर्तित इव अनङ्गः कन्दर्पो यैः अपाङ्गैः नेत्रकटाक्षैः तोरणस्रजं तोरणमालिकां विधेहि रचय ।७

दृष्टिरस्य द्विरेफस्य कुन्देषु मुदमुदञ्चति ।
अपाङ्गो गन्तुमारेभे[1] किन्तु माकन्दकाननम् ॥८

मुदमुदञ्चति—प्रफुल्ले भवति सति । माकन्दकाननं माकन्दानां कानन-मरण्यम् ।८

पुनर्वसन्तं वर्णयति—

समीरस्य मल्लीमतल्लीदिदृक्षा,
सिसृक्षा रसालाशुगानां स्मरस्य ।
द्विरेफस्य [2]चित्रध्वनीनां शिशिक्षा,
विवक्षा पुनः पञ्चमानां पिकस्य ॥९

समीरस्य वायोः । 'समीरमारुतमरुज्जगत्प्राणसमीरणा' इत्यमरः । मल्लीमतल्लीदिदृक्षा मालतीविस्तारं प्रति द्रष्टुमिच्छा । स्मरस्य मदनस्य रसालाशुगानां रसालेषु आम्रेषु आशुगाः बाणाः पुष्पाणीत्यर्थः । 'अरविन्द-मशोकञ्च चूतञ्च नवमल्लिका । नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ।' पुष्पबाणत्वात् पुष्पे सायकत्वमित्युक्तम् सिसृक्षा स्रष्टुमिच्छा द्विरेफस्य भ्रमरस्य चित्रध्वनीनां गुञ्जारवाणां शिशिक्षा । शिष् धातोरिदं सन्नन्तम्, नहि शकेः, तस्य केवलं शिक्षेति । पुनस्तत्र पिकस्य पञ्चमानां पञ्चमस्वराणां विवक्षा वक्तुमिच्छा 'पुष्पसाधारणे काले कोकिला रौति पञ्चममित्युक्तम्' ।९

अधुना ऐन्द्रजालिकत्वेन वर्णयति—

आशारज्जुषु नर्तयन् हिमकरं कामोरगं खेलयन्,
हासं कुञ्जमहीरुहस्य जनयन् मूकं पिकं वादयन् ।
बध्नन्[3] कामिजनान् समीरण[4]पथं निर्घोटकं चालयन्,
जानीमो मधुरैन्द्रजालिक[5]मिषाद् दिक्चक्रमाक्रामति ॥ १०

१—किन्तु क । २—चिन्मानिनाम् ख । ३—कामिजनः ख । ४—रथम् ख । ५—युवा ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मधुः वसन्तः आशारज्जुषु दिग्रज्जुषु हिमकरं चन्द्रं नर्तयन् कामोरगं काम एवोरगः तं खेलयन् कुञ्जमहीरुहस्य हासं जनयन् पुष्पाण्युद्भावयन्नित्यर्थः। इमे प्रेक्षका अत्र। कामिजनान् बध्नन्। निर्घोटकं पूगवृक्षं घोटकमिति छेदश्च। समीरणपथं चालयन्, एवमैन्द्रजालिकमिषात्। ऐन्द्रजालिकादिवेदं दिक्चक्रं दिङ्मण्डलमाक्रामतीति जानीमः। १०

●

अथ[1] द्वितीयप्रबन्धो वसन्तरागेण रूपकताले गीयते—

प्रबन्धेन वसन्तं शबरत्वेन वर्णयन्तन्मृगयासामग्रीं कथयति—

चम्पकचर्चितचापमुदञ्चितकेसरकृततूणीरम् ।
मधुकरनिकरकठोरकवचचयपरिचितचारुशरीरम् ॥ १
जनुरनुरञ्जय पश्य वसन्तम् ।
विकचवकुलकुलसङ्कुलकाननकुसुममिषेण हसन्तम् ॥ ध्रुवपदम्

चम्पकेति--चम्पकस्य चर्चितं चापं धनुर्यस्य उदञ्चितः उन्नतशोभनः केसरकृततूणीरं केसरैः पुष्परागैः कृतः तूणीर इषुधिर्यस्य। मधुकराणां भ्रमराणां निकरःसमुदायः तस्य कठोराणां कवचानां चयः, तेन परिचितं सन्नद्धं चारु शरीरं यस्य। विकचानि यानि वकुलानां कुलैः सङ्कुलानां व्याप्तानां काननानां कुसुमानि पुष्पाणि तन्मिषेण हसन्तम् वसन्तं पश्य जनुः जननं अनुरञ्जय जन्मसार्थक्यं कुर्वित्यर्थः। १

सरसिजसौरभसुभगसमीरणसुमुदितपथिकविषादम् ।
कोकिलकलरवकपटलताततिविरचित[2]मृणितनिनादम् ॥२

सरसिजानां कमलानां सौरभं तेन सुभगः, आनन्दकारी यः समीरणः तेन समुदितः उत्पादितः पथिकानां पान्थानां विषादो येन। कोकिलानां कलरवः मन्द्रध्वनिः तेन कपटेन लताततिषु वल्लीसमूहेषु विरचितो मृणितनिनादः तन्त्रीध्वनिर्येन। २

१—ख पुस्तके 'वसन्तरागेण गीयते' एतावन्मात्रमस्ति। २—मणितनिनादम् ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विकसितकिंशुककुसुममसमशरविशिखविलास[1] निनादम् ।
युवतिमानमधुपानसमुन्नतरसनामिव [2]विनिधानम् ॥ ३

असमशरस्य मदनस्य विशिखाः बाणाः तेषां विलासनिनादमिव निनादो यस्मिन् । युवतीनां यन्मानेन मधुपानं तस्यैव समुन्नतां रसनामिव विकसितञ्च तत् किंशुककुसुमं दधानम् । ३

अविरलमदजलसिन्धुरबन्धुरकुसुमितबालतमालम् ।
त्रुटितरजनिघटिकाविघटितकणकोमलमधुकरजालम् ॥ ४

अविरलं हस्तिगण्डघर्षणेन विशेषतः संलग्नं यन्मदजलं तेन सिन्धुरः शबलः अत एव बन्धुरः शोभनः 'बन्धुरः शोभने नम्रे' इति मेदिनीकारः । कुसुमितः कुसुमयुक्तः बालतमालो येन । त्रुटितं रजनिघटिकाविघटितकणेन कोमलं मधुकरजालं यस्येति समासः ।४

अधुना राजधानीत्वेन वर्णयति

[3]तरुणलवङ्गरसालविचित्रितविविधकुसुमकमनीयम् ।
मदनापणमिव दिशि दिशि[4] निहितं नानामणिरमणीयम् ॥ ५

तरुणा ये लवङ्गरसालाः लवङ्गाम्रवृक्षाः तैर्विचित्रितानि यानि विविध-कुसुमानि तैः कमनीयम् । अतः नानामणिभिः, हीरकादिभिः रमणीयं शोभाय-मानं दिशि दिशि सर्वत्र वीप्सायां द्विर्वचनम् । निहितं स्थापितं मदनापणमिव ।५

रतिपतिरथ[5]पथद्वारतारतरकेतकमञ्जुनिकुञ्जम् ।
स्मरनट[6]नटनपतितमुकुटमणिपटुतरपाटलपुञ्जम् ॥६

रतिपतिर्मदनः तस्य रथपथः रथमार्गः तस्य द्वाराणि तेषु तारतरः उच्चैर्मन्दः केतकेषु मञ्जुनिकुञ्जो यस्मिन् । स्मर एव नटः नर्तकः तस्य नटनं नाट्यम् । अथवा स्मरस्य नटाः स्मरसम्बन्धिनो नाम स्मरसभास्था इति न पूर्वविरोधः ते ये पतिता मुकुटमणयस्तेषु पटुतराः पाटलपुञ्जाः यस्मिन् । ६

१—निदानम् क । २—बिभ्राणम् क । ३—करुण ख । ४—विनिहित ख । ५—रतदार ख । ६—नाटक ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]यामवतीयुवतीतनुकर्षणशिथिलितदिनकरयानम् ।
विरहिविदारणबहुलतमः श्रमविहितहिमानीपानम् ॥७

यामवती रात्रिः सैव युवती तरुणी, युवतीति तु यौतेः शत्रन्तान्ङीपि बोध्यमिति कौमुदी । तस्याः तनोःकर्षणेन शिथिलितं मन्दीभूतं दिनकरयानं यस्मिन् । विरहिणां विरहिजनानां विदारणे यो बहुलतमः श्रमः बहुलश्रमः अत एव विहितं हिमान्याः हिमसमुदायस्य पानं यस्मिन् । 'हिमारण्ययोर्महत्त्वे' हिमानी हिमसंहतिः इत्यमरः ।७

भानुदत्तकविकृतमधुवर्णनममृतद्रवसङ्काशम् ।
जनयतु गौरीनयननिषेवितपुरहरहृदयविकाशम् ॥८

एवं भानुदत्तकविकृतं मधुवर्णनं वसन्तवर्णनं कथं अमृतद्रवसङ्काशम्, अमृतमिव मधुरं शीतञ्च । गौर्या नयनाभ्यां विषेवितो दृष्टो यः पुरहरः शङ्करः तस्य हृदयविकासमानन्दं जनयतु । ८

व्याकीर्णान् परागान् उत्प्रेक्षयाह—

आयातस्य वसन्तवासरमहोत्साहं समालोकितुं,
भर्त्तुः सान्द्रकुतूहलस्य वसनं पीतं विधातुं रतिः ।
काश्मीरं किमु कण्डितुं कृतवती क्रीडां निकुञ्जोदरे,
व्याकीर्णानि रजांसि तस्य परितः प्रायः परागोत्कराः ॥१२

इति[2]श्रीकविचक्रवर्त्तिभानुदत्तविरचिते
गीतगौरीपतौ[3] महाकाव्ये
प्रथमसर्गः ।१

●

आयातस्येति—वसन्तवासरमहोत्साहं सान्द्रकुतूहलस्य सान्द्रं घनं कुतूहलं यस्य वसन्तदिनेषु जातमानन्दकृत्यं समालोकितुमवलोकितुम्—आयातस्य प्राप्तस्य भर्त्तुर्वसन्तस्य वसनं वस्त्रं पीतं पीतवर्णयुक्तम् । गुणवचनेभ्यो मतुपो लुगिष्टः । विधातुं कर्त्तुं रतिः काश्मीरं कुङ्कुमं कण्डितुं निकुञ्जोदरे क्रीडवती किमु । तेन तस्य काश्मीरस्य रजांसि व्याकीर्णानि त इमे परागोत्कराः परागप्रसरणानि । १२

इति टीकायां
प्रथमसर्गः ।१

●

१—मानवती ख । २— कविचक्रवर्ति ख । ३—महाकाव्ये ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयसर्गः

०

वक्षो वासपुरी[1]क्षरः सहचरो दौवारिको वेपथु-
श्चिन्तान्तःपुरचारिणी परिभवो मन्त्री धरित्री तनुः ।
भ्रान्तिः[2]सैनिकमेष कातरदृशो वाष्पोदविन्दूत्करैः,
सन्तापस्य मनोभवेन विदधे राज्याभिषेकोत्सवः ॥१

वक्ष इति—वक्षः हृदयं वासपुरी निवासस्थानं क्षरः विकलता सहचरः सेवकः वेपथुः कम्पः दौवारिकः द्वाररक्षकः । अन्तःपुरचारिणी चिन्ता परिभवः अनादरः 'अनादरः परिभवः परीभावस्तिरस्क्रियेत्यमरः' मन्त्री सचिवः धरित्री तनुः शरीरम् । भ्रान्तिः सैनिकं सेनासमुदायः एषःकातरदृशः चलितदृष्टेः वाष्पोदविन्दूत्करैः, मनोभवेन मदनेन राज्याभिषेकोत्सवः विदधे ।१

अधुना सन्तापशमनोपायमाह—

उन्मीलत्कलिका मृणाललतिका शैत्याय संयोजिता,
हारभ्रान्तिमुरीचकार हृदये तस्याः कुरङ्गीदृशः ।
स्फूर्जत्तापहुताशराशिभरितादन्तःकटाहादसू-
न् हन्तुं हन्त ! किमु स्मरेण निदधे[3] सन्देशिका राजती ॥२

उन्मीलदिति—तस्याः कुरङ्गीदृशः हृदये शैत्याय शीततामुत्पादयितुम्, क्रियार्थोपपदस्येति चतुर्थी । संयोजिता उन्मीलन्त्यो विकचाः कलिकाः कोरकाः यस्याः, मृणाललतिका कमललता हारभ्रान्तिमूरीचकार हार इवाभाति । स्फूर्जत्तापो यो हुताशोऽग्निः तस्य राशिर्निचयस्तेन भरित उद्धतः अन्तः कटाहोऽन्तःकरणरूपं तैलक्वाथपात्रं तस्मात् तस्मिन् प्रक्षिप्य ल्यब्लोपे कर्मण्यधिकरणे चेति पञ्चमी । हन्त!इति खेदे असून् प्राणान् हन्तुं नाशयितुं राजती सन्देशिका निदधे किम्वित्यन्वयः ।२

१—ज्वरः ख । २—सैन्यक्रमेण कातरदृशो ख । ३—सन्दन्तिका-ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ [१]तृतीयप्रबन्धो गुर्जरीरागेण रूपकताले गीयते—

सकुतुकसरभससविनयसस्मितविरचितबहुविधरङ्गम् ।
मुकुलितविकसितमुहुरावर्तितनर्तितनयनतरङ्गम् ॥१
प्रियसखि ! किमुरसि वहसि महेशम् ।
हिमकरकिरणकलाप[२]करञ्जित कैरवकोमलवेषम् ॥ ध्रुवपदम्

सकुतुकेति — कुतुकं कौतूहलम् । रभसो हर्षवेगयोः । रङ्गं नाट्यम् । आवर्तिता आवर्त इव चलिताः । हिमकरश्चन्द्रः तस्य किरणानां कलापकः तेन रञ्जितानि कैरवाणि सितकमलानि तैः तेषां वा कोमलो वेषो यस्य तम् ।१

शिरस्थितगङ्गोत्प्रेक्षामाह—

त्रिदशतरङ्गवतीजलमविरल[३]मुदयितलोचननीरम् ।
विततविभूतिभरादिव पाण्डुररुचि किमु [४]वदति शरीरम् ॥२

अविरलं सान्द्रम् उदयितं लोचननीरं यस्मिस्तत्कथं वितता सर्वत्राङ्गेषु प्रसारिता या विभूतिर्भस्म तस्या यो भरः मिश्रणं तस्मात् । पाण्डुरा रुचिर्यस्य तत् ।२

सन्तापमोहकारणे आह—

लोचनदहन[५]गहनमदीधितिमिव कलयसि सन्तापम् ।
कण्ठविषमविषसम्बन्धादिव मोहं वहसि दुरापम् ॥३

लोचनस्य तृतीयलोचनस्य यो दहनोऽग्निः तेन गहनमसह्यं अदीधिति सन्तापम्, अकिरणमज्वालमिति यावत् अन्तःस्थं सन्तापं कलयसि । कण्ठस्थं यत् विषममसह्यं विषं कालकूटं तत् सम्बन्धाद् दुरापं मोहं वहसि ।३

प्रविततविकटजटापटलच्युति[६]विलुठितहृदि शैवालम् ।
[७]प्रतिकृतिरिव हिमकिरणकलानामुदयति बालमृणालम् ॥४

प्रवितताः—स्मृताः विकटाः अस्तव्यस्ताः या जटाः तासां पटलस्य च्युतिर्यस्मिन् अतः शैवालम् । तच्छिरस्थो हिमकिरणश्चन्द्रः तस्य कलानां प्रतिकृतिः समुदयः तदेव बालमृणालम् ।४

१—रामग्रीरागेण गीयते इति ख । २—करम्बित ख । ३—उदयति-ख । ४—भवति ख । ५—गहनतम ख । ६—विलसति ख । ७—प्रकृतिः क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रसरति तस्य च कनककणादिव विसदृशवचनमनेकम् ।
प्रचलसि निपतसि पश्यसि सचकितमुज्झसि मलयजसेकम् ॥५

तस्य शङ्करस्य कनककणात् धत्तूरबिन्दोरनेकं विसदृशं वचनं प्रसरति अत एव प्रचलसीत्यादि उन्मत्तवदाचरणम् । 'धत्तूरः कनकाह्वय' इत्यमरः ।५

[1]विहतपतिव्रतधैर्यवशादिव गणयसि रिपुमिव कामम् ।
वनमभिनन्दसि गिरिमनुविन्दसि[2] निन्दसि गृहमभिरामम् ॥६

विहतमखण्डं यत् पत्युः व्रतं तद्धैर्यवशादिव कामं रिपुमिव गणयसि । तथा च वनमभिनन्दसीत्यादि । अभिरामं सुन्दरम् ।६

हृदयगतं हरमवलोकितुमिव नमयसि [3]मुखशशिबिम्बम् ।
तदनु[4] विपह्यसि पुलकसि मुह्यसि वहसि कम्पमि[5]व लम्बम् ॥७

नहीयं शरीरविकलता तर्हि हृदयगतं अन्तः करणस्थं हरं शम्भुमवलोकितु-मिव मुखशशिबिम्बं नमयसि । तदनु दर्शनादूर्ध्वं विपह्यसि खिद्यसे पुलकसि रोमाञ्चिता भवसि लम्बमश्रान्तं कम्पं वहसीव ।७

भानुभणितमिति विजयाबहुविधकौतुककथनमुदारम् ।
[6]शमयतु सकलभुवनजनसमधिकदारुणदुरितविकारम् ॥८

उदारं मन आह्लादकारि विजया तन्नाम्नी पूर्वोक्ता दासी तस्या यद्बहु-विधमनेकोत्प्रेक्षोपेतं यत्कथनं सकलभुवनस्थानां जनानां समधिकानां दारुणानां दुरितानां पापानां विकारं शमयत्वित्यन्वयः ।८

विश्लेष[7] दहनज्वालाजाताकुलितमानसा ।
विजयामवदद् गौरी दूरीकृत्य मनस्त्रपाम् ॥३

विश्लेषेति—विश्लेषो वियोगः तेनोत्पन्नो यो दहनोऽग्निस्तज्ज्वालया जातं आकुलितं दुःखितं मनो यस्याः सा गौरी, अतएव मनस्त्रपां दूरीकृत्य बुद्धिस्थम्

१—विहितप्रतिव्रतधर्मवशादिव रिपुमिव गणयसि कामम् ख । २—गृहमभिसरसि विरामम् ख । ३—शशिमुखबिम्बम् ख । ४—स्विद्यसि ख । ५—अविलम्बम् ख । ६—शमयतु रसिकजनं सुतरामिदमनुसृतगिरिशविहारम् ख । ७—मदन क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अग्रेतनं विजयां तन्नामिकां दासीम् अवदत् ।३

आज्ञा न त्रिपुरान्तकस्य गणिता[1] देवस्मरो निन्दितो,
बन्धूनां वचनं विलङ्घितमतः पापस्य विच्छित्तये ।
देहो भूशयनव्रतं वितनुते पाथोनिवासव्रतं,
चक्षुः स्वीकुरुते मनोऽनुकुरुते तापाग्निवासव्रतम् ॥४

तदेवाह—त्रिपुरान्तकस्याज्ञा निदेशो न गणिता, देवस्मरो मदनः पक्षे देवैः स्मर्त्तुं योग्योऽपि निन्दितो वञ्चितः । बन्धूनां वचनं विलङ्घितम् अतः पापस्य विच्छित्तये पापाचरणनाशो भवत्वेतदर्थं एतदाचरणं समुत्पन्नं देहो भूशयनव्रतं शरीरं भूम्यां शयनं तदेव व्रतं नियमः । मदनाग्निसन्तप्तत्वात् चक्षुः पाथोऽधिवासव्रतं कुरुते उदकमधिवसतीत्यर्थः । तत्तो जलं स्रवति । मनः तापाग्निवासव्रतं ताप एवाग्निस्तस्मिन् वासः प्रतिष्ठाम् अनुकुरुते एतेन मदनपीडा द्योतिता ।४

●

॥[2]अथ चतुर्थप्रबन्धो गुर्जरीरागेण प्रतिमण्ठताले गीयते—

किं भवामि भणामि वा किमु ताडिता मदनेन ।
कुत्र यामि करोमि किं नु शालिता कदनेन ॥१
शिव शिव मया कुपितया निन्दितो गिरिशोऽपि । ध्रुवपदम्

मदनेन ताडिताऽहं किं भणामि वक्तुमपि न शक्यते भवामि तर्हि कथं तर्हि उत्सहामि । कुत्र यामि गच्छामि करोमि तर्हि किन्नु कदनेन मर्दनेन शालिता गलिता इत्यर्थः, अथवा पापेन युक्ता, 'कदनं मर्दपापयोरिति' मेदिनी । पश्चात्तापमाह, मया कुपितया सत्या गिरिशोऽपि निन्दितः शिव शिव इति दुःखोद्गारः ।१

किं हितं किमिवाहितं न[3] विचितं हृदयेन ।
शिक्षितं न च[4] वारितं न च वा सखीनिचयेन ॥२

एवम्भूताया मम हृदयेन मनसा हितं किम् अहितं किम् इति न विचितं हिताहितविचारोऽपि न कृतः । एवमाचरन्तीं मां प्रति सखीनिचयेन दासीजनेन न शिक्षितमेवं मा कुर्यादिति नोक्तं वारितमपि न एवं मा कुरु इत्यपि नोक्तम् ।२

१—एवम् ख । २—अथ 'आशावरीरागेण गीयते' ख । ३—विवेचितम् ख । ४—विचारितम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावयामि तदास्यमुत्तमकान्ति[1]हासभरेण ।
चन्द्रबिम्ब[2]नवोज्वलं नवचन्द्रिकानिकरेण ॥३

तदास्यं शम्भोर्मुखं, उत्तमा या कान्तिस्तद्युक्तो यो हासस्तस्य भरः, अतिशयः तेन कदा भावयामि करोमि कथं मां दृष्ट्वा शम्भुर्हासं प्राप्नोति । चन्द्रबिम्ब-नवोज्ज्वलं पूर्णिमाचन्द्र इव कान्तिमदित्यर्थः । इदमास्यविशेषणम् । नवचन्द्रिकानिकरेण नवा चासौ चन्द्रिका कौमुदी तस्या निकरो निवह इव निवहो यस्य इदमास्यविशेषणम् ।३

पाणिपद्मगतो गतो मणिरेव किं रचयामि ।
दैवदत्तमवाप्यते किमितोऽपि वा कथयामि ॥४

एष पाणिपद्मगतो हस्तप्राप्तोऽप्ययं मणिरीश्वररूपः इदानीं गतः तं पुनरानयामि, अथवा इतः अद्य पश्चात् दैवदत्तमवाप्यते इति कथयामि ।४

कानने भवने महीधरमण्डले विचरामि ।
तस्य विश्वविलक्षणस्य न साम्यमाकलयामि ॥५

कानने अरण्ये 'गहनं काननं वन' मित्यमरः । भवने गृहे महीधरमण्डले पर्वतप्रान्ते विचरामि अटामि । परं विश्वविलक्षणस्य विश्वतो विलक्षणः विश्वेषु न विद्यते लक्षणं चिह्नं यस्येत्यर्थः, तस्य शङ्करस्य साम्यं सादृश्यं न आकलयामि न पश्यामि विश्वविलक्षणत्वादित्यर्थः ।५

[3]वारितो दयितो वचो न कृतं[4] सखीनिवहस्य ।
युक्तमेव ततो यतो मम यातना हृदयस्य ॥६

यतः यस्मात् दयितः पतिः शङ्करः वारितःनिषेधीकृतः सखीनिवहस्य सखीनां निवहः दासीनां समूहस्तस्य वचो 'मा वारयागतं शङ्करमिति भाषणं" न कृतं तदनुसृत्य नाचरितमित्यर्थः । ततः तस्मात् मम हृदयस्य मनसः यातना दुःखमिति युक्तमेव, उक्तञ्च-भारविणा—'हितान्न यः संशृणुते स किं प्रभुः' इति ।६

१—हास्यभरेण ख । २— मिवोज्ज्वलम् ख । ३—वारितं दयितं ख । ४–सखीनिचयस्य ख । गीतदृष्ट्याऽयमेव पाठः समीचीनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तारकीयति चन्द्रशेखर एष नेत्रयुगस्य ।
केसरीयति शङ्करो मम चित्तवारिरुहस्य ॥७

एष हृत्स्थोऽयं चन्द्रशेखरः चन्द्रः शेखरे मौलौ यस्य एवं भूतोऽयं शङ्करः मम नेत्रयुगलस्य नेत्रयोः 'कर्मणि षष्ठी' तारकीयति चञ्चलयतीत्यर्थः चित्तवारिरुहस्य चित्तमेव वारिरुहं कमलं तं प्रति केसरीयति केसरयुक्तं करोति व्याप्नोतीत्यर्थः ।७

भानुकोविद एष गोचर[१] मातनोतु चिराय ।
शैलराजसुता निवेदनमस्तु लोकहिताय ॥८

एष भानुकोविदः पण्डितो भानुदत्तः चिरकालं गोचरं गवि मन इन्द्रिये चरति यथा तथा आतनोतु विस्तारयतु । इदं शैलराजस्य हिमवतः सुता पुत्रीयं पार्वती तस्या निवेदनमुक्तं लोकहिताय लोकस्य जनस्य हितं कल्याणं तत् कर्त्तुं 'क्रियार्थोपपदस्येति' चतुर्थी । अस्तु भवतु गिरिशः शङ्करः केनाऽपि कदाऽपि न निन्दनीय इत्यर्थः ।८

इदानीं तत्कालीनस्वकीयरागमुद्रां दर्शयन् अवयवशो निर्भत्सयति —

अकरोः किमु नेत्र ! शोणिमानं,
किमकार्षीः [२]कर ! पद्मया निरोधम् ।
कलहं किमधाः क्रुधा रसज्ञे !,
हितमर्थं न विदन्ति[३] दैवदुष्टाः ॥५

अकरोरिति—हे नेत्र ! चक्षुः शोणिमानं रक्तिमानं किमकरोः कृतवानसि । हे कर! त्वमपि पद्मया स्वकीयतेजोलक्ष्म्या निरोधं विघ्नं किमकार्षीः कृतवान् । रसज्ञे ! जिह्वे 'रसज्ञा रसना जिह्वे' त्यमरः' क्रुधा क्रोधेन कलहं विसंवादं किम् अधाः, अकरोः । 'डुधाञ् धारणपोषणयोः' । अत्र किमु वक्तव्यं हि यतः दैवदुष्टाः विपरीतदैवव्याप्ता हितं हितकारिणम्, अर्थं न विदन्ति न जानन्ति ।५

१—आतनोति ख । २—कर पद्मतः ख । ३—दैवदह्याः ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अहो ! पन्थानमुत्सृज्य विपथे पदमर्पयन् ।
हृदीश्वरो हृदि स्थित्वा हृदयं न निरुद्धवान् ॥६

इति [1]श्रीकविभानुदत्तविरचिते गीतगौरीपतौ
[2]महाकाव्ये कलहनिवेदन्नाम
द्वितीयसर्गः ।२

●

अहो ! इत्याश्चर्ये पन्थानं न्यायरीतिं त्यक्त्वा विपथे अमार्गे अन्याय्ये पदमर्पयन् वर्तनं कुर्वन्नपि हृदीश्वरो हृदि स्थित्वाऽपि नहि तावद् बहिर्वर्तते । हृदयं न निरुद्धवान् न शिक्षितवान् इदं बह्वाश्चर्यम् ।६

इति टीकायां
द्वितीयसर्गः ।२

●
●
●

१—श्रीभानुदत्त क । २—काव्ये क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयसर्गः

•

इदानीं मदनपीडां वक्ति—

प्रियसखि ! सुधांशुवर्ती नाऽयं पङ्कः कलङ्को वा ।
सिंहासनोपविष्टो जलधरकान्तिः कृतान्तोऽयम् ॥१

हे प्रियसखि ! अयं सुधांशुवर्ती सुधा एव अंशवः किरणा यस्य स तथोक्तस्तस्मिन् वर्तते वर्तनशीलः सः अयं कलङ्को न वा पङ्कोऽपि न । किन्तु अयं सिंहासनोपविष्टः सिंहासने चन्द्ररूपे उपविष्टः स्थितः जलधरकान्तिः जलधरस्य मेघस्य कान्तिरिव कान्तिर्यस्य एतादृशः अयं कृतान्तः मनस्तापकरत्वादित्यर्थः । त्रासदायित्वादियमुत्प्रेक्षा ।१

इदमर्थयामि केवलमालि ! मृणाली निवार्यतामुरसः ।
यदियं विरहहुताशध्मापनतालीधियं धत्ते ॥ २

हे आलि ! सखि ! इदं केवलं इदमेव अर्थयामि प्रार्थये किं तत् उरसः हृदयतः इयं मृणाली बिसं निवार्यतां निवारणं क्रियताम् । यद् यस्मात् कारणात् इयं मृणाली हुताशोऽग्निः तस्य ध्मापने ज्वालने ताली तालव्यजनमिति धीः बुद्धिस्तां धत्ते उत्पादयति । अनया तावदधिकस्तापो भवतीतीयमुरसो निवार्यतामिति भावः ।२

•

[1]अथ पञ्चमप्रबन्धो वसन्तरागेण रूपकताले गीयते—

इदानीं पश्चात्तापेन चित्तं बोधयति—

रतिरस[2]विकलितमणिमयनूपुरयुगलतरङ्गिततालम् ।
फणिपतिविततफणावलिपरिहृतमणिगणविरचितमालम् ॥१

१—'धनाश्रीरागेण गीयते' एतावान्नंशोऽस्ति ख । २—विगलित ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सायं समयविहितनटवेषम् ।
चेतो मम [१]चिन्तय हि महेशम् ।। ध्रुवपदम्

रतीति—हे मम चेतः ! मदीयान्तःकरण ! महेशं चिन्तय हि यतः सायं समये सन्ध्याकाले विहितो धृतो नटवेषो येन, कथम्भूतं रतिरसेत्यादि—रतिः प्रेम तस्य रसस्तेन विशेषेण कलितं विदितं शब्दितं वा यन्मणिमयं हीरकादियुक्तं नूपुर-युगलं मञ्जीरयुग्मं हि तेन तरङ्गितः उल्लसितस्तालो गानकालोन्मानं येन स तथोक्तस्तं । 'रतिः स्त्री स्मरदारेषु रागे सुरतगुह्ययोः' इति मेदिनी । 'कलितं विदिताप्तयोरिति' नानार्थंस्त्रिकाण्डशेषस्य । 'मञ्जीरो नूपुरोऽस्त्रियामित्यमरः' । 'तालःकालक्रियामानमिति' च । फणिपतीति—फणिपतिर्नागः तेन या वितता प्रसारिता फणावलिः फणापरम्परा तया परिहृता परिगृहीता समन्ताद् व्याप्ता वा मणिगणेन विरचिता माला येन यस्मिन् वा तम् ।१

हिमरुचिरुचिचयचन्दनचित्रितदेहमुरीकृतरङ्गम् ।
ललितललाटविलोचनदीधितिकेशरसमुदयदङ्गम् ।।२

हिमरुचीति—हिमरुचिः शीतरश्मिः चन्द्रस्तस्य रुचेः कान्त्याः ज्योत्स्ना-याश्च यः चन्दनं तस्याङ्गरागः ताभ्यां चित्रितः देहो यस्यैतादृशस्तम् । पुनः कथम्भूतं महेशं ऊरीकृतरङ्गम् ऊरीकृतः स्वीकृतः 'ऊर्यादिच्विडाचश्चेति' गति संज्ञायां 'कुगतिप्रादयः' इति समासः । 'ऊरीकृतमुररीकृतमित्यमरश्च' । रङ्गः नृत्यं येन तं नृत्यकारिणमित्यर्थः । 'नृत्ये रणे खले रागे रङ्गःक्लीवे त्रपुण्य-पीति' त्रिकाण्डशेषः । पुनः कथम्भूतं ललितेति—ललितं शोभायमानं यल्ललाटं भालं तत्र या विलोचनस्य तृतीयनेत्रस्य दीधितिः कान्तिः तस्या ये केशराः छटाः तैः सम्यक् उदयत् शोभायमानमङ्गं शरीरं यस्य स तम् । 'भानुः करो मरीचिः स्त्रीपुंसयोर्दीधितिः' स्त्रियामित्यमरः ।२

तिलकिततुहिनकरं करकिसलयवलयितपन्नगनाथम् ।
[२]प्रविचललोचनचटुलचित्तरुचिविरचितदीपसनाथम् ।।३

तिलकितेति—तिलकितः तिलकः सञ्जातो यस्मात् तत् स्थानापन्न इत्यर्थः तुहिनकरश्चन्द्रो यस्य तम् । करकिसलयं करः हस्तः किसलयमिव

१—चिन्तयति ख । २—प्रचलविलोचन ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शाखाग्रपर्वमिव तत्र वलयितः कटकस्थानापन्नः पन्नगनाथः शेषो यस्य तम्। 'पल्लवोऽस्त्री किसलयमित्यमरः'। प्रविचलश्चञ्चलः लोचनः तेन चटुला या चित्तवृत्तिः तया विरचितो यो दीपस्तेन सनाथं युक्तम्। ३

अञ्जलिविगलितवकुलकुसुमचयविरचितताराभासम्।
सचकितनयनमदाननदर्शनविहितविपुलपरिहासम् ॥४

अञ्जल्याः हस्तसम्पुटतो विगलितो यः वकुलकुसुमचयः बकुलपुष्पसमुदायः तेन विरचितः कृतस्ताराभासः, इमाः ताराः किमु इत्याभासो यस्य तम्। सचकिते नयने यस्मिन्नेतादृशं यन्मदाननं तद्दर्शनेन विहितः कृतः विपुलः अतिशयेन परिहासः नर्मभाषणं येन तम्।४

केलिनिकेतननिपतितमौक्तिकयोजितघर्घरघोषम्।
नन्दितनन्दिमधुरमुरजध्वनिविहितहृदयपरितोषम् ॥५

केलिनिकेतनं क्रीडास्थानं तत्र निपतितानि यानि मौक्तिकानि तेन योजितः कृतः घर्घर इति घोषो यस्य तम्। नन्दितः आनन्दयुक्तः नन्दी वृषः तेन मधुरो यो मुरजध्वनिर्मृदङ्गध्वनिस्तेन विहितः हृदयपरितोषः यस्य तम्।५

समधिकनर्तितगलितगजाजिनपरिणतजलदविकारम्।
[1]भ्रमितरविततजटापटलद्युतिदर्शिततडिदाकारम् ॥६

समधिकमतिशयेन यन्नर्तितं नर्तनं तेन यद्गलिता गजकृत्तिः तेन परिणतः दर्शितः जलदविकारः येन तम्। भ्रमितरेण नर्तनवेलायां भ्रमणेन वितता प्रसृता या जटास्तासां पटलं समुदायः तस्य द्युतिः कान्तिः तया दर्शितः विद्युदाकारो येन तम्।६

सुरतटिनी[2]जलकमलदलस्रजमुदितहरिणतनु[3]चीरम्।
फणिपतिचपलफणाव्यजनाऽनिलशीतलसकलशरीरम् ॥७

सुरतटिनी देवनदी भागीरथी तस्या यज्जलं तत्रत्यानि यानि कमलानि तेषां दलानां या स्रजा माला 'आपञ्चैव हलन्तानामिति' भागुरिमतेनाप्। तेन मुदितं सुगन्धयुक्तं हरिणतनुचीरं हरिणाजिनं यस्य तम्। फणिपतिर्नागस्तस्य

१—भ्रमिभर ख। २—नव ख। ३—नीरम् ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

याः फणास्ता एव व्यजनानि तेषां योऽनिलो वायुस्तेन शीतलं सकलं शरीरं यस्य तम् ।७

[१]भानुभणितमिति पुरहरनर्तन[२]निनदितममृतसमानम् ।
जनयतु निखिलभुवनजनचेतसि बहुविधसुखसन्तानम् ।।८

भान्विति—इति एवं भानुभणितं भानुदत्तकविनोक्तं पुरहरनर्तनं अमृतसमानममृतमिवानन्ददायकं पुरहरनर्तनं शङ्करनर्तनं निखिलभुवनजनचेतसि सर्वजनानामन्तःकरणे बहुविधसुखसन्तानम् अनेकप्रकारसुखसमुदायं जनयतु उत्पादयतु ।८

इदानीं प्रेम्णो जीवतोऽप्यतिशायित्वं कथयति –

जीवेन तुलितं प्रेम सखि ! मूढेन [३]वेधसा ।
लघुर्जीवो ययौ कण्ठं गुरु प्रेम हृदि स्थितम् ।।३

सखि ! मूढेन प्रेमयोग्यताऽज्ञातेन वेधसा ब्रह्मणा जीवेन साकं प्रेम तुलितं तुलना कृता तत्र गुरु प्रेम हृदि स्थितं लघुःजीवः कण्ठमागतः । गतेऽपि जीवे प्रेम न नश्यतीति भावः ।३

पुनः प्रेम्णो ब्रह्मत्वमाह—

स्वप्रकाशमनिर्वाच्यमात्मद्वैतनिवर्तकम् ।
विकल्पातीतमानन्दं[४] प्रेमैव ब्रह्मकेवलम् ।।४

स्वप्रकाशमिति—स्वप्रकाशम् आत्मप्रकाशम् आत्मनः प्रकाशम् अनिर्वाच्यं ब्रह्मपक्षे 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेत्युक्तं' ईक्षतेर्नाशब्दमित्यत्र । अनिर्वाच्यं वक्तुमशक्यमित्यर्थः । आत्मद्वैतनिवर्तकं जीवब्रह्मणोर्भेदाभावकारि तथैवेदम्, एकीकरणसमर्थं विकल्पातीतं मायातीतं संशयातिशायि, आनन्दमानन्दरूपमेवं प्रेम केवलं ब्रह्मैव । ब्रह्मप्रेमयोरभेद एवेत्यर्थः ।४

●

१—भानुविहित ख । २—निगदित ख । ३—चेतसा क । ४—प्रेम ब्रह्मैव केवलम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ षष्ठप्रबन्धो[1] गुर्जरीरागेण रूपकताले गीयते—

इदानीं वियोगमसहमाना गौरी शङ्करसङ्गमने सखीं प्रार्थयते—

अभिनवयौवनभूषितया दरतरलितलोचनतारम् ।
किञ्चिदुदञ्चितविहसितया चलदविरलपुलकविकारम् ॥१

हे सखि ! शङ्करमुदितविलासम् ।
सह सङ्गमय मया नतया रतिकौतुकदर्शितहासम् ॥ ध्रुवपदम्

अभिनवेति—हे सखि ! नतया नम्रया, आगते शङ्करे नहि तावत् किञ्चिदपि तदपमानकं वदामीत्यर्थः । विलासोत्पत्तौ हेतुगर्भं विशेषणम् । मया सह उदितः प्राप्तः विलासः यमेतादृशम् । रत्यै कौतुकेन दर्शितो हासः यं सः तम् । शङ्करं शिवं सङ्गमय सङ्गमनं कुरु । कथम्भूतया मया अभिनवयौवनभूषितया अभिनवं नवं च तत् यौवनं तारुण्यं च तथोक्तं तेन भूषिता शोभमाना एतादृशया कथम्भूतं शङ्करं दरं किञ्चित् तरलिताः चञ्चलाः लोचनानां ताराः यस्यैतादृशम् । प्रत्येकं पादे पार्वतीविशेषणं शङ्करविशेषणे हेतुरिति ज्ञेयम् । पुनः कथम्भूतया मया किञ्चिदुदञ्चितविहसितया किञ्चित्, उदञ्चितम्, उत्कं यथा स्यात्तथा विहसितं हसितं यस्या एतादृशया । पुनः कथम्भूतं शङ्करम्, चलदविरलपुलकविकारम् । चलंश्चञ्चलः अनवधिः, पुलकानां विकारःयस्मिंस्तम् ।१

भुजगविभूषण[2]भूषितया कृतबहुविध[3]चाटुविलापम् ।
हिमकरकिरणविलज्जितया मधुमधुरिमलसदभिलाषम् ॥२

पुनः कथम्भूतया मया । भुजगा एव विभूषणानि अलङ्काराः तैः भूषिता शोभमाना एतादृशा तया । पुनः कथम्भूतम् शङ्करं विरचितश्चाटुविलापः प्रेमभाषणं येन तं । 'अस्त्री चाटुचटुश्लाघा प्रेम्णा मिथ्याभिकत्थनमित्यमरः' । विरचितचारु विलासमिति पाठे विरचितः चारुः सुन्दरः विलासो येन तम् । चाटुविलासमिति पाठे चाटु प्रेमभाषणम् तेन युक्तो विलासः क्रीडा येनैतादृशम् । पुनः कथम्भूतया मया हिमकरकिरणविलज्जितया हिमकरकिरणविलज्जिता लज्जायुक्ता तया ।

१—गुर्जरीरागेण गौडीरागेण वा गीयते ख । २—भीषितया—ख ।
३—चाटुकलापम्—ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कथम्भूतं शङ्करं मधुमधुरिमलसदभिलापम् मधुनः मधुरत्वम् मधुमधुरिमामधुमधुरिमवत् लसत् शोभायमानोऽभिलापो भाषणं यस्य स तम् । शेषं पूर्ववत् ।२

अवनतवदनसरोरुहया हृदि समुदितमुदितमनोजम् ।
निवसनविनिहितकरतलयाऽजिनयोजितपाणिसरोजम् ॥३

अवनतेति—पुनः कथम्भूतया मया अवनतवदनसरोरुहया वदनं सरोरुहं कमलमिव वदनसरोरुहम् 'उपमानानि सामान्यवचनैः' इति समासः । अवनतं नम्रं वदनसरोरुहं मुखकमलं यस्याः सा तथोक्ता तया । कथम्भूतं शङ्करं हृदि हृदये समुदितः सम्यगुदयं प्राप्तः मुदित आनन्दयुक्तो मनोजो मदनो यस्य स तथोक्तम् । 'अमूर्धमस्तकात् स्वाङ्गादकामे इत्यलुक्' । कथम्भूतया मया—निवसनविनिहितकरतलया निवसने परिधानवस्त्रे विनिहितं स्थापितं करतलं यया सा तथोक्ता तया, कथम्भूतं शङ्करम् अजिनयोजितपाणिसरोजं अजिने परिधापितकृष्णसारचर्मणि योजितं स्थापितं पाणिसरोजं हस्तकमलं येन स तम् । अत्रैव चिरयोजितपाणिसरोजमिति दृश्यते, चिरं योजितं पाणौ हस्ते सरोजं कमलं येन स तम्, परन्तु न ह्यत्र किमपि स्वारस्यम् । चीरेति दीर्घपाठे मात्राधिक्यम् । यथारुचि ग्राह्यम् ।३

कपटकोपपटुभाषितया मुखसरसिजचुम्बनलोलम् ।
चकितविलोलविलोचनया करपरिकृतनीवीचोलम् ॥४

कथम्भूतया मया—कपटकोपपटुभाषितया कपटेन यः कोपः कपटकोपः प्रणयकोप इत्यर्थः—तेन पटु चातुर्ययुक्तं भाषितं भणितं यस्याः यया वा सा तथोक्ता तया । कथम्भूतं शङ्करं मुखसरसिजस्य मुखकमलस्य चुम्बनं मुखसरसिजचुम्बनं तस्मिंल्लोलो लम्पटः तम् । कथम्भूतया मया चकितेन विस्मितेन विलोलं चञ्चलं विलोचनं यस्यास्तया । कथम्भूतं शङ्करं करपरिकृतनीवीचोलम् कराभ्यां परिकृतौ धृतौ नीवी जघनवाससो ग्रन्थिः चोलः कञ्चुकी च येन सः तम् । 'नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससि इति' विश्वः । नीविनिचोल इत्यपि पाठो दृश्यते ।४

खरकरजक्षतकातरया स्मितविकसितरुचिमुखचन्द्रम् ।
चञ्चलकुण्डलमण्डितया चलदलकग्रहसानन्दम् ॥५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथम्भूतया मया—खरकरजक्षतकातरया खराणि तीक्ष्णानि यानि करजानि नखानि तथोक्तानि तैर्यानि क्षतानि रोपणानि खरकरजक्षतानि तेभ्यः कातरा भीता तया। कथम्भूतं शङ्करं स्मितविकसितरुचिमुखचन्द्रम् स्मितेन हास्येन विकसिता प्रफुल्ला रुचिर्यस्य स तथोक्तो मुखचन्द्रो यस्य सः तम्। पुनः कथम्भूतया मया चञ्चले चलिते ये कुण्डले ताभ्यां मण्डिता भूषिता तया। कथम्भूतं शङ्करं चलदलकग्रहसानन्दम् चलञ्चञ्चलः यः अलकग्रहः केशावगुण्ठनं यस्य स चासौ सानन्दः आनन्देन युक्तः तं तथोक्तम्। चलन्तश्च ये अलकाः केशास्तेषां ग्रहणं तेन सानन्दः, आनन्देन सहितस्तं वा।५

[1]चलितकपोलकलास्वनयाऽधरनिहिताधरमनुवेलम्।
सिञ्जितरञ्जितनूपुरया कृतभुजयुगबन्धनखेलम्॥६

चलितेति—कथम्भूतया मया चलितकपोलकलास्वनया चलितौ कपोलौ गण्डौ कलास्वनश्च गायनस्वरश्च यस्या सा तया तथोक्तया। पुनः कथम्भूतं शङ्करम्, अनुवेलं पुनः पुनः। अधरे अधरोष्ठे निहितोऽधरो येन, चुम्बितुमित्यर्थः। सिञ्जिते शब्दिते रञ्जिते नूपुरे पादालङ्कारे क्षुद्रघण्टिके यस्याः तया कथम्भूतं शङ्करं कृतभुजयुगबन्धनखेलम् कृतो भुजयुगेन बन्धनरूपो खेलो येन तम्।६

श्रमजलसीकरशीतलया करविहितव्यजनसमीरम्।
घनतरनिःश्वसितालसया पुनराननलिप्तपटीरम्॥७

पुनः कथम्भूतया मया श्रमजलसीकरशीतलया श्रमजलं घर्मः तस्य ये सीकराः जलकणाः तैर्या शीतला शान्ता तया। पुनः कथम्भूतं शङ्करं करविहितव्यजनसमीरम्, करेण विहितो व्यजनसमीरो व्यजनवातो येन तम्। पुनः कथम्भूतया मया घनतरनिःश्वसितया घनतरम् अतीव निःश्वसितं श्वासोच्छ्वासो यस्याः तया। आनने लिप्तं घर्मनाशाय पटीरं वस्त्रं येन सः तम्।७

भानुकवेरिति गोचरितं गिरितनयावचनमुदारम्।
कलयतु कृपया कोमलया सुखसुभगमखिलसंसारम्॥८

१—कलितकपोतकलस्वनया क।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भान्विति—इत्येवं भानुकवेरुदारं वचनं गिरितनया कोमलया कृपया कलयतु जानातु। कथम्भूतं सुभगं कल्याणरूपम् अखिलसंसारम् अखिलः सम्यक् सारो यस्मिंस्तत् तथोक्तम्। अत्र ध्रुवपदं रीत्यनुसारेण पठितं ज्ञेयम्।८

आशासु तिष्ठति करोति न किन्तु गाढ-
माश्लेषमेष[1]यति तत्र सखि ! प्रतीहि।
आशङ्कते नयनयोरनयोरधीरै-
र्नीरैर्ललाटदहनोपशमं पुरारिः॥

इति श्रीभानुदत्तविरचिते
गीतगौरीपतौ[2] महाकाव्ये
[3]उत्कण्ठावर्णनं नाम
तृतीयसर्गः।३

आशास्विति—हे सखि ! पुरारिः शङ्करः आशासु दिक्षु कुत्रेत्यर्थः। तिष्ठति करोति किन्तु परञ्च गाढं यथा स्यात्तथा आश्लेषम् एषयति इच्छति किम्। तत्रैतद्विषये प्रतीहि—पश्य अनयोर्नयनयो मदीयनेत्रयोरित्यर्थः, अधीरैः सन्ततैर्नीरैरुदकैः ललाटदहनोपशमं भालाग्निशान्तिम् आशङ्कते किं सखि पश्येत्यर्थः।

इति टीकायां
तृतीयसर्गः।३

१— यदि ख। २—काव्ये क। ३—उत्कटता कथनम् ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थसर्गः

अथाऽस्मिन्सर्गे कामपीडां वक्ति सख्युपदेशश्च । इदानीं चेतश्चाञ्चल्यान्मदन-बाधनाच्च सुखकारिवस्तुनो वैपरीत्यं चेतो दीनत्वञ्चाह—

आकाशे भ्रमरा भ्रमन्ति शबराः पुष्पस्रजो वागुराः,
कुञ्जे किंशुककोरके हितवहः पापर्द्धिकारः स्मरः ।
जालं दिक्षु सुधांशुकान्तिनिकरः श्येनो वसन्तानिलः,
श्वेतो मे हरिणः क्व गच्छतु यतः सर्वत्र वामो विधिः ॥१

आकाशे इमे भ्रमराः भृङ्गाः भ्रमन्ति ते शबराःनाम भिल्लाः मृगयोपजीविनो मनुष्याः । पुष्पस्रजा पुष्पाणां मालाः वागुराः जालानि । किंशुकानां कोरकाणि कलिका यस्मिंस्तस्मिन् किंशुकव्याप्ते इत्यर्थः । कुञ्जे लतावृक्षादिव्याप्ते देशे 'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे' इत्यमरः । पापर्द्धिकारः पापस्य ऋद्धि-र्वृद्धिः पापर्द्धिः मृगया अन्यप्राणिपीडाकारित्वात् तत्करोति तथा मृगयाकार्य-ग्रेसर इत्यर्थः । स्मरो मदनः दिक्षु दिशासु सुधांशुकान्तिनिकरः सुधांशु-श्चन्द्रस्तस्य कान्तिश्चन्द्रिका तन्निकरः समुदयः तज्जालम् । वसन्तानिलः श्येनः श्येनपक्षी एवं मृगयासामग्र्यां सत्यां मे चेतः मनः तदेव हरिणः क्व कुत्र स्थले गच्छतु गच्छेत् तस्य गमने स्थलमपि नेत्यर्थः यतो यस्मात् सर्वत्र वामो विपरीतो विधिः दैवम् । 'वामो वल्गुप्रतीपौ द्वावित्यमरः' । प्रतीपो विपरीतः । 'विधि-र्विधाने दैवेऽपि च' ।१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[१]अथ सप्तमप्रबन्धो गुणकरीरागेण रूपकताले गीयते—

पुनश्च वैपरीत्यमाह—

कलितकलङ्कममृतकरबिम्बम् ।
रचयति विपधटरुचिमविलम्बम् ॥१
मधुमधुरे किमु करवाणि विधौ विधुरे । ध्रुवपदम्

कलितेति— कलितो व्याप्तः प्रकाशाधिक्यादद्दश्य इत्यर्थः कलङ्को हरिणचिह्नं यस्य तम् । अमृतकरविम्बम् अमृतकरश्चन्द्रस्तस्य बिम्वं मण्डलम् 'विधुः सुधांशुः शुभ्रांशु इत्यमरः' । 'विम्बोऽस्त्री मण्डलं त्रिपु' इति च । मधुना वसन्तेन मधुरे आनन्दप्रदे कालेऽपि इति शेपः विधौ दैवे विधुरे वैपरीत्ये सति किमु करवाणि कर्त्तव्यं न स्मरतीत्यर्थः कृतेऽपि न फलतीति यावत् ।१

अङ्गारकभरितेव हसन्ती ।
[२]विकसदशोकलता विहसन्ती ॥२

अङ्गारकेति—अङ्गारकः लताविशेपः पिवला कोरण्टा तेन भरिता युक्ता हसन्तीव हास्ययुक्ता किमु । तत्रापि विकसन्ती प्रफुल्लिता चासावशोकलता च कथम्भूता विहसन्ती विशेपेण हास्ययुक्ता । अथवा विकसदशोकलतया हसन्ती वनराजिरिति शेपः ।२

प्रसरति [३]केसरकुसुमजधूली ।
किमु यमकासरखुरपुटधूली ॥३

प्रसरतीति—केसरैर्युक्ता या कुसुमजधूलिः कुसुमरजांसि प्रसरति सर्वत्र व्याप्नोति । सा यमस्य अन्तकस्य कासरो महिषः । 'लुलायो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः । तस्य यानि खुरपुटानि तत्सम्वन्धिनी धूलिः किमु ।३

१—वसन्तरागेण गीयते एतावन्मात्रमस्ति ख पुस्तके । २—विकचद् ख । ३—केतक—ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथयति मदनमहीपतिघाटी ।
अभिनवविकसितकिंशुकवाटी ॥४

प्रथयतीति—मदनमहीपतिः मदनराजस्तस्य घाटी रीतिः । कथम्भूतम् अभिनवं नूतनं विकसिताः किंशुकाः पलाशाः तद्युक्ता वाट्यो गृहा उद्यानानि वा यस्याम् । एवम्भूता 'वाटी वास्तौ गृहोद्यानकट्यो' रिति हैमः ।४

रिपुरिव मरुदपि चन्दनसङ्गी ।
यमपुञ्जीमिव [1]पुष्यति भृङ्गी ॥५

रिपुरिवेति—चन्दनसङ्गी चन्दनपरागयुक्तोऽपीत्यर्थः । मरुन् वायुः रिपुरिव शत्रुः किमु ? भृङ्गयुक्तः सन् यमपुञ्जीं यमसाहित्यं पुष्यति पुष्णातीत्यर्थः ।५

[2]अश्रु च वैतरणी किमुदारा ।
केतकमुदयति कण्टकधारा ॥६

अश्रु चेति—च परम् अश्रु नेत्रोदकम्, उदारा भव्या वैतरणी एतन्नाम्नी यमसदनमार्गस्था नदी किमु । केतकं केतकपर्णं कण्टकधारा कण्टकतैक्ष्ण्यम्, उदयति करोति ।६

सैकतमुष्ण[3]मिन्दुकरजालम् ।
शिव शिव सकलमिहैव करालम् ॥७

सैकतेति—इन्दुकरजालं चन्द्रिकाजालमुष्णं सैकतं सिकतामयं स्थलमिव शिव शिवेति खेदे, इह सकलमेव करालं भयङ्करम् 'करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवदिति' मेदिनी ।७

भानुभणितमिति विगुणमनोजा ।
वहतु शुभं मे शैलतनूजा ॥८

भान्विति—भानुभणितं भानुकविनोक्तं विगुणमनोजा विगुणः वृद्धो मनोजो

१—घुष्यति ख । २—कुङ्कुम ख । ३—इदं करवालम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मदनो यस्याः सा तथोक्ता शैलतनूजा हिमवत्कन्या पार्वती मे शुभं यथा स्यात्तथा वहतु धारयतु ।८

स्नेहा इव वर्द्धन्ते प्रियसखि ! वासन्तिका [1]वासाः ।
प्रसरन्ति हन्त ! [2]पापा इव[3] तव माकन्दपरिमल [4]विकासाः ॥३

हे प्रियसखि ! वासन्तिका वसन्तऋतुभवाः वासाः स्थितिः स्नेहा इव तैलमिव वर्द्धन्ते । हन्त ! इति खेदे, तव पापाः दुष्टाः दुःखदायिन इत्यर्थः । माकन्दपरिमलविकासाः माकन्दानां माकन्दपुष्पाणां 'पुष्पमूलेषु बहुलमिति लुक्' परिमलः तस्य विकासाः सर्वत्र विकसनानि प्रसरन्ति सर्वत्र प्रभवन्ति इत्यर्थः ।३

[5]अतिदीर्घं निश्वसतीं मनसि वहन्तीं स्मरद्विषः स्मरणम् ।
चिन्ताकवलितहृदया पुनरपि विजया नगात्मजामूचे ॥४

अतिदीर्घं निश्वसतीम्, अतीवश्वासोच्छ्वासं कुर्वन्तीं मनसि अन्तःकरणे स्मरद्विषः शङ्करस्य स्मरणं ध्यानं वहन्तीं धारयन्तीं नगात्मजां पार्वतीं पुनरपि चिन्ताकवलितहृदया चिन्ताग्रस्तान्तःकरणा विजया एतन्नाम्नी दासी ऊचे उवाच ।४

◉

अथाष्टमप्रबन्धो [6]गुणकरीरागेण रूपकताले गीयते—

तद्विजया भाषणमाह—

इयमियमालि ! मनोभवखेला ।
नियता नैव हिताऽहितवेला ॥१
[7]शैलसुते ! शैलसुते ! सीदति शम्भौ दूरगते । ध्रुवपदम्

१—दिवसाः ख । २—तापा ख । ३—नव ख । ४—विकाराः ख । ५—दीर्घं विनिश्वसन्ती, मनसि वहन्ती ख । ६—वराडीरागेण इतिमात्रम् ख । ७—शैलसुते ! सीदति शम्भौ दूरगते ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इयमिति—हे आलि ! सखि ! पार्वति ! मनोभवखेला मनोभवस्य मदनस्य खेला क्रीडा यस्यां सा। इयमिदानींतना हिताहितवेला हितमाहितमिव यस्यामेवं भासते तादृशी नियता नियमावस्थायिनी नैव न विद्यते। अत्र हेतुमाह हे शैल-सुते ! हे पार्वति ! मदनव्याप्तत्वात् पुनः सम्बोधयति हे शैलसुते ! शम्भौ दूरगते सीदति सर्वमेव सादयति। षद्लृ विसरणगत्यवसादनेषु वर्तमाने लट् 'प्राघ्राध्मा' इत्यादिना सीदादेशः।१

कुत्र न भवति मदनशरपीडा।
किन्तु न [1]रमति मनसिजव्रीडा॥२

कुत्रेति—मदनशरपीडा मदनस्य शराणां पीडा कुत्र कस्मिन् स्थले न अपि तु सर्वत्रापीत्यर्थः। किन्तु परश्च मनसिजव्रीडा मदनादुत्पन्ना व्रीडा न रमति न रमयति शेषं पूर्वमेव।२

शम्भौ दूरगते तत्प्राप्त्युपायमाह—

विरचय पुरहरनामस्मरणम्।
तेन विना नहि सङ्कटतरणम्॥३

हे शैलसुते ! पार्वति ! पुरहरस्य शङ्करस्य नामानि तेषां स्मरणं आध्यानं विरचय कुर्वित्यर्थः। अत्रायं हेतुः तेन विना, नामस्मरणं विना 'पृथक्विना नानाभिः तृतीयाऽन्यतरस्यामिति' तृतीया। सङ्कटतरणं दुःखतः पारगमनं सम्बाधनाश इत्यर्थः नहि न च अतोऽवश्यं तन्नामस्मरणं कुर्वित्यर्थः।३

किमिति विषीदसि विलपसि दीनम्।
त्रिजगति सकलमपि त्वदधीनम्॥४

किमिति—हे पार्वति ! किमिति केन हेतुना विषीदसि खेदयसि दीनं यथा स्यात्तथा अनाथवदित्यर्थः विलपसि भाषसे। कोऽत्रहेतुरित्यर्थः। यतः त्रिजगति

१—विरमति मनसि व्रीडा—ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वर्गमृत्युपातालेषु लोकेषु सकलमपि सर्वमपि त्वदधीनं तवाधीनं त्वत्स्वामिकमित्यर्थः विद्यते इति शेषः। परन्तु शम्भौ दुरगते सीदति, इति पूर्वोक्तमेव।४

कुपित[1]भुजङ्गभीषणभासम् ।
मुञ्चसि दर्पणमपि सत्रासम् ॥५

कुपितेति—दर्पणमपि, आदर्शोऽपि कुपितःक्रुद्धो भुजङ्गः सर्पः तद्वद् भीषणा भयङ्करी भाः कान्तिर्यस्य तत् इति ज्ञात्वा सत्रासं त्रासयुक्तं यथा स्यात्तथा मुञ्चसि त्यजसि इदमलङ्करणसहायं दर्पणं भीषणं ते भासते इत्यर्थः।५

चरणे नूपुरमपि न दधासि।
स्मरनिगडस्य [2]भियेव जहासि ॥६

चरण इति—चरणे पादयोः नूपुरं घण्टिकायुक्तोऽयमलङ्कारविशेषः तदपि न दधासि धारयसि। तत्तु स्मरनिगडस्य स्मरबद्धशृङ्खलाया इव जहासि त्यजसि 'ओहाक् त्यागे जुहोत्यादिः'।६

उरसि वहसि [3]न च विसमपि शीतम्।
मनसिज [4]भिल्लधिया किमु भीतम् ॥७

उरसीति—च परम् उरसि हृदये शीतं हिमं विसं मृणालं न वहसि न धारयसि। मनसिजो मदनः स एव भिल्लः तद्बुद्ध्या त्वया भीतं किं त्वं भीता किमित्यर्थः। कर्मणि क्तः। विसस्य भिल्लखाद्यत्वात्।७

वदति भानुरति[5]सुहृदुपदेशम्।
कुरु पतिरेष्यति विसृज क्लेशम् ॥८

वदतीति—भानुर्भानुदत्तः, अतिसुहृदोऽतिमित्रस्योपदेशं वदति तथा कुरु नामस्मरणं कुर्वित्यर्थः। तेन ते पतिः शिव एष्यति। अतः क्लेशं दुःखं विसृज हि। सृज् विसर्गे।८

१—भुजङ्गम ख। लयदृष्ट्या अयमेव पाठः समीचीनः। २—भयेन—ख। ३—विसगुणमपि शीतम्—ख। ४—मल्ल—ख। ५—सुहृदयदेशम्—ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नयनसलिलबिन्दुभिः स्खलद्भिःर्भवतु वपुः [1]स्मरपिच्छलं न तावत् ।
इति विकिरति [2]शैवलं शरीरे, कुसुमधनुः किमु पाण्डिमच्छलेन ॥५

इति भानुदत्तविरचिते
गीतगौरीपतौ महाकाव्ये
सख्युपदेशो नाम
चतुर्थसर्गः ।४

नयनेति—स्खलद्भिः नयनसलिलबिन्दुभिः नयनाश्रुभिः स्मरपिच्छलं स्मरदुःखव्याप्तं न भवतु मा भूत् इति । अतः हेतोः तावत् साकल्येन 'यावत्तावच्छाकल्ये' इत्यभिधानम् । शरीरे शैवलं पाण्डिमच्छलेन पाण्डुररूपेण कुसुमधनुः किमु ! विकिरति वर्षति मदनः किमु बाणं घातयति, इति तदवस्थाभूत् शीतशैवलेन पुनरधिका मदनबाधोत्पन्नेत्यर्थः ।५

सम्पूर्णोऽयं टीकायां
चतुर्थसर्गः ।४

१–तव—ख । २—सैकतं–ख । ३—ख पुस्तके महाकाव्ये सख्युपदेशो नाम इति च नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पञ्चमसर्गः

अस्मिन् सर्गे हरनाममाहात्म्यतया मदनबाधया पार्वत्याः मूर्च्छा जागृतावस्थां चाह—

[1]अविरलमधुकरवृन्दे माकन्दं वीक्ष्य नो भुवि स्खलिता ।
बाला मूर्च्छां प्राप्ता दहनज्वालाज्वलत्पदाद्यङ्गा ॥१

अविरलेति—अविरलं घनं यत् मधुकराणां भ्रमराणां वृन्दम् समुदायः तत्र अतिसान्द्रत्वादित्यर्थः । माकन्दं मधुराम्रवृक्षं नो वीक्ष्य अदृष्ट्वा स्खलिता रिङ्गिता बाला नवयौवना पार्वती ज्वालया मदनपीडया ज्वलितानि सन्तप्तानि पदाद्यङ्गानि पादाद्यवयवा एतादृशी मूर्च्छां प्राप्ता ।१

संवीक्ष्य मूर्च्छितामेतां [2]समेतां बाष्पधारया ।
अनन्तस्वान्तसन्तापप्रलापमकरोत् सखी ॥२

संवीक्ष्येति—एतां पार्वतीं बाष्पधारया अश्रुधारया समेतां युक्तां मूर्च्छितां मोहं प्राप्तां संवीक्ष्य दृष्ट्वा सखी विजया अनन्तः अगणितः स्वान्ते अन्तःकरणे सन्तापो यस्मात् एवंभूतं प्रलापम् । यद्वा अनन्तस्वान्तसन्तापा इति भिन्नं पदम् पार्वत्याः मूर्च्छनेन हेतुना अनन्तः अतिशयेन स्वान्ते मनसि सन्तापो यस्याः सा सखी प्रलापं शोकभाषणमकरोत् ।२

मैनाकोऽ[3]भूत् समजनि सुतः कन्यकाऽसौ भवानी,
तेनाऽद्वैतं जगति विदधे भूधराणामधीशः ।

१—अविरलमधुकरवृन्दं, माकन्दं वीक्ष्य विक्षुभिता ।
बाला मुमूर्च्छ दहनज्वालाजालाभितप्तेव ॥ ख पुस्तकस्थःपाठः
२—अभितः ख। ३—असौ ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]नीतः सिन्धुर्जलधिकुहरे बाष्पसिन्धौ गभीरे,
निर्भग्ना चेदहह ! [2]कठिनी चित्तवृत्तिर्विधातुः ॥३

प्रलापमाह—यस्य मैनाकः पर्वतः सुतः पुत्रोऽभूत् यतश्चासौ इयं भवानी भवस्य शिवस्य स्त्री भवानी इन्द्रवरुणभवशर्वेत्यनेनानुगागमो ङीष् च पार्वती कन्या पुत्री समजनि उत्पन्नाभूत् । दीपजनबुधपूरीत्यनेन च्लेश्चिण् तेन पुत्र्या पुत्रेण च भूधराणां पर्वतानामधीशः श्रेष्ठो हिमवान् पर्वतः जगति लोके अद्वैतं अनन्यत्वं न हि सदृशः कोऽपि संसारसुखं विदधे धारयामास । अनन्यादृश एवायम् । तस्य दुःखातिशयमित्याह तस्य एतद्दुःखेन उत्पन्ने गभीरे भव्ये बाष्पसिन्धौ अश्रुसमुद्रे जलधिकुहरे जलधेः कुहरे तस्य जलधेरेकस्मिन्कोणे कुहरशब्दस्य पर्वतगुहावाचित्वात् पुनर्जलधिशब्दग्रहणम् । सिन्धुः समुद्रो नीतः । अनेन दुःखातिशयत्वं ध्वन्यते । बाष्पजलधेरयं जलधिरंशांशोऽपि नेत्यर्थः । तत्कारणमाह विधातुर्ब्रह्मणः चित्तवृत्तिः चित्तं निर्भग्ना विपरीता चेत् कठिनी किमु भवेदिति । नियमं कर्त्तुं कोऽपि न समर्थं इत्यर्थः । अहह इति खेदे । दुःखातिशयेनार्धोक्तिः 'यद्धात्रा निजभालपट्टलिखितं कस्तन्निहन्तुं क्षमः' इत्यर्थः । ३

•

[3]अथ नवमप्रबन्धो गौडमालवरागेण प्रतिमण्ठताले गीयते—

विरचयसि सखि ! जननयनसुखखण्डनम् ।
परिहरसि धरणीवलयहृदयमण्डनम् ॥ १

हे विधे ! किमिह विहितं ।
त्रिभुवनरत्नमपहृतम् ॥ ध्रुवपदम्

पुनर्ब्रह्माणमाह-विरचयसीति—हे सखि ! पार्वति ! जननयनसुखखण्डनं जनानां अत्रत्यानां प्रजानां सुखस्य खण्डनं विरचयसि किमु । यत्त्वद्दर्शनेन जनानां सुखमभूत् तदिदानीं त्वद्गमनेन दुःखं भवेदित्यर्थः । धरणीवलयहृदयमण्डनं धरण्याः वलयं परिधिः तद्धृदयं मध्यः मध्यस्थलोकानां इत्यर्थः । तस्य मण्डनमलङ्कारस्त्वं परिहरसि नाशयसि किमु ।

१—लीनः सुनुः ख । —कठिना ख । —वराडीरागेण गीयते ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हे विधे ! ब्रह्मन् त्रिभुवनरत्नं त्रयाणां भुवनानामलङ्कारभूतेयं पार्वती अपहृतं त्रिभुवनतो नीतम् इति इह जगति किं विहितं किं कृतम् । १

हरसि मदननृपतिमौलिमुकुटभूषणम् ।
वहसि सकलसारश्रृङ्गाररसदूषणम् ।। २

हरसीति—मदननृपतिमौलिमुकुटभूषणम् मदन एव नृपती राजा तस्य मौलिमुकुटो मस्तकालङ्कारः तस्य भूषणम् इति । मुकुटेऽपि अग्रस्थानापन्नमित्यर्थः । हरसि हरणं करोषि । परञ्च सकलसारश्रृङ्गाररसदूषणं सकलेषु अत्र जगति सर्ववस्तुषु सारं मुख्यं यः श्रृङ्गारो रसः तस्य दूषणं वहसि करोषीत्यर्थः। अस्याः नाशेन श्रृङ्गारदूषणं भवेदित्यर्थः । २

[१]अपनयसि मधुपद्रुमविकच[२]मञ्जरीम् ।
विघटयसि पटुघटनकीर्तिमपि[३] सुन्दरीम् ।। ३

अपनयसीति-मधुपद्रुमविकचमञ्जरीम् मधुपैर्भ्रमरैर्युक्तो यो द्रुमो वृक्षः तस्य विकचा या मञ्जरी तां मधुपजीवनमिव यथावृक्षस्थितानां मधुपानां तन्मञ्जर्यौ जीवनं तथाऽस्माकमियमित्यर्थः । तथा च सुन्दरीं लोके सुन्दरत्वेन विश्रुतां पटुघटनं सुन्दरस्वरूपरचना तद्विषये या कीर्तिः तामपि विघटयसि त्यजसि एतत् पार्वतीस्वरूपकरणेन प्राप्तोत्तमा कीर्तिस्तन्नाशे नश्यतीति भावः ।३

[४]वर्षसि वरुणतरमितरदपहीयते ।
विलुम्पसि सकलहितमहितमुपचीयते ।। ४

वर्षसीति—वरुणतरमातटमित्यर्थः । तेनेतरत् सर्वमपहीयते नश्यति । सकलानां हितं हितकारकं विलुम्पसि नाशयसि परं त्वया अहितम् उपचीयते सङ्गृह्यते लोकाहितकरणेन तवैवाहितमित्यर्थः । ४

मदरवनिवलय मामलयमुपजायते ।
[५]मलयजलजोऽभिजनवपुषि वहनायते ।। ५

१—अपहरसि ख । २—मञ्जरी ख । ३—सुन्दरी ख । ४—वर्द्धयसि करुणरसम् ख । ५—मलयजरसोऽपि ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मरुरिति—मरुः कर्तृ मरुर्देशः निर्जलो देशविशेषः । स एवावनिवलयः पृथ्वी-भागो मरुदेशपृथ्वीभाग इत्यर्थः । आमलयं मलयमभिव्याप्य 'अव्ययमिति' समासः । उपजायते मलयसमन्तात् प्राप्त इत्यर्थः । अत्र हेतुः मलयेति मलयपर्वत-स्थानि जलानि उदकानि तद्गतो वायुरपि अभिजनवपुषि अस्मदादिलोक-शरीरेषु दहनायते दहनो ऽग्निः तद्वदाचरति । 'तत्करोति' इति 'णिच् णिचश्च' इत्यात्मनेपदम् ।५

श्रवणपुटभेद्यविरहितममृतधारया ।
[1]किं दिनं कलितमिदमवतमसमालया ।। ६

श्रवणपुटेति—अमृतधारया नायकवचनामृतभाषणेन श्रवणपुटं कर्णद्वयं तस्य भेद्यं तेन रहितं यदतीव कर्णमधुरं नायकभाषणं तन्नेदानीं कर्णं आयातीति यावत् । इदं दिनं दिवसोऽवतमसमालया अन्धकारसमूहेन 'अवसमन्धेभ्यस्तमस' इति समासान्तः । 'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः । कलितं व्याप्तम् । ६

भुवनमद्य विगतदीपमननुभूयते ।
दलितधनुरतनुनृपतिरयमपि दूयते ।। ७

भुवनमिति—अद्य अद्यतने दुःखितायां मयीत्यर्थः । भुवनं सर्वं जगत् विगतदीपमप्रकाशमित्यर्थः । न अनुभूयते मयेति शेषः । अतनुनृपतिरपि मदनोऽपि दलितधनुः त्रुटितशरासनः सर्वत्रान्धकारव्यापकत्वात् मदनशरासनसाहित्य-नाशात् विगलितधनुरित्यर्थः । दूयते परितापयति 'दूङ् परितापे' दिवादिः । ७

पद्यकर्त्ता मङ्गलेनोपसंहरति —

भानुरिति वदति काऽपि दुरितनिवारकम् ।
हरनाम [2]जपतु लघुतरसिद्धिकारकम् ।। ८

इति काऽपि नायिका सखी वा दुरितनिवारकं दृष्टाशुभनाशकं लघुतरसिद्धि-कारकमतिशयेन शीघ्रं सिद्धिकारकं जपतु मनसि ध्यायतु। 'लघुक्षिप्रमरं

१—दिनमपि कवलितम् ख । २—जप त्वम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्रुतमित्यमरः' । 'द्विवचनविभज्योपपदे तरबीयसुनौ' तदेव भानुः पद्यरूपेण वदति हरनामसम्बन्धत्वात् ।८

उक्तविस्तरं पुनराह शिखरिणीच्छन्दसा—

अगर्वो गर्वोऽभूदियमनुपमा काचिदुपमा,
गतश्रीरेव श्रीर्जगति गुणहीनो गुणगणः ।
विभूषा निर्भूषा विघटितकला मन्मथकला,
कथं [1]ध्यत्स्व स्वान्तः प्रसरति [2]तवैवापरिणतिः ।। ५

अगर्व इति—गर्वःअहङ्कारः स अगर्वःअनहङ्कारो जातः । गर्वकारिणस्तत्त्वं नष्टमित्यर्थः । काचिदुपमा चन्द्रादय उपमापदार्थाः अनुपमा अभूत् । तत्रानुपमत्वमागतं तत्र तेजस्त्वादिगुणा नष्टा इति भावः । जगति अत्र लोकेषु श्रीः गतश्रीः अतत्त्वाऽभूत् । गुणगणः ऐश्वर्यादिगुणसमूहो गुणहीनमभूत्, अतत्त्वमगात् । विभूषा विशेषेण भूषयति जनान् सा विभूषा । 'भूष अलङ्कारे' चुरादिः, 'इगुपधज्ञाप्रीकिरः कः' । भूषणानि निर्भूषणत्वमतत्त्वं प्रापेत्यर्थः । मन्मथकला पञ्चबाणा । दिवि घटितकला कलात्वरहिताऽभूत् । तर्हि हे स्वान्तः ! मनः ! 'स्वान्तं हृन्मानसं मनः' इत्यमरः तवैव अपरिणतिः उन्मत्तता प्रसरति सर्वत्र प्रभवतीत्यर्थः । एवं कथं ध्यत्स्व ध्यानं करोषि । निरङ्कुशाः कवयः ।

विपत्सिन्धुं बन्धुं विगलितजलं नेत्रयुगलम्,
सशोकं भूलोकं भुवनवलयं खेदनिचयम् ।
अनङ्गं नीरङ्गं विघटितधनं कोशभवनम्,
विधातुं किं धातस्तव हृदि न लज्जा प्रभवति ।।६

हे धातः ! विश्वकर्तः ! विपत्सिन्धुं दुःखसागरं बन्धुं शरण्यं आश्रयदातारं नेत्रयुगलं च विगलितं जलं यस्मात्तदेतादृशम् दुःखेनेत्यर्थः । भूलोकम् अत्रत्यं जनं सशोकं शोकेन युक्तम् । भुवनवलयं जगन्मण्डलं खेदनिचयं खेदस्य निचयं निचीयते- एकीभूयते, भावे क्त् । चिञ्चयने । अनङ्गं मदनं नीरङ्गं तेजोरहितम् । कोशगृहं विघटितधनं धनघटनारहितमधनमित्यर्थः । एवं विधातुं कर्त्तुं तव हृदि मनसि लज्जा त्रपा किं कथं न प्रभवति उत्पन्ना भवति ।६

१—धातः तात ख । २—तवैषा ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सखीभिः [१]श्रवसि न्यस्ते हरनामाक्षराऽमृते ।
लब्धसंवेदना तीव्रवेदना पुनरब्रवीत् ॥ ७

सखीभिः दासीभिः श्रवसि कर्णे 'श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । हरनामाक्षराऽमृते हरस्य शिवस्य नाम हरनाम तदेव अमृतं अमृतमिव वा, 'उपमानानि सामान्यवचनैः' इति समासः। न्यस्ते प्रक्षिप्ते 'असु क्षेपणे' लब्धसंवेदना लब्धा संवेदना ज्ञानं यया, विद् ज्ञाने ल्युट् । अत एव तीव्रवेदना, तीव्रा तीक्ष्णा वेदना दुःखं यस्याः सा, मूर्च्छाप्राप्तौ नहि वेदनाभासः पुनरब्रवीत् 'ब्रूञ् व्यक्तायां वाचि' लुङ् ।७

[२]न्यस्तो मणिस्त्वयि मया [३]सहजोऽनुरागः,
साक्षी मनः समजनि प्रतिभूर्मनोभूः ।
प्राण ! प्रयासि यदि तत्परिहृत्य हन्त,
क्रूरेण [४]किं निगदितं रजनीकरेण ॥ ८

प्राण ! मया सहजः स्वाभाविक अनुरागः प्रीतिः अयमेव कश्चिन्मणिरित्यवधारणा त्वयि त्वदधिकरणे विषये वा न्यस्तः स्थापितः त्वत्स्वाधीनः कृत इत्यर्थः । यदि त्वं वाञ्छसि तर्हि साक्षिणं प्रतिभुवं च वच्मि। एतद्विषये साक्षी साक्षाद् द्रष्टा मनः मनोभूः प्रतिभूः उत्तमाधमर्ण्ययोर्मध्ये यस्तिष्ठति विश्वासार्थं स प्रतिभूः लग्नकः । 'स्युर्लग्नकाः प्रतिभुवः' इत्यमरः। समजनि प्रादुरभूत् । जनी प्रादुर्भावे 'दीपजन' इत्यादिना च्लेश्चिण् । एवमपि तदनुरागो मणिः, तदित्यव्ययं तं परिहृत्य अपहारं कृत्वा यदि प्रयासि गच्छसि तर्हि । इति प्राणं भाषणेन प्रहृत्य नह्यतस्य गमनमतिस्तर्हि रजनीकरतापादेव गच्छेत् इति रजनीकरमाह-किमपि निगदितं क्रूरेण दुष्टेन रजनीकरेण चन्द्रेण किं स तु दुष्टो निर्दय इत्यर्थः । अत्र हेतौ तृतीया ज्ञेया । हन्त इति खेदे ।८

युगमिव दिवसः प्रयाति वृद्धिं,
यदि [५]च सुशाम्यति मे नयानुरागः ।
त्वयि जयति[५] यतो वधूविरोधी,
समुदयमेष्यति नैव शीतरोचिः ॥९

१—हृदये ख । २—न्यस्ते ख । ३—सहजानुरागः ख । ४— मे ख ।
५—संशाम्यति मे च नानुरागः ख । ६—ततो ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्द्रमेवाह—दिवसः युगमिव, युगं वर्षसमूहः कृतादि तद्वत् । अतिशयोक्तिः वृद्धि प्रयाति वर्द्धयति, यदि त्वयि चन्द्रे जयति वर्तमाने सति नयोऽनुरागः व्यर्था अन्याययुता प्रीतिः न शाम्यति न शमं गच्छति । अत्र हेतुः यतो यस्मात्त्वं वधूविरोधी स्त्रीविरोधशीलः समुदयम् एष्यति प्राप्स्यति । एवं शीतरोचिर्नहि त्रासदायकत्वादित्यर्थः । ९

एवं मां विरहदुःखाक्रान्तां पीडयसि तर्हि त्वामेव शपामि—

रजनिविरहतापखेदखिन्नो,
निपतसि वारिनिधौ स्वयं सुधांशो ! ।
[1]अपहृतनखरैः करैर्वधूनां,
जनयसि तापमितः किमालपामि ॥ १०

रजनीति—रजनी तव तया सहचारित्वात्तस्यां स्त्रीत्वारोपः । तस्याः विरहो वियोगः तेन यस्तापः तेन खिन्नः दैन्ययुक्तः । सुधांशो! चन्द्र! हेतुगर्भं विशेषणमेतत् । अमृतयुक्तोऽपि त्वं स्वयं समुद्रे पतसि तापशमनार्थं तदसहमानात् प्राणत्यागार्थं वा किञ्च स्त्रियोऽपि तापयुक्ता भवेयुः । इत्याह वधूनां । तव सप्तविंशतिस्त्रीणां तीक्ष्णानि नखराणि नखानि येषु तैः करैः हस्तैः पक्षे किरणैश्च तापं जनयसि । इत एतदपेक्षया अधिकं किम् आलपामि वदामीत्यर्थः । 'वद व्यक्तायां' वाचि ।

•

[2]अथ दशमप्रबन्धो गुर्जरीरागेण यतिताले गीयते—

[3]परिचितविकलितबहुवचनेन ।
वपुरतितपति न मधुपवनेन ॥ १
उपदिश मे सखि ! किमु फलयामि ॥ ध्रुवपदम्

हे सखि ! एवं सर्वतो वक्ष्यमाणप्रकारेण दुःखप्रतिकारं कथं फलयामि किमुपायं करोम्युपदिश सूचय । तद्दुःखमाह-परिचितानि तेन सह कृतानि विकलितानि विशेषेण कलितानि सम्यगुक्तानि बहूनि वचनानि येन तेन । मधुपवनेन मधुश्चासौ पवनो वायुः तेनापि वपुः शरीरमतितपति । अत्रोपायं कथयेत्याह ।

१—दवदहनखरैः ख । २ वराडीरागेण गीयते इतिमात्रम् ख ।
३—विकसितबकुलवनेन ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपदिशेत्यादि व्याख्यातम् । मधुपवनेन वसन्तऋतूद्भवेन वायुना वा तस्यापि सुखदत्वात् । एवं यदि भवेत्तर्हि अङ्गविकलत्वान्मदनो न पीडां जनयति ।१

श्रुतिरपि नैषा [१]बहुलमदेन ।
वधिरीभवति मधुपनिनदेन ॥२

एषा श्रुतिरपि कर्णोऽपि बहुलो मदो हर्षः आनन्दः यस्मिन् मधुपनिनदेन भ्रमरशब्देन न वधिरीभवति तेन कर्णावयवो नष्टो भवेत् । २

अन्धीभवति न विपुलतरेण ।
नयनं केतकिधूलिभरेण ॥ ३

तथा नयनं नेत्रं अत्र सर्वत्र जात्यैकवचनं ज्ञेयम् । केतकिधूलिभरेण केतक्याः धूलिः तस्य भरः समूहः तेन न अन्धीभवति किमु फलयामि । ३

ज्वलति न हृदयमिदं गहनेन ।
कुपितकुसुमशरदवदहनेन ॥ ४

गहनेन भयङ्करेण कुपितकुसुमशरदवदहनेन कुपितश्चासौ कुसुमशरो मदनः तस्य दवदहनः घर्षणोत्पन्नोऽग्निः तेन इदं मे हृदयं कथन्न ज्वलति । ४

मधुकरनिकरमिषेण वनानि ।
दुरितफलं किमु दधति [२]वनानि ॥ ५

मधुकरेति—मधुकरा भ्रमराः तेषां समुदायः तदेव मिषं कपटं तेन इमानि वनानि उदकानि तथा वनानि अरण्यानि दुरितफलं दुष्टफलं मदीयदुःखोत्पादनानि दधति किमु धारयन्ति किमु । उ वितर्के अत एव मयि त्रासो भवति । ५

हिमरुचि[३]रनुभवमेष दुनोति ।
हृद्यपायमिव [४]लक्ष्यं तनोति ॥ ६

एष हिमरुचिश्चन्द्रोऽनुभवं दुनोति परितापयति दुःखमुत्पादयति इत्यर्थः । तदेवाह हृदि हृदये अपायमिव यथा विश्लेषदुःखं भवेत्तथा लक्ष्यं तनोति विस्तारयति । ६

१—वहलमदेन ख । २ घनानि ख । ३—अनुलव ख । ४—हृदयपापमिव लक्ष्म ख । अर्थदृष्ट्याऽयमेव पाठः समीचीनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्र सप्तमपद्येन मङ्गलेनोपसंहारमाह—

[1]तापकृशानुरनुक्षणमेति ।
नयनजलादपि नैव बिभेति ॥ ७
सुकविभानुरिति निगदति गौरी ।
फलमचिरेण भविष्यति [2]भूरि ॥ ८

एवं गौरी निगदति, तदेव सुकविः तस्य कवित्वं प्रापयिता भानुदत्तः निगदति, गायति पद्येनेत्यर्थः । तत्पद्यं गायताम् अचिरेण झटिति भूरि बहुफलं भविष्यति । ८

एवं प्रार्थ्येदानीं मदनं शत्रुभीतिं दर्शयति—

स्मर ! विरम[3]विधेहि न प्रहारं,
मदुरसि तिष्ठति निष्ठुरो महेशः ।
पुनरपि भविता पुरेव रत्याः,
[4]परिणतिपाण्डिमपण्डितः कपोलः ॥ १२

हे स्मर ! मदन ! मदुरसि मदीयहृदये प्रहारं बाणताडनं न विधेहि मा कुरु । यदि करोषि चेत्तत्र निष्ठुरः क्रुद्धो महेशः शिवः तव शत्रुस्तिष्ठति । अस्तु नाम किं करिष्यति स इत्येतदाह—पुरेव प्रागृरीत्येव यथापूर्वं भस्मसाद् भूते त्वयि— रत्यास्तव स्त्रियाः परिणतिपाण्डिमपण्डितः परिणतिः वारं वारं नमस्कृतिः शिवस्याग्रे मे पतिजीवनं विधेहि, इति हेतोः तया करणेन पाण्डिमा पाण्डुता तत्र पण्डितः चतुर एतादृशस्ते कपोलः । जात्यैकवचनमेतत् । भविता भविष्यतीत्यर्थः ।१२

हुं ज्ञातं मया कथं शीतोऽपि मलयमारुतो मामुष्णयतीत्याह—

जानीमहे महेशस्य मूर्तिर्मलयमारुतः ।
शीतस्त्रिजगतामुष्णो मय्येव कथमन्यथा ॥ १३

मलयमारुतः—मलयस्य मलयपर्वतसम्बन्धी मारुतः वायुः त्रिजगतां त्रयाणां लोकानां शीतः मय्येव अन्यथा अशीत उष्ण इत्यर्थः कथं महेशस्य शिवस्य मूर्तिः

१—क पुस्तके इदं गीतन्नास्ति । अतोऽस्य टीकाऽपि न वर्तते । २—भूरी ख । गीतदृष्ट्याऽयमेव पाठः समीचीनः । ३—मयि धेहि ख । ५—परिणत-पाण्डिममण्डितः ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारणमिति शेषः। जानीमहे जानीमः। अथवा जानीम इतिच्छेदः हे इति सम्बोधनेऽव्ययम्, हे मनः ।१३

अथ कविर्मदनलेखोपोद्घातमाह —

वदन्ती कामलेखाय बाष्पधौतमुखी सखीम् ।
[1] पार्वती कुर्वती चिन्तामनन्तामिदमब्रवीत् ॥ १४

वदन्तीति— बाष्पधौतमुखी बाष्पैः अश्रुजलैः धौतं स्वच्छं मुखं यस्याः सा पार्वती गौरी सखीं कामलेखं मदनलेखं कर्तुम् 'क्रियार्थोपपदस्येति' चतुर्थी। वदन्ती वक्तुमुद्यता सती अनन्तां अतीवचिन्तां कथं लेखनीयः तेन कथं भवेदित्यादिप्रकारां कुर्वती सती च इदं वक्ष्यमाणम् अब्रवीत् अवोचदित्यर्थः ।१४

तदेवाह —

जानाति [2]कोऽन्वलं चेतो विरहव्याधिवेदनाम् ।
अहो मे दैववैगुण्यमेष लेखकरः करः ॥१५

हे सखि ! चेतो विरहव्याधिवेदनां विरह एव व्याधिः पीड़ा विरहव्याधिः तस्याः वेदना दुःखं तथोक्ता चेतसः विरहव्याधिवेदना सा तथोक्ता ताम्। को नु कः पुरुषोऽलं सर्वथा जानाति न जानात्येव एतादृशं कस्यापि ज्ञानं नेत्यर्थः। तर्हि एवं दुःखं मां कथं प्राप्तमित्यत आह, अहो इत्याश्चर्ये मे मम दैववैगुण्यं दैव-विगुणता प्रारब्धन्यूनता इत्यर्थः प्राक्तनपातकातिशयफलमिति यावत्। एष मे करः हस्तः लेखकरः मदनलेखकारी इति। १५

अथ सामग्रीमारोप्याह—

अर्थं वक्ति विलोचनं यदि[3] यदि श्रोत्रं पुनः स्मारकं,
देहं यद्युपदेशकारि लिखनं कुर्वीत चेतो यदि।
सन्तापस्य लिपिर्भवेदपि तदा निःश्वासवातोर्मिभिः,
[4] सामग्र्या किल तस्य सुन्दरि ! न चेद् वैयग्र्यमुत्पादयेत् ।१६

यदि च विलोचनं नेत्रद्वयम्, अर्थं वक्ति लेखार्थं च यदि श्रोत्रं कर्णः पुनः स्मारकं भवेत् यदि स्मरणं कारयति। यदि च चेतः लिखनं कुर्वीत तदा

१—पार्वतीं कुर्वतीं ख। २— केवलम् ख। ३— सदा ख। ४— सा मे आलिखनस्य ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन्तापस्य लिपिः निःश्वासवातोर्मिभिः निःश्वासपरम्पराभिः । अयं भावः विलोचनादीनां योऽयमनुभवो विद्यते तस्य तु वाह्यतया हस्तेन पत्रलेखनेन नहि सर्वं ज्ञापनं यदि साक्षादिमे लिखन्ति तर्हि ज्ञानं भवेत् कदाचिदिति । एवमपि यदि तस्य वैयग्र्यं व्यग्रतां न उत्पादयेत् उत्पन्नं भवेत् तर्हि सामग्रीसार्थकम्, अवश्यमेव । सामग्र्या व्यग्रता तु भवेदेव । १६

●

एकादशप्रवन्धो [1]'वराडिरागेण आडवताले' गीयते—

[2]विदितुमितरदितरदिच्छामि, ।
त्रिपुरवैरिवपुरेव लिखामि ॥ १
विलिखामि किमतनुपीडिता ।
[3]प्रमथमथनगुणशीलिता ॥ ध्रुवपदम्

लेखनप्रकारमाह—

विदितुमित्यादिप्रवन्धेन—इतरत् अन्यत् विदितं ज्ञातं अन्यत् द्वितीयम् इच्छामि । मनस्यानीतो लेखः परञ्च लिखामि कायचित्रम् त्रिपुरवैरिणः शिवस्य वपुः शरीरं लिखामि । लिखामीति मनसि आनीयते । अहं तावदतनुशरपीडिता अतनोरशरीरस्य मदनस्य शरेण वाणेन पीडिता । प्रमथो गणः मथनः सेना यस्य सः शिवः तस्य गुणेन शीलिता स्वीकारिता, एवं वैपरीत्यात् कथं कार्यं संघटते इति सखीं वक्ति ।१

प्रेम यदि क्व वियोगविकाराः ।
विरहो यदि न प्रीतिरुदारा ॥ २

प्रेमेति—यदि प्रेम तर्हि वियोगविकाराः वियोगजन्यं दुःखं नैव तथा यदि विरहो न तर्ह्येव उदारा प्रीतिः प्रेम ।२

विरहो जीवनमिति च विरुद्धम् ।
[4]किमपि च विलिखितुमपि सम्बद्धम् ॥३

विरहेति—विरहः जीवनं इदं विरुद्धम् । विरहो यदि भवेत् तर्हि जीवनन्न

१—गौडीयरागेण गीयते एतावन्मात्रं ख । २ विलिखितुम् ख । ३ प्रथम-। सदनगुणशीलिता, ख । ४—किमयि ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च लिखितुं सम्बद्धं किं कथं लिखामि । अयं भावः यदि विरहं लिखामि तर्हि स न सत्यं मानयति जीवनत्वादिति ।३

लपितुं कर्त्तुं यदि विज्ञानम् ।
तदपि वियोगजुषामज्ञानम् ॥ ४

लपितुमिति—'रप लप व्यक्तायां वाचि' लपितुं स्पष्टतया भाषणं कर्त्तुं कर्त्तुं कार्यं कर्त्तुं यदि विज्ञानं विशेषतया ज्ञानं विद्यते तथापि वियोगजुषां वियोगं जुषन्ति सेवन्ते वियोगजुषः 'जुषी प्रीतिसेवनयोः' तुदादिः । विरहदुःखयुक्ता इति यावत् तेषां तदपि तद्विशेषतया ज्ञानमपि अज्ञानम् विरहदुःखेन ज्ञानिनोऽपि अज्ञानिनो भवन्तीति भावः । शेषमुक्तम् । ४

अहमिति वेदनमिति पुनरुक्तम् ।
कथय कथय सखि ! किमपि न युक्तम् ॥ ५

तदेवाह—अहमितीति अहमिति अहमेवं प्रकारेण यद्वेदनं ज्ञानं तत् पुनरुक्तमेव इदं प्राक्तनमेव ज्ञायते सर्वैरितिभावः । तर्हि किमपि युक्तं न, किमपि योग्यं लिखितुं नायातीति भावः ।५

वदनं मलिनं वपुरपि विकलम् ।
जीवनशंसकमिदमपि सकलम् ॥६

वदनमिति–वदनं मुखं मलिनं मलयुक्तम् । वपुः शरीरं विकलं गलितं निरुपयोगमेव सर्वमिति भावः । इदं यद्विद्यते तत् सकलं जीवनशंसकं इयं जीवतीति ज्ञापकम् । शरीरे जीवो विद्यते नाममात्रम् न तावत् किमपि लेखनादि कर्म कर्त्तुं क्षममिति भावः ।६

समुचितमिति दयितं प्रति दयिता ।
प्रचलति पत्रारूढा लिखिता ॥ ७

समुचितमिति–दयितं नायकं प्रति लिखिता लिख्यते या सा कर्मणि क्तः दयिता स्त्री पत्रारूढा प्रचलति पत्रे स्थित्वा गच्छति किमु इति समुचितम् । यदि पत्रं लिखितं भवेत्तर्हि मे साक्षाद् गमनमिव भवेदित्यर्थः ।७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदति भानुरिति परिहर चिन्ताम् ।
अचिरादेव प्रभुरानेता[1] ॥८

भविष्यन्मङ्गलमाह—चिन्तां परिहर चिन्तां मा कुरु । प्रभुः अचिरात् झटिति आनेता प्रापयिता 'णीञ् प्रापणे' प्रापणमिह गतिः ।८

लिखितुमक्षमा यदि त्वामेव मुखतो निवेदयितुं प्रेक्ष्यामि तर्हि नैव भवेत्त्वयैतदित्याह—

तव वाचा मम प्रीत्या यदि दूति ! प्रयास्यसि ।
कथमाख्यातु सन्तापं रसनादाहशङ्कया ॥ १८

हे दूति ! सखि ! 'दूङ् परितापपरिचरणयोः' क्तः । यदि मम प्रीत्या प्रयास्यसि गमिष्यसि तर्हि तव रसना जिह्वा वाचा वाण्या दाहशङ्कया यदि वाचा मे सन्तापं कथयिष्यसि तर्हि तत् सम्बन्धेन जिह्वा प्रज्ज्वलिता भवेदिति शङ्कयेत्यर्थः सन्तापं कथमाख्यातु कथ्यताम् । 'संप्रश्ने लोट्' प्रथमपुरुषः । एतावता पत्रमेव लेखनीयमिति सिद्धम् ।१८

एवं सिद्धान्ते लेखने सिद्धे तद्विघ्नकर्तॄन् प्रार्थयते —

तात ! क्षणं ! [2]मदन ! न प्रहर प्रकामं,
मूर्च्छे ! मनाग् जननि ! दूरत एव तिष्ठ ।
भ्रातर्विमुञ्च नयनाम्बुजमम्बुपूर[3] !
वाञ्छामि यद् विलिखितुं शशिशेखराय ॥१९

इति भानुदत्तविरचिते
गीतगौरीपतौ[4] (महाकाव्ये
अनङ्गलेखो) नाम
पञ्चमसर्गः ।५

१—आगन्ता 'ख' । गीतदृष्ट्या अयमेव पाठः समीचीनः ।
२—स्मरत ख । ३- वारिपूरम् ख । ४—( ) एतत्कोष्ठान्तर्गतांशस्थले 'काव्ये' इति मात्रं क पुस्तके ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तातेति—तातेत्यादरेण सम्बुद्धिः हे तात! मदन! क्षणं क्षणपर्यन्तं 'अत्यन्तसंयोगे' द्वितीया। प्रकामं यथेच्छं मा प्रहर बाणप्रहारं मा कुरु। हे जननि! मूर्च्छे! मनाक् किञ्चित्कालपर्यन्तं दूरत एव तिष्ठ मा स्पर्शं कुरु माम्। हे! भ्रातः अम्बुपूर! अश्रुजलसमूह! नयनाम्बुजं नयनकमलं विमुञ्च। किमस्माकं प्रार्थनया इत्यत आह यत् यस्मात् शशिशेखराय शशिः चन्द्रः शेखरे यस्य सः मदनमूर्च्छा कमलानां चन्द्रस्य कारणत्वाच्छशिशेखरेति विशेषणम्। शिवः तं निवेदयितुम्। 'क्रियार्थोपपदेत्यादिना' चतुर्थी। लिखितुं पत्रमिति वाञ्छामि इच्छामि। वाछि 'इच्छायाम्' लडुत्तमः। १६

सम्पूर्णोऽयं टीकायां

पञ्चमसर्गः। ५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ठसर्गः

एवं पार्वत्याः विरहं वर्णयित्वेदानीं नायकस्य शिवस्य विरहं वर्णयति —

अथ कनकसरोरुहातपत्रो,
विकसितकेतकविस्फुरत्किरीटः ।
[1]नवकिसलयकञ्चुकोपगूढः,
शिवमशिवैर्विशिखैः स्मरो जघान ॥ १

अथ वाक्यभेदे—कनकसरोरुहातपत्रो कनकसरोरुहाणि स्वर्णकमलानि तेषां आतपत्रं तान्येवातपत्राणि वा यस्य। कनककमलेषु विकसितेषु सत्सु इत्यर्थः। विकसिता ये केतकाः तैः विस्फुरन् किरीटो मुकुटो यस्यैतादृशो नाम केतकीकुसुमेषु विकसितेषु सत्सु। नवानि च तानि किसलयानि पल्लवानि तेषां कञ्चुकः तेनोपगूढ उपगुण्ठितः स्मरः मदनः अशिवैः वा तीक्ष्णैः विशिखैर्बाणैः शिवं महादेवं जघान ताडयामास। वसन्तेषु कमलादिविकासे मदनप्रादुर्भाव इति वसन्तवर्णना। १

एवं मदनतप्ते शरीरे शीतोष्णयोस्तस्याभेदमाह—

स्कन्धाद् भ्रष्टभुजङ्गनायकधिया गृह्णन् मृणालाङ्कुरान्;
कण्ठस्रस्तहलाहलावधिधिया कर्षन् द्विरेफावलीम् ।
नेत्रप्रान्तचलायमानदहनभ्रान्त्या हरन् किंशुकं;
देवः सानुषु भूधरस्य विचरन् न क्वाऽपि लेभे रतिम् ॥२

स्कन्धादिति — देवः शङ्करः स्कन्धाद् बाहुशिरसः भ्रष्टो गलितश्चासौ भुजङ्गनायक इति धिया बुद्ध्या मृणालाङ्कुरान् विसाङ्कुरान् गृह्णन् सन् मृणालाङ्कुराणाम् अतिशीतत्वे मदनदाहार्त्तत्वात्तस्य शीतस्पर्शो नाभूत्। कण्ठस्रस्तहलाहलावधिधिया कण्ठात् स्रस्तं यद्धलाहलं विषं तस्य अवधिरन्तरं तस्या धिया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बुद्ध्या द्विरेफावलिं भ्रमरपंङ्क्तिं कर्षन् आकर्षन् । नेत्रप्रान्तपलायमानदहन-भ्रान्त्या नेत्रस्य मध्यनेत्रस्य प्रान्तो मध्यभागः ततः पलायमानोऽकस्माद्गतः स चासौ दहनो वह्निस्तस्य भ्रान्त्या भ्रमेण किंशुकं किंशुकपुष्पं 'पुष्पमूलेषु बहुलं लुक्' । हरन् सन् भूधरस्य हिमालयपर्वतस्य सानुषु शिखरेषु विचरन् सञ्चरन् क्वापि कस्मिंश्चिदपि स्थाने रतिं सुखं न लेभे न प्राप ।२

पुनश्च हर एवोत्प्रेक्षयति—

किमितरदपि वह्निलोचनं मे,
हृदि भवतीति हरौ विशङ्कमानः ।
[1]चकितवृत्तिरसौ क्षयी बभूव,
स्मरशरपावकदूयमानमन्तः ॥३

किमिति—इतरत् भालस्थितात् अन्यत् वह्निलोचनम् अग्निनेत्रं मे हृदि हृदये भवतीति विशङ्कमानः शङ्कितचित्तः मम हृदयमत्यन्तं दहतीति अग्निनेत्रोत्पत्तिर्हृदये वा इति भावः । हरः शिवः चकितवृत्तिः चकिता वृत्तिः स्थितिर्यस्य एतादृशं मनः अन्तःकरणं यस्य सः क्षयी क्षययुक्तः कृश इत्यर्थः बभूव । तथा च अन्तः अन्तःकरणं स्मरशरपावकदूयमानं स्मरस्य कामस्य शराः बाणाः तेषां हननेन य उद्भूतः पावकः तेन दूयमानं परितप्यमानं बभूव इदमप्येकं कृशीभावे कारणम् । ३

[2]उद्दामधामसन्तापधारो धीरालमानसः ।
सङ्गिनं भृङ्गिण[3] वाचमुवाच शशिशेखरः ॥४

उद्दामेति—शशिशेखरः शिवः उद्दामम् अत्युष्णम् यद्धाम तेजः तस्माद्यः सन्तापः तस्य धारा यस्य सः तादृशोऽपि धीरालमानसः मत्वर्थे आलच्छान्दसः । धैर्ययुक्तं मानसं मनः यस्य स एतादृशः सन् सङ्गिनम् अनुगं भृङ्गिणं भृङ्गिनामानं गणं वाचं भाषणमुवाच भाषयामास । ४

अथ द्वादशप्रबन्धः[4] केदाररागेण एकतालिताले गीयते । तत्रैव पार्वतीवर्णनेन प्रबन्धेनाह—

१—सचकिततरमीक्षयाम्बभूव ख । २—उद्दामकामसन्तापधाराधारालमानसः ख । ३—भृङ्गिनम् ख । ४—भूपालरागेण गीयते इतिमात्रं ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणनखावलिरध्वनि वितरति किरणसुधासन्तानम् ।
लोचनकमलं विकिरति पतिरथ कलयति [1]पदमवदातम् ॥१

मदनमहीपतिभुवनविजयकरमचलसुतातनुरूपा ।
चेतसि चित्रितमिव वनचम्पकरोचिरुचिरप्रतिरूपा ॥ ध्रुवपदम् ।

चरणेति—अतनुरूपा अतनोः मदनस्य रूपमिव रूपं यस्याः सा अतीव सुन्दररूपवती अथवा यथा मदनः अतनुरपि यथेदानीं लोकैः केवलं सुन्दरत्वेन ध्यायते, एवमिदानीं साऽदृष्टा मया चेतसि ध्यायमाना इति भावः । अथवा अतिशयार्थो नञ् अतिशयेन तनु सुन्दरं रूपं यस्या एतादृशी मदनविजय-सादृश्यात् । वनचम्पकरोचिरुचिरप्रतिरूपा वनस्य चम्पकः तस्य रोचिः दीप्तिः तस्याः इव रुचिरा सुन्दरा प्रतिरूपा प्रतिमा यस्याः सा । अचलसुता हिमाद्रिकन्या पार्वती मदनमहीपतिभुवनविजयकरं मदन एव महीपतिः कश्चिद्राजा तस्य यद् भुवनं राज्यं तस्य विजयकरं जयकारकं चेतसि हृदि ममेति शेषः । चित्रितमिव लिखितमिव अदृष्टापि मनसि विद्यते इति न विस्मरति । तदेव वर्णयति तस्याः चरणनखावलिः पादनखपङ्क्तिः अध्वनि मार्गे किरणसुधासन्तानं शीतकिरणसमुदायं वितरति विक्षेपयति । तथा लोचनकमलं नेत्रसरोरुहं पतिरत एव रतिपतिः मदनः अस्यै अवदातं गौरं पदं स्थानं कलयति विचिनोति अत एव मां प्रहारयतीत्यर्थः । [2]मध्ये द्व्यक्षर-मनर्थकम् । १

[3]ऊरुयुगं किमु [4]रम्भायुगमिव अनवरतद्युतिपूरम् ।
वहति [5]याता मकरध्वजनरपतिकीर्तिनिकरकर्पूरम् ॥२

ऊरुयुगेति—अपि तस्या ऊरुयुगं सक्थिनी रम्भायुगमिव कदलीस्तम्भ-युगमिव अनवरता सन्तताऽखण्डा द्युतिः कान्तिःतस्याः पूरं समुदायः सा पार्वती याता गच्छन्ती सती युगलेन ऊरुयुगलेन मकरध्वजो मदनः स एव नरपतिः राजा तस्य कीर्तिः तस्या निकरः स एव धवलत्वात्कर्पूरः तं वहति धारयति ।२

—१—अवदानम् ख । गीतदृष्ट्या अवदानमेव पाठः समीचीनः । २—विकिरति इत्यत्र 'विकि' इति निरर्थकम् इति भावः । ३—करयुगम् ख । ४—रम्भायुगमिदम् ख । ख पुस्तकस्थरम्भायुगमिदम् इति पाठस्वीकारेण गीते गतिभङ्गो न भवति । ५—यतो ख। ६—उपैति ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रोमराजिरपि काचिदुदञ्चति दर्शितगुणसमुदाया ।
मोहयितुं जगदखिल[1] मुपेता किमु ! मकरध्वजमाया ॥३

रोमराजिरिति—रोमराजिः लोमपङ्क्तिः दर्शितः गुणानां समुदायो यया एतादृशी सती अखिलं जगन्मोहयितुं मकरध्वजस्य मदनस्य माया प्रकृतिः उपेता किमु इति उदञ्चति विलसति । ३

मानत्रितयं प्रसरति मध्ये न प्रत्यक्षमनारम् ।
रेखात्रयमिति मदनाकृति किमु ! वहति वलित्रयभारम् ॥४

मानत्रितयमिति—मानत्रितयं प्रमाणत्रयम् प्रत्यक्षानुमानशब्देति प्रमाणत्रयमिदं मदनविषये ज्ञेयम् वायुवत्, अथवा मानश्चित्तसमुन्नतिः किमु उत्प्रेक्षायां मध्ये मध्यभागे प्रसरति तत् अनारं सुन्दरं न एतादृशमिदं रेखात्रयं मदनाकृति मदनस्य आकृतिरिव सुन्दरत्वेन आकृतिर्यस्यैतादृशं वलित्रयभारं वलीनां त्रयं तत् तस्य भारः तम् । एकैकस्या रेखाया उपरि एकैका वलिः इति वलित्रयम् । वहति धत्ते । ४

[2]कुचयुगमध्यगगनमिवापगतमालोकितमिव तारा ।
प्रविचलमुक्ताहारमिषादिव विचरति काचिदुदारा ॥५

कुचयुगेति—कुचयोर्युगस्य यो मध्यः मध्यस्थलं तदेव गगनं ताराधारः तत् अपगतं नष्टम् अवलोकितं तारयेति शेषः । अतः सा काचित् उदारा तारा प्रविचलः चञ्चलो यो हारः तस्य यन्मिषं रूपं तस्मात् इतस्ततः विचरति । यथा लोके कश्चित्प्राणी गृहाद् बहिर्गतः पुनरागतो नष्टगृहं वीक्ष्य यथा बहिरितस्ततः प्रचलति तथेति ज्ञेयम् । अनेन कुचयोः सन्निधिर्हारशोभा च ध्वनिता । ५

उपचयसमुचितमम्बरमालोकितुमिदमलसनिधानम् ।
कुचकनकाचलयुगमिदमाननमुन्नतमिव विदधानम् ॥६

उपचयेति—इदं कुचकनकाचलयुगम् कुचावेव कनकस्य सुवर्णस्याचलौ पर्वतौ तयोर्युगम् । उपचयसमुचितं वृद्धियोग्यम् । 'उपचयो वृद्धिरि' त्युणादिः । अम्बरमाकाशं द्रष्टुम् उन्नतम् आननं चूचुकं दधानं धारणकर्तृ । प्रचलति न किं अलसस्थानं अतः तत्रैव स्थित्वा उन्नतमुखमिति भावः । ६

---

[1]—उपैति ख । [2]—कुचयुगमध्यागतमिदमपगतमवलोकितुम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चूचुकयुगमतिचारुतरद्युति जयति परमकमनीयम् ।
मदननयनयुग [1]तारयुगलवरप्रतिकलयुगरमणीयम् ॥७

चूचुकेति—अतिचारुतरद्युति अतितेजोयुक्तं परमकमनीयम् अतिसुन्दरं इदं चूचुकयुगं कुचाग्रद्वयं 'चूचुकं तु कुचाग्रं स्यात्' इत्यमरः जयति सर्वोत्कर्षेण वर्तते मदनोत्पादकत्वात् तस्योपमामाह—मदनेति मदनस्य नयनयुगं नेत्रद्वयं तस्य तारे कनीनिके 'तारकाक्ष्णःकनीनिका' इत्यमरः तयोः युगलं युग्मं तदेव वरं श्रेष्ठं तस्य प्रतिकलयुगं प्रतिमाद्वयं अत एव रमणीयम् ।७

वदति भानुरिति किमितरदीधितिविधिनिरुपमनैपुण्यम् ।
पुररिपु[2]रलिनन्दितमिति किमितो भूधरतनयापुण्यम् ॥८

वदतीति—भानुः कविः इति वदति किं पुररिपुः शङ्करः इतरेषां चन्द्रादीनां दीधितयः किरणाः यस्मिन् । अत एव विधेः निरुपमं उपमारहितं नैपुण्यं निपुणता यत्र । तथा च अलिनन्दितं अलिभिः सखीभिः 'अलिः सखी सेतुरालि' इति उणादिः । नन्दितं आनन्दयुक्तं कृतम् इतः एतस्मात् भूधरस्य हिमालयस्य तनया पार्वती तस्याः पुण्यं किं किं वर्णयाम इति वदति ।८

प्रतीमः पञ्चेषोः प्रमदकरिणः पङ्कजदृशो,
महानिम्ने नाभीसरसि [3]रसकेलीं कलयतः ।
ध्रुवं रोमश्रेणीकरकुहरविक्षिप्तपयसः,
द्विधाकारां धारां विरचयति हारावलिरुचिः ॥९

प्रतीम इति—पङ्कजदृशः कमलनेत्रायाः पार्वत्याः, महानिम्ने अतिगम्भीरे नाभीसरसि नाभिरूपे सरोवरे रसकेलीं जलक्रीड़ां कलयतः कर्त्तुः सतः पञ्चेषोः प्रमदकरिणः पञ्चेषुर्मदनः स कश्चित् प्रमदकरी मत्तहस्ती तस्य रोमश्रेणी करकुहरविक्षिप्तपयसः रोम्णां लोम्नां श्रेणी पङ्क्तिः स एव करः शुण्डदण्डः तेन कुहरे निम्नभागे निक्षिप्तं यत् पयः उदकं तस्य, द्विधाकारां द्विविध आकारो यस्याः सा तां धारां हारावलिरुचिः हारस्य पङ्क्त्याः शोभां विरचयति द्योतयति इति-ध्रुवं सत्यम् ।९

१—तारायुगलप्रतिफल ख । २—अभिनन्दति ख । ३—रसकेलिम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यतस्तल्लावण्यं दरतरलपङ्केरुहदृशो,
रजो लग्नं मार्गे निपतति पदाम्भोरुहयुगात् ।
विनिर्मातुं शातक्रतवपुरपङ्केरुहमुखी-
स्तदुत्थव्यापारैरपहरति मन्ये मनसिजः ॥७

यत इति—यतः यद्यस्मात् कारणात् तल्लावण्यं तासां देवस्त्रीणां लावण्यं कस्मादत आह—मनसिजो मदनो दरतरलपङ्केरुहदृशः दरेण तरला चञ्चला दरतरला, पङ्केरुहं कमलं तदिव दृक् पङ्केरुहदृक्, दरतरला पंङ्केरुहदृक् यस्याः सा एतादृशी पार्वती तस्याः पदाम्भोरुहयुगात्, पदे अम्भोरुहे इव पदाम्भोरुहे तयोर्युगात् पदकमलद्वयात् लग्नं पदकमललग्नमित्यर्थः । रजः धूलिः मार्गे निपतति गमनसमये पतति, तत् शातक्रतवपुरपङ्केरुहमुखीः, शतक्रतोरिन्द्रस्येदं शातक्रतवं 'तस्येदम्' इत्यण् 'ओर्गुणः' । तच्च तत् पुरं नगरं अमरावती तस्य सम्बन्धिन्यः पङ्केरुहमुख्यः स्त्रियः ताः विनिर्मातुम्, अपहरति हरणं करोति इति मन्ये । यस्याः पादरजोभिः मदनेनाप्सरसां लावण्यं निर्मितम्, तस्या लावण्यं किं वर्णयामीति भावः ॥७

●

[1]अथ त्रयोदशप्रबन्धो गुर्जरीरागेण रूपकताले गीयते—

अथ प्रथमपद्येन वाणीं वर्णयति—

इन्दुरखण्डसुधाभिरसृज्यत[2] वचनमनेकविलासम् ।
तस्य कणाः पतिता इव विदधति मुक्ताभूषणभासम् ॥१
कथयामि कथं गिरिजादेहविधानम् ।
कनककल्पतरुविफलितकोरककोमल[3] किरणवितानम् ॥ ध्रुवपदम्

इन्दुरिति—अस्याः इति शेषः । पार्वत्याः अखण्डसुधाभिः सुधाया अखण्डधाराभिः, अनेकविलासं अनेकाः विलासाः भाषणक्रीडाः यस्मिन् एतादृशं वचनम्, असृज्यत, उत्पन्नं कृतवान् । तत्र हेतुमाह—अमृतस्य वाचा निर्माणसमये तस्य अमृतस्य कणाः पतिताः । त एव अस्याः कण्ठे मुक्ताभूषणभासं—मुक्तानां यानि भूषणानि तेषां भासं शोभाम् विदधति, धारयन्ति । एवं विद्यमानं कनकस्य

१—गुर्जरीरागेण केदाररागेण वा गीयते इति ख । २—खपुस्तके तव इत्यधिकः । ३—रेणु ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुवर्णस्य यः कल्पतरुः कल्पवृक्षः तस्य विफलिताः फलरहिता। नूतना इत्यर्थः कोरकाः कलिकाः तेषामिव कोमलानां आनन्ददातॄणां किरणानां वितानानि समूहाः यस्मिन् एतादृशम् । गिरिजादेहविधानं—गिरिजायाः पार्वत्याः देहः तस्य विधानं विधिकरणपद्धतिमित्यर्थः । कथं केन प्रकारेण वर्णयितुमशक्यत्वात् इत्यर्थः । कथयामि वदामि नहि वक्तुं शक्तोऽस्मीति भावः ।१

अधुना कनकताटङ्कमुत्प्रेक्षयति—

घटयितुममरीमर्थयितुं मुखमधुरिमाणमविशङ्कम् ।
करपुटमसमशरेण रचितमिव जयति कनकताटङ्कम् ॥२

घटयितुमिति—कनकताटङ्कं कनकस्य सुवर्णस्य ताटङ्कं स्वर्णभूषणम् । असमशरेण असमाः पञ्चसङ्ख्याकाः शराः यस्य स असमशरो मदनः तेन, अमरीं देवस्त्रियं घटयितुमुत्पन्नं कर्म कर्त्तुम् । मुखमधुरिमाणं मुखस्य मधुरिमा सुन्दरत्वं तं 'पृथ्वादित्वादिमनिच्' अर्थयितुं याचितुम् । करपुटं करद्वयं रचितमिव कृतमिव एतादृशं जयति सर्वोत्कर्षेण वर्तते ।२

[1]भुजपटलं [2]पटुविलिखितमन्मथलेखनिकामषिनीरम् ।
[3]प्राञ्छितमञ्जनरुचिकपटादिव कमलभुवा किमधीरम् ॥३

भुजेति—भुजपटलम्, अङ्गदं बाहुभूषणं पटु यथा स्यात् तथा विलिखितं लेखनिका मषिनीरं च कमलभुवा ब्रह्मणा अञ्जनरुचिकपटात् कृष्णवर्णमिषात् प्राञ्छितं आयामितम् विस्तारितम् ।३

[4]मुखतुलया शशिना किमु लाञ्छनकृष्णाजिनपरिधानम् ।
वियति तपस्यति दूर्वारसमिव पिबति तिमिरभू[5] पानम् ॥४

मुखतुलयेति—शशिना चन्द्रेण मुखतुलया मुखसादृश्यमाप्तुं लाञ्छनं कृष्णाजिनपरिधानं—लाञ्छनमेव कृष्णाजिनं कृष्णमृगचर्म तस्य परिधानम् कृतम्, स च वियति आकाशे तपस्यति दूर्वारसमिव दूर्वायाः एतन्नामकवल्लर्याः रसं तद्वदिव तिमिरं तस्माद् भवति सः तस्य पानं अन्धकारोत्पन्नस्य पानं करोति एतादृशं यस्या मुखसादृश्यं प्राप्त्यर्थं तपस्यति तस्याः देहं किं वर्णयामीत्यर्थः ।४

१—मधुगुणपटल ख । २—पटु इति खपुस्तके नास्ति । ३—प्रोञ्छितम् ख । ४—मुखतुलनाय शशी ख । ५—मानम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]विरचितुमुत्तमरुचिमचलाधिपतनयाकुन्तलभारम् ।
किमकृतकण्डितमेष मनोभवशिल्पी तिमिरमुदारम् ॥५

विरचितुमिति—एषः मनोभवशिल्पी काम एव कश्चित् शिल्पकारः, अचलाधिपतनयाकुन्तलभारं अचलाधिपः हिमाचलः तस्य तनया तनूजा पार्वती तस्याः कुन्तलानां भारः कलापः तम् । उत्तमरुचिं—उत्तमा रुचिः कान्तिः यस्य तादृशं विरचितुं कर्तुम्, उदारं सुन्दरकृष्णवर्णतिमिरं, अन्धकारं कण्डितं चूर्णितं अकृत कृतवान् किम् । अतिकृष्णवर्णः केशकलाप इत्यर्थः ।५

तस्य च दिशि दिशि निशितपवन[2]रयनिपतितसुखसन्तानम् ।
जनयति जलधर[3]धारमधुरकरशैवल[4]विहरप्रतिभानम् ॥६

तस्येति—तस्य देहस्य दिशि दिशि सर्वासु दिक्षु निशितः तीक्ष्णः स चासौ पवनो वायुः तस्यः रयः वेगः तेन निपतितं सुखसन्तानं सुखपरम्परा तथोक्तं कर्तृ जलधरधारेति—जलधरो मेघः तस्य धारा उदकधारा तस्या इव मधुरकरं आनन्दकरं यच्छैवलं तस्य विहरप्रतिभानं क्रीडामिव जनयति ।६

कविगणनाथसुतस्य कवेरिति वचनं त्रिजगति धन्यम् ।
[5]निनदतु को वा [6]को वा विलिखतु शैलसुतालावण्यम् ॥७

कवीति—कविश्चासौ गणनाथस्य सुतो भानुदत्तः । भानुदत्तकवेः पितुर्नाम गणनाथेति तस्य कवेः भानुदत्तस्येति, एवं प्रकारं त्रिजगति त्रिभुवने धन्यं पुण्यकरं को वा विनदतु गायतु को वा विलिखतु । कथम्भूतं शैलसुतालावण्यं शैलसुतायाः पार्वत्याः लावण्यं यत्र वर्णनत्वेनेत्यर्थः ताद्दशम्, शेषमुक्तप्रायम् ।७

तस्याः काञ्चनकङ्कणस्य रणितैर्गीतामृतैर्नृत्यतो;
जानीमः कुसुमायुधस्य शिरसः स्रस्ताः प्रसूनस्रजः ।
व्याकीर्णं किमु तस्य नीलनलिनं चक्षुस्तिलं नासिका,
बन्धूकं रदनच्छदो विजयते कौन्दं च वृन्दं रदाः ॥८

तस्या इति- तस्याः पार्वत्याः काञ्चनकङ्कणस्य, सुवर्णस्य यत् कङ्कणम् तस्य

१—रचयितुम् ख । २—खवनिपतिततुप ख । ३—मधुकर ख । ४—विरहृदल प्रतिमानम् ख । ५—निगदतु इति ख । ६–विलिखतु को वा ख

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जात्यैकवचनमेतत्, रणितैः शब्दितैः गीतामृतैः गानामृततालैः नृत्यतः नाट्यं कुर्वतः कुसुमायुधस्य मदनस्य शिरसः मस्तकस्य प्रसूनस्रजः पुष्पमालाः स्रस्ताः गलिताः तासामिदं व्याकीर्णं तदाह नीलनलिनं पद्मं चक्षुः नेत्रं तिलम्, अङ्गे शोभाकारकं चिह्नं नासिका—इदं चम्पककलिकोपमया वन्धूकं एतन्नामकं पुष्पं रदनच्छदः दन्तपङ्क्तिः कौन्दं वृन्दं कुन्दपुष्पाणां समूहो रदाः दन्ता इति जानीमः ।६

स्रष्टुं विम्बाधरमभिनवं पल्लवं वन्धुजीवम्,
माणिक्यं वा यदकृत विधिर्धौतमित्थं प्रतीमः ।
धारा धारामिव निपतिता तस्य बालार्कशोचि-
र्वीचिस्निग्धां शिखरिदुहितुः प्राप सिन्दूरशोभाम् ॥१०

इति भानुदत्तकविविरचिते
गीतगौरीपति[1]महाकाव्ये
षष्ठसर्गः ।६

स्रष्टुमिति—तस्याः पार्वत्याः विधिर्जगत्स्रष्टा विम्बाधरं विम्बफलमिव अधरः अधरोष्ठः तं स्रष्टुं उत्पन्नं कर्तुम् अभिनवं पल्लवं किसलयं वन्धुजीवं वन्धुजीवपुष्पं माणिक्यं वा यदकृत तद्धौतं स्वच्छैः कृतमिति प्रतीमः जानीमः । तस्य विधेः कर्तुः सतः धारामिव धारा निपतिता । सा शिखरिदुहितुः पार्वत्याः बालार्कशोचिर्वीचिस्निग्धां बालसूर्यस्य शोचिः प्रकाशः तस्य वीचिः परम्परा तया स्निग्धा ताम् । सिन्दूरशोभां प्राप ।१०

सम्पूर्णोऽयं टीकायां
षष्ठसर्गः ६

१—काव्ये क । पुस्तकद्वयेऽपि सर्गनाम नास्ति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तमसर्गः

●

अथ पार्वती मदनलेखं सख्या शिवं प्रापयतीति तद्वर्णनमाह—

अन्तःसन्तापमार्तण्डज्वालाज्वलितचेतसः ।
जया जलधरच्छाया प्रादुरासीत् पुरद्विषः ॥१

अन्तरिति—अन्तः अन्तःकरणे यः सन्तापः स एव मार्तण्डः तस्य ज्वालया ज्वलितं चेतः अन्तःकरणं यस्य तस्य पुरद्विषः शिवस्याग्रे जलधरच्छाया जलधरस्येव मेघस्येव छाया यस्याः, एतेन अस्या शान्तिकारकत्वमुक्तम्, जया एतन्नाम्नी पार्वतीसखी प्रादुरासीत् आविर्बभूव ।१

प्राप्य शम्भोः [१]कराम्भोजं लेखपत्रं नतभ्रुवः ।
लिपिप्रतिफलव्याजादिव रोमाञ्चमादधे ॥२

प्राप्येति—नतभ्रुवः नते वर्तुलाकृतिवलिते भ्रुवौ भृकुटी यस्याः सा तस्याः पार्वत्याः लेखपत्रं मदनलेखपत्रं कर्तृ शम्भोः कराम्भोजं हस्तकमलं प्राप्य । लिपि-प्रतिफलव्याजादिव लिपेः प्रतिफलं तस्य व्याजाद् रूपादेव रोमाञ्चम्, आकम्पम्, आदधे गृहीतवत् । अथवा सखीति कर्तृ प्राप्य प्रापय्यान्तर्भावितण्यर्थः । शम्भुरिति—प्रथमान्ते वा पाठे स एव प्रतिफलव्याजात् प्रतिकर्मदर्शनरूपं रोमाञ्च-मादधे इत्यर्थः । २

●

[२]अथ चतुर्दशप्रबन्धो देशाखरागेणैकतालिताले गीयते—

शम्भुः पत्रमेव गृहीत्वा भाषते—

१—कराम्भोज ख । २—रामग्रिरागेण गीयते इतिमात्रम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वमसि किरीटं त्वमसि पटीरम् ।
त्वं सन्तापहुताशे नीरम् ॥१

[१]जगदखिलं मनसिजलेख ! त्वं मम सकलम् । ध्रुवपदम्

त्वमसीति—हे पत्र ! मे किरीटं मस्तकधारणालङ्कारोऽसि मस्तकधारणे योग्यमसि इति भावः। त्वं पटीरं हृदयधार्यं त्वं मम सन्तापरूपो हुताशोऽग्निः तस्मिन् विषये नीरमुदकमसि । त्वं मे सन्तापं शान्तयसीत्यर्थः। हे मनसिज-लेख ! मदनलेख ! मम त्वं सकलं सर्वप्रकारेणानन्ददमिति ।१

प्रसरति मलयजविपिनसमीरे ।
रचयति धाटीं मनसिज[२]धीरे ॥२

प्रसरतीति—मलयजविपिनसमीरे मलये जातं स्थितं मलयजं तद्विपिनं अरण्यं तस्य समीरो वायुः तस्मिन् प्रसरति सर्वत्र सञ्चारिते सति त्वमेव मे सकलमिति पत्रसम्बोधनेन संयोज्यम् । मनसिजधीरे मदनशूरे व्याघ्रादि-त्वात्समासः। धाटीं स्वकीयवाणताडनादि कर्म रचयति कुर्वति सति त्वमेव मे सकलदुःखहारक इति । २

पथि तव समजनि किमपि न दुरितम् ।
तन्मे केवलमनवधि सुकृतम् ॥ ३

त्वं कुशलं मां प्राप्तमसीति मम सुदैवमित्याह पथीति–पथि मार्गे तव किमपि दुरितं विघ्नं न समजनि इति मे अनवधि निरवधि सुकृतं पुण्यं खलु । ३

[३]अलिधेयं किमितरदखिलम् ।
त्वयि कुशले सकलं मे कुशलम् ॥ ४

अलीति—अल्या सख्या धेयं पोष्यं अखिलं त्वमेव नहीतरत् त्वदन्यत्, मत्सर्वस्वात् त्वयि कुशले सर्वं कुशलमेव। इदं पत्रोद्देश्येन पार्वतीं प्रति भाषणं ज्ञेयम् ।४

१—खपुस्तकात् जगदखिलम् । २—वीरे ख। ३—अभिधेयं वा ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मत्समीपे सर्वे पदार्थाः नाशकराः त्वमेव केवलं शान्तिदा इत्याह—

मौलौ सलिलं कण्ठे गरलम् ।
नयने हुतवहतेजो [1]बहलम् ॥ ५

मौलाविति—मौलौ जटापाशे सलिलमुदकं भागीरथ्याः तदपीदानीं दाहकरमित्यर्थः कण्ठे गरलं विषं दाहकारि नयने हुतवहतेजोबहलं हुतवहस्याग्नेः तेजो बहलं तेजः समूहः तदपि तथैव । अतः त्वं सकलमिति पूर्ववज्ज्ञेयम् ।५

उरसि वसति धरणीधरतनया ।
तेन तत्र मे निवस त्वरया ॥६

उरसीति—धरणीधरः हिमाचलपर्वतः तस्य तनया कन्या पार्वती मे मम उरसि हृदये वसति तिष्ठतीति । तेन तस्मात् त्वमपि भाषणात् मे तत्र तस्मिन् स्थले हृदये इत्यर्थः निवस वासं कुरु त्वल्लिखितं मम हृदये सदा तिष्ठत्वित्यर्थः ।६

मम हृदये न तिष्ठसि तर्हि एवं कुरु, किं तदाह—

तत्र गतो वदतामिति सततम् ।
हृदि निवससि मा वहसि न [2]सुखितम् ॥ ७

तत्रेति—तत्र पार्वतीसमीपे इति एवं प्रकारेण सततं निरन्तरं वारं वारमित्यर्थः तां पार्वतीं वद; किं तदाह हृदीति त्वमिति शेषः । त्वं मम हृदये मनसीत्यर्थः तिष्ठसि खलु तथापि सुखितं सुखं 'सुखदुःखतत्क्रियायामित्यतः' क्तः प्रत्ययः । न वहसि न प्रापयसि 'वह प्रापणे' सुखं न करोषीत्यर्थः । ७

लपति भानुरिति लज्जालिखितम् ।
लघु लघु पुरहर ! विरचय[3] चलितम् ॥ ८

उपसंहरति लपतीति—इति एवं सप्तपादोक्तप्रकारेण पार्वत्येति शेषः, लज्जालिखितं लज्जया लिखितं लपति प्रबन्धेन वदति स्पष्टं करोतीति वा । तस्य लिखितस्य तात्पर्यमाह—हे पुरहर ! त्रिपुरहर ! शिव ! लघु—लघु किञ्चित्, किञ्चित्, 'आदरे द्विवचनम्' सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः, सम्भ्रमो भयमादरो वा, चलितं चलनं विरचय कुरु इतः पार्वत्यालिङ्गनार्थं गच्छेत्यर्थः ।८

१—बहुलम् ख । २—सुसितम् ख । ३—वञ्चितम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]जगदफलं सुखमालिङ्गितचन्द्रधिया किमु ! रजनिरधिकतरकामा ।
लग्ना तिमिरावलिरिव यदसौ भ्रूकपटादभिरामा ॥ ४

जगदिति—मध्य एवासम्बन्धमबन्धञ्च पद्यमशास्त्रमिव भाति, तन्मुखवर्णनत्वेन नेयम् । तथाहि जगति अफलं अतिशयफलं अतिशयार्थे नञ् अमूल्यमितिवत्, सुखदातृत्वेनेत्यर्थः मुखं प्रति पार्वत्या इति शेषः । आलिङ्गितश्चन्द्रः तद्बुद्ध्या रजनी रात्रिः चन्द्रपत्नी अधिकतरकामा सती इदानीं चन्द्रालिङ्गनेन मुखालिङ्गनमपि भवेदत इत्यर्थः । यद् यस्मादसौ तिमिरावलिरिव भ्रूकपटाद् भृकुटिरूपेणाभिरामा मनोहरा लग्ना । ४

पत्रवर्णनानन्तरं जयाभाषणमुपक्रमते—

जया[2]न्वितदयाहेतोरब्रवीदिन्दुशेखरम् ।
देव्या मदनसन्तापं धारेव प्रतिबिम्बिता ॥५

जयेति—जया पार्वतीसखी, अन्वितदयाहेतोः—अन्विता प्राप्ता दया यस्या सा अन्वितदया पार्वतीशिवयोः वियोगदुःखं दृष्ट्वा दयायुक्तेत्यर्थः । तस्याः हेतोः न ह्ययं पार्वत्याः सन्देशः किन्तु जयाया एव स्वकीयं दयया भाषणम् । इन्दुशेखरं शिवम्, साभिप्रायमेतत् इन्दुशेखरत्वान्मदनसन्तप्तायाः तस्याः सन्तापशान्तिप्रापकत्वात् । अब्रवीत्, उक्तवती कथम्भूता सा देव्याः पार्वत्याः प्रतिबिम्बिता आदर्शीभूता मदनसन्तापधारेव मदनसन्तापौघ इव, अनेन तस्या दयात्वमाविर्भावः सखीप्रेम च उद्योतितम् ।५

हरविरहदीनदेहां शैलसुतां हन्तुमभ्यस्यत् ।
विससूत्रं [3]त्रसरेणुलक्ष्मीं कुरुते मनोजन्मा ॥६

हरेति - हे हर ! शिव ! मनोजन्मा मनोभवो मदनः 'मकरध्वज आत्मभूः' इत्यमरः । विरहदीनदेहां विरहः तव वियोगः तेन दीनः कृशः कृपणश्च, अपालकत्वात् देहः शरीरं हन्तुं अभ्यस्यत् उद्योगं कृतवान् हर्तुमिति वा पाठः । यथा रामशत्रू रावणः सीतया रामं वियुज्य सीताहरणं कृतवान् तथा तव शत्रुर्मदनोऽपि

१—खपुस्तके पद्यमिदन्नास्ति । २—श्रीतदया ख । ३—त्रसरेणुं लक्ष्यीकुरुते ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तां हन्तुमुद्यत इति व्यङ्ग्यम् । पाठान्तरे स्पष्टोऽर्थं एव । हननोपक्रमं द्योतयति बिससूत्रं मृणालं त्रसरेणुलक्ष्मीं त्रसरेणुमिवेत्यर्थः । कुरुते यथा त्रसरेणुः शरीरे पतितोऽपि त्वचा किमपि न ज्ञायते तथा सन्तापनाशाय धृतं बिसमनया न ज्ञायते तद् अस्याः सन्तापं दुःखं न निवारयतीति भावः । यथा रोगिणः औषधादानेन तस्य रोगवृद्धिस्तथाऽस्याः सन्तापं वर्द्धयतीति यावत् । ६

इदानीं समानशीलव्यसनेषु सख्यमिति न्यायेन चन्द्रसाहचर्ययोग्यतां सकारणमाह—कदाचिच्चन्द्रोऽपि तापं शीतयति तर्हि सोऽपि त्वत्समीपे इत्यतो वा—

पुरहर ! तव कामिनी भवानी तुहिनरुचो रजनी पुनः प्रियासौ ।
उभयमपि मधौ प्रयाति कार्श्यं तदुचितमेव विधुं दधासि मूर्ध्नि ॥७

पुरहरेति—हे पुरहर ! शिव ! तव कामिनी कामयते तच्छीला 'तुल्यजातौ णिनिस्ताच्छील्ये' इति णिनिः स्त्रीत्यर्थः । भवानी इदं नाम्नैव सिद्धम् । 'इन्द्रवरुणभवशर्व' इत्यानुक् ङीष् च । पुनस्तथैव तुहिनरुचः तुहिना शीता रुक् कान्तिर्यस्य स चन्द्रः 'हिमांशुश्चन्द्रमाश्चन्द्र' इत्यमरः । तस्यासौ रजनी रात्रिः प्रिया कामिनी उभयमपि भवानीरजन्यावपि मधौ वसन्ते कार्श्यं प्रयातः । तद्धेतोः समानभार्यत्वात् विधुं चन्द्रं मूर्ध्नि मस्तके दधासि धारयसि तत् उचितम् योग्यमेव । ७

●

[1]अथ पञ्चदशः प्रबन्धो कर्णाटकरागेण एकतालीताले गीयते—

अथ सखी पुनस्तस्या विरहदुःखं प्रबन्धेन वर्णयति—

दिनकरमण्डलमिलित[2]रजनिकरलेखादीधितिसेका[3] ।
विरहवारिनिधिविलुलितवाडवदारुणतापविशेषा ॥१
सकलकलारसधन्या ।

तव विरहे परिपतति विषीदति विलपति गिरिपतिकन्या ॥ ध्रुवपदम्

दिनकरेति—अस्या अष्टपद्याः कर्णाटरागस्तत् स्वरूपं 'कपोलपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरे । संस्तूयमानः सुरचारणौघैः कर्णाटरागः

१—गौड़ीवराडीकेदारआशावरीरागेण वा गीयते इति ख । २—निशाकर ख । ३— शेषा ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शितनीलकण्ठः' इति, दिनकरस्य सूर्यस्य यन्मण्डलं तत्र मिलितः संलग्नो यो रजनिकरश्चन्द्रस्तस्य लेखा शकलं तस्याः दीधितयः किरणाः तेन सेकते युक्ता भवतीत्यर्थः तस्याः शरीरे चन्द्रकिरणानि पतन्ति तेन साकं सूर्यकिरणानि अनेन चन्द्रकिरणैः शीततालाभो नास्तीत्यन्यत् परञ्च सूर्यकिरणानां सन्तापस्त्वधिक इति ज्ञेयम् । 'सेकृस्त्रेकृस्त्रकिश्लकि' गतौ । विरहवारिनिधिः विरहः त्वया समं वियोगः स एव वारिनिधिः तत्र विलुलितः अन्तः सञ्चारी यः वाडवोऽग्निस्तस्य दारुणः तापविशेषो यस्याः । यद्यपि विरहस्य समुद्रोपमया उदकशीतत्वमिति त्वया मन्यते तथापि तत्राग्नितापविशेषो विद्यते स तु तदधिक एवेति भावः । एतादृशा सकलकलारसधन्या—सकला सर्वाः कला गायनादयः शिवतन्त्रोक्ता रसा शृङ्गारादयः तैः धन्या परिपूर्णेति यावत् । एतादृश्यपि गिरिपतिकन्या पार्वती तव विरहे सति परिपतति, स्खलति विषीदति खेदं करोति विलपति किमपि अस्तव्यस्तं वक्ति । १

अभिनवनीरजनी कपटादिव [1]जीवमिदं मतिभीतम् ।
[2]मनसिजनायकसायकपारकमिव धारयति स्फीतम् ॥ २

अभिनवेति—अभिनवा नूतना नीरजनी नीरादुदकाज्जनी जन्म यस्याः 'कृदिकारादक्तिनः' इति ङीष् कमलिनीत्यर्थः, तस्याः कपटं मिषं तां दृष्ट्वेत्यर्थः । मतिभीतं मत्या बुद्ध्या भीतम्, इदं जीवितम् । मनसिजनायकः मदनराट् 'उपमितं व्याघ्रादिभिः' इति समासः तस्य सायको बाणः तेन पारकं परकीयं तदिव, अनेन स्फीतं ताडितं तथा धारयति धारणं करोति अनेन विरहदुःखेनास्याः जीवितनियमोऽपि नेति भावः । शेषं स्पष्टमुपरितनव्याख्यानेन । २

शमनमहिषचिररोमन्यच्युतफेन[3]कपटसङ्काशम् ।
गणयति कुञ्जमञ्जुकरुणद्रुमकोरकमुदितविकाशम् ॥ ३

शमनेति—कुञ्जेषु निबिडलतासमूहपूरितक्रीडारामेषु मञ्जवः सुन्दराः ये करुणद्रुमकोरकाः करुणाः मृदवो ये द्रुमाः तेषां कोरकाः कलिकाः 'कलिका कोरकः पुमान्' इत्यमरः । तेषां यो मुदित आनन्दयुक्तो लोकानन्ददातृत्वात् विकाशः विकसनम् प्रफुल्लतेत्यर्थः तम्, शमनस्य यमस्य 'शमनो यमराड् यमः' इत्यमरः,

१—जीवनमिदमतिभीतम् ख । २—मनसिजसायकवारकखेटकमिव ख । ३—पटल ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य महिषः वाहनीभूतो लुलायः तस्य चिरं यो रोमन्थः चर्वितचर्वणं तेन च्युतो गलितो यः फेनः कफः तस्य कपटसङ्काशं विषमिव गणयति मन्यते, अनेनातीव मृदोरतिकठोरत्वं विरहेण दुःखोत्पादकत्वात् ।३

वहति सखीजनकरतलविनिहित[1]मभिनवसरसिजनालम् ।
स्मरकरिदशन[2]मनसि किमु [3]विलुलितमविरलघोषकलापम् ॥४

वहतीति—सखीजनैः करतलेषु विनिहितः स्थापितः अभिनवो नवीनो यः सरसिजनालः कमलदण्डः तमतिशीतमपि इत्यर्थः। मनसि अग्नौ विलुलितं स्मरकरिदशनं स्मर एव करी हस्ती तस्य दशनो दन्तः तमिव । अविरलोऽखण्डो यो घोषकलापो दुःखशब्दसमुदायो यस्मिन् कर्मणि यथा तथा धारयति कमलनालस्तप्तहस्तिदन्त इव सन्तापयतीति भावः । ४

जीवनधनहरणाय समीरण एष[4]भवति वनचारी ।
तेन प्रहरिक इव [5]कचकुचयोर्विरचति हृदि भयकारी ॥५

जीवनेति—एष समीरणः तस्या इति शेषः, जीवनधनहरणाय जीवनं जीवितं तदेव धनं द्रव्यम् तस्य हरणायापहर्तुम् । 'तुमर्थाच्च भाववचनादिति' चतुर्थी, वनचारी वनेषु चरतीति शबर इवेत्यर्थः । भवति तेन अत एव भमकारी भयोत्पादकः सन् प्रहरिक इव चोर इव कचकुचयोः कचेषु कुचयोश्च 'शाकपार्थिवत्वात्' समासः । हृदि हृदये विरचति आचरतीत्यर्थः । अथवा कचेषु कुचयोः प्रहरिकः ताडनकर्ता भयकारी च सन् हृदि आचरतीव । ५

[6]मधुरपसरतु वहतु शुचि संशयमिति गुरुतरमन[7]चापम् ।
पयसि नभसि विपिने भुवि कलयति निश्वासैरभितापम् ॥६

मधुरिति—मधुर्वसन्तोऽपसरतु दूरीभवतु नष्टो भवतु त्रासदायकत्वात्,

१—मणिमय ख । २—उरसि ख । ३—सुललितमविरलकोपकलापम् ख । ४—भजत तव वारि ख । ५—कचनिचयो विचरति ख । ६—मधुरप्रसरतु ख । ७—अनवापम् ख । 'अनचापम्' इति भ्रष्टपाठः । टीकाकारेण मदनचापम् इति पाठं प्रकल्प्य व्याख्या विहिता । मदनचापम् इति पाठे स्वीकृते गीते गतिभङ्गः सञ्जायते । अस्मात् कारणात् 'ख' पुस्तकस्थ 'अनवापम्' इति पाठः समीचीनः प्रतीयते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनन्तरं शुचि आषाढ़े अथवा मधुवियोगेन शोके मदनचापम् मदनधनुः गुरुतरं महान्तं संशयं वहतु इति, इति हेतोरिव पयसि उदके नभसि आकाशे विपिने अरण्ये भुवि भूमौ निःश्वासैः उष्णश्वासैः अभितापं समन्तात् सन्तापं कलयति उत्पादयतीत्यर्थः । ६

कोकिलमलयसमीरसुधाकरभूरिभयं कलयन्ती ।
लिखति श्येनभुजङ्गविधुन्तुदनाम महीषु लुठन्ती ॥७

कोकिलेति—कोकिलः परभृतः मलयसमीरो मलयपर्वतादागतो वायुः सुधाकरश्चन्द्रः च तेषां भूरि अतिशयेन भयं भीतिः तत् । कलयन्ती उत्पादयन्ती सती इदानीं अस्याः सन्तापदातृत्वात् । महीषु लुठन्ती ताडयन्ती, 'रुठलुठउठ उपघाते' इत्यस्माल्लटः शता रूपम् । श्येनः पत्री एतन्नामकः सर्वेषामपि पक्षिणा-मत्ता, 'पत्री श्येनः' इत्यमरः । भुजङ्गो वायोरत्ता विधुन्तुदश्च विधुं चन्द्रं तुदति व्यथयति विधुन्तुदः 'विध्वरुषोस्तुदः' इति खश् । राहुः एतेषां नाम अभिधानं लिखति इवेति शेषः, एतन्नाशका इमे अत एभ्यो भीताः पलाय्य गच्छन्त्विति हेतोरिति भावः । ७

वदति भानुरिति मुञ्च कथामिति लोकैरुपहसनीयम् ।
सकलज्ञाननिधौ पुरवैरिणि [1]दूति । किमथ कथनीयम् ॥८

कविरुपसंहरति वदतीति—भानुः कविः इति वदति किं तत् हे दूति ! कथां मुञ्च अलमेतावता कथनेन, तत्र कारणमाह सकलज्ञाननिधौ सकल-भवद्भूतभविष्यज्ज्ञातरि पुरवैरिणि शिवे अथ इतोऽप्यधिकं कथनीयं किं न किमपि स सर्वमेव जानाति—कथनीयं लोकैरुपहसनीयमेव स्यात् । एतावताऽल-मित्यर्थः । ८

सुवर्णसुतनोरङ्गे तापस्तीव्रतनूनपात् ।
सिञ्च सिञ्च पुराराते ! कृपासलिलधारया ॥९

सुवर्णेति—सुष्ठु वर्णो यस्याः तादृशी सुतनुर्यस्याः, पक्षे सुवर्णं काञ्चनं तस्य

१—दूतेरिति कथनीयम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुतनुः शरीरं तस्याः अङ्गे शरीरे तापः सन्तापः स तीव्रतनूनपात् तीक्ष्णाग्नि-रित्यर्थः अतः हे पुराराते ! शिव ! कृपासलिलधारया दयोदकासारेण सिञ्च सिञ्च क्षरणं कुरु कुरु तेन शान्तिर्भवेत् । ९

जानीमः [1]सुदृशो दृगंशुतटिनीवन्याभिरुत्सारितम्,
यद्यत्तत्सकलं क्वचित्क्वचिदपि स्थित्वा समुन्मीलति ।
भ्रूलीला स्मरकार्मुकं हिमकरं वक्रस्य लीलायितं,
चाञ्चल्यान्नयनश्रियः पुरहर ! त्वद्वाचमालम्बते ॥१०

जानीम इति—सुदृशः सुष्ठु दृक् यस्याः सा सुदृक् तस्याः पार्वत्याः दृगंशु-तटिनीवन्याभिः दृक्किरणानां तटिनीप्रवाहत्वेन तटिनीत्वम्, तत्र स्थिता वन्या-स्ताभिर्यथाऽरण्ये नद्यास्तीरे वन्याः प्राणिनो वसन्ति तथात्वेन सादृश्यम् । उत्सारितं दूरीकृतं यत्तत् क्वचित्क्वचिदपि यत्र कुत्रापि स्थित्वा समुन्मीलति उन्मेषनिमेषं करोति यथा नदीतीरे स्थितैः प्राणिभिरुत्सारितं सर्वत्र उदक-त्वेनैव प्रतीयते तथा । यत्र यत्र अंशुतटिनीतो अंशवः उत्पतितास्ते तद्गुणेनैव वर्तन्ते । तथाहि हे पुरहर ! शिव ! भ्रूलीला भ्रुकुटिचाञ्चल्यं स्मरकार्मुकं मदनशरासनं कुटिलत्वेन चाञ्चल्येन च वक्रस्य लीलायितं सौन्दर्यं हिमकरं चन्द्रं त्वद्वाचं तव वाणीं तस्या वाणींति शेषः एतत् सर्वं नयनश्रियश्चाञ्चल्यात् आलम्बते धारयति । १०

अधुना निजोष्मभिः पीडितः सन्तापः तच्छान्त्यर्थं तामालिङ्गतीति सकारणमुत्प्रेक्ष्याह—

[2]नाभिं कूपधिया मुखं शशिधिया बाहू मृणालाशया,
पाणी पल्लवशङ्कया वलिमपि प्रत्याशया स्रोतसः ।
ऊरू केतककान्तिकोमलरुचौ रम्भा प्रकाण्डभ्रमा—
त्सन्तापोऽपि निजोष्मभिः [3]कवलितः प्रत्यङ्गमालिङ्गति ॥ ११

नाभिमिति—सन्तापोऽपि निजोष्मभिः कवलितः पीडितः कूपधिया उदकपूरितान्धुबुद्ध्या नाभिम् । मुखं शशिधिया चन्द्रधियाऽमृतोत्पादकत्वात् । बाहू दण्डौ मृणालाशया कमलदण्डबुद्ध्या । पाणी हस्ताग्रौ पल्लवधिया कोमल-पत्रबुद्ध्या वलिम् उदरस्थितवलित्रयं स्रोतसः प्रवाहस्य प्रत्याशया सन्देहेन ।

१—सुतनोर्दृगम्बु ख । २—नाभीम् ख । ३—कुवलितः ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

केतककान्तिकोमलरुचौ केतकस्य कान्तिस्तेजस्तदिव कोमला रुक् रुचिर्ययोस्तौ तथोक्तौ, ऊरू सक्थिनी रम्भाप्रकाण्डभ्रमात् रम्भा कदली तस्याः प्रकाण्डो स्तम्बो 'अस्त्री प्रकाण्डः स्तम्बः स्यान्मूलाच्छाखावधिस्तरो' रित्यमरः । प्रत्यङ्गं मङ्गमङ्गं प्रति आलिङ्गति आलिङ्गनं करोति । स्वकीयोष्णतापीडाशान्त्यर्थ-मितिभावः । ११

[1]अथ षोडशः प्रबन्धो रामकरिरागेण रूपकताले गीयते—

जयति न तारावलमिति जीवनमपि गमनं न वितेने ।
नयनयुगलजलमखिलजलधिजलमुदकविन्दुमिव [2]तेने ।। १

सीदति धरणीधरतनया ।
सुधाकरकरकृतभूरिभया ।। ध्रुवपदम्

जयतीति—हे शिव ! धरणीधरतनया पार्वती सुधाकरश्चन्द्रः तस्य कराः किरणाः तैः कृतं भूरि अतिशयं भयं यस्याः सा । विरहदुःखेऽपि सन्तापदातृत्वात्, सीदति दुःखीभवति । षद्लृविशरणगत्यवसादनेषु 'पाघ्राध्मेति' सार्वधातुके सीदादेशः । तदेव वर्णयति तारावलं ग्रहवलं न जयति न वर्तते अतो जीवनं जीवः गमनं न वितेने न करोति दुःखभोगादजीवनं वरमिति भावः । तदेव दुःखमाह तस्या इत्यध्याहारः, नयनयुगलजलं नयनयोः पतितानि दुःखाश्रूणि कर्तृ अखिल-जलधिजलं सर्वेषामपि समुद्राणामुदकं कर्म उदकविन्दुमिव एकं तुषारमिव तेने करोति । अश्रुजलमानेन समुद्रोऽपि जलकण इति अश्र्वाधिक्यमत्र । अति-शयोक्तिः । १

प्रसरति [3]तापो गहने तस्या द्रवभीतिभिरभिरामम् ।
कनकवलयमपि करमपहाय क्वचिदपि चलति निकामम् ।। २

प्रसरतीति—तस्याः पार्वत्यास्तापो द्रवभीतिभिः एतस्या अश्रुभिः मां द्रवत्वमायाति, अतो भीत्या गहनेऽरण्ये प्रसरति तथा कनकवलयं हस्तालङ्कारभूतं स्वर्णकटकं तदपि करमपहाय त्यक्त्वा क्वचिदपि यत्र कुत्रापि निकामं यथेच्छं

१—केदाररागेण गीयते एतन्मात्रम् ख । २—मेने ख । ३—तापगहनतर-दहने इव भीतिभिरविरामम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चलति गच्छति ; कारणं पूर्वोक्तमेव, अनेनास्याः कृशत्वं ध्वन्यते । २

बद्ध्वा नैव क्षमते गन्तुं कम्पं तेन वहन्ती ।
हाटकरशना रोदिति रणितैरहह ! भयं कलयन्ती ।। ३

बद्ध्वा नैवेति–तथैव हाटकरशनेति पूर्वतो ज्ञेयम् तां बद्ध्वा गन्तुं नैव क्षमते कथं तदाह कम्पमिति–तेन बन्धनेन कम्पं वहन्ती हाटकरशना सुवर्णकाञ्ची भयं कलयन्ती ज्ञापयन्ती अहहेति खेदे रणितैः कूजितैः रोदिति रोदनं करोति इव ।३

अश्रुजलेन विलोचनयुगमपि रुद्धं नाथ ! भवन्तम् ।
दर्शनकामनया स्नपयति किमु हृदि पीठे निवसन्तम् ।। ४

अश्रुजलेनेति—हे नाथ ! अश्रुजलेन दुःखाश्रुभी रुद्धं सन्नद्धं विलोचनयुगं लोचनयुग्मं दर्शनकाङ्क्षया साक्षात्ते दर्शनं भवत्वितीच्छया हृदि हृदये पीठे आसने निवसन्तं तिष्ठन्तं भवन्तं त्वां स्नपयति स्नानं कारयति स्नानस्य पूजा विषयोक्तत्वात् पूजयतीति यावत्, तेन तर्हि भवान् प्रसन्नो भवेदिति भावः । ४

लोचनजलरुहि मूर्ध्नि धिया नवजलमविरलमपि धत्ते ।
[1]घनतरतापहुताशनमपि नवलब्धं विसृजति चित्ते ।।५

लोचनेति—लोचनं नेत्रं तदेव जलरुट् कमलं सर्वधातुभ्यः क्विब्वा वाच्यः । तस्मिन् मूर्ध्नि मस्तके धिया बुद्ध्या नवजलं शीतमुदकम्, अविरलं सन्ततधारया अपि धत्ते समुच्चयेन धारयति । घनतरतापोऽतिशयेन सन्तापः स एव हुताशनोऽग्निः तं नवलब्धं नवीनोत्पन्नं दीपमिव चित्ते विसृजति अर्पयति । अनेनाऽपि शिवस्य पूजोक्ता तत्प्राप्त्यर्थम् । ५

नयसि सुरभि दिवसमपि कथमिति नलिनीं पृच्छति लोलम् ।
गमयति[2]शमथमश्रुजलविलुलितकरतलनिहितकपोलम् ।।६

नयसीति—अपीति प्रश्ने सुरभि मनोज्ञम्, दिवसं कथमिति नलिनीं कमलिनीं लोलं अङ्गवैकल्ययुक्तं यथा तथा पृच्छति, तथा च पृष्ट्वा गमयति नयतीत्यर्थः । कथन्नयति–इत्येतदाह शमयेति-अश्रुजलैर्विलुलितः विकलितोऽत एव करतले निहि-

1—घनवर—ख । २ समयम् ख ।

५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तश्च कपोलो गल्लो यया यस्मिन् कर्मणि तथा शमथं कल्याणदातृ यथा भवेत्तथा च ।६

एवं दीनावस्थायामपि तस्या अन्यतो दुःखमाह—

प्रचलति हन्तुमचलपतितनयामुपलकठिनतरकर्मा ।
लोचनजलकलशद्वयशकुनं पश्यति चेतोजन्मा ॥७

प्रचलतीति—उपलकठिनतरकर्मा उपलः पाषाणस्तस्येव कठिनं कठोरमित्यर्थः कर्म आचरणं यस्य निर्दय इत्यर्थः । चेतोजन्मा मनोभवो मदनः अचलपतितनयां हिमाचलकन्यां पार्वतीं हन्तुं प्रचलति प्रस्थानं करोति तदा शकुनमपि सम्यगाह । लोचनेति—लोचने एव जलकलशौ जलपूरितघटौ अश्रुपूर्णत्वात् । तयोर्द्वयं तदेव शकुनः तं पश्यति ।७

भानुदत्तकविरिति गोचरयति पुरहर ! न कुरु विलम्बम् ।
दहति दहन इव हृदयमदयमिदमुदयदमृतकरबिम्बम् ॥८

भान्विति—भानुदत्तः कविः इति एवं प्रकारेण गोचरयति विज्ञापयति तदाह— हे पुरहर ! विलम्बं न कुरु, देहि तस्यै त्वद्दर्शनमित्यर्थः । अविलम्बे कारणमाह—इदमुदयत् आविर्भवत् अमृतकरस्य चन्द्रस्य बिम्बं मण्डलम् अदयं यथा तथा दहन इवाग्निरिव हृदयं पार्वत्याः इति शेषो दहति तप्त्वा भस्मयति अतो मा विलम्बं कुरु इति भावः ।८

नीचै[1]र्याति दृशो नीरमधीरमिति सुभ्रुवः ।
आयुर्लिपिः स्थिता भाले भालेक्षण ! न शाम्यति ॥१३

नीचैरिति—हे भालेक्षण ! भाले ईक्षणं नेत्रं यस्य हे शिव ! सुभ्रुवः सुष्ठु भ्रुवौ भ्रुकुटी यस्याः सा तस्याः पार्वत्याः दृशः नेत्रतः नीरमुदकम् अधीरं अधैर्ययुक्तं शिथिलम् इति हेतोः नीचैर्याति अधीरं सन्ततं नीचैर्याति गलति एवमेवैतस्या दुःखम् । एवं दुःखेन तस्या अन्तो भाव्य एव परन्तु भाले आयुर्लिपिः स्थिता अत एव जीवतीति तात्पर्यम् ।१३

१—गीतदशः ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अधुना तव ध्यानेन भ्रमर इव त्वां प्राप्तामिवेत्याह—

वाष्पव्याजादमरतटिनी लोचनाभ्यां गृहीता,
तापव्याजान्नयनहुतभुक् स्वीकृतो मानसेन।
मोहव्याजाद्विषमपि तया मुग्धया [1]पीतमेवम्;
त्वं [2]मुक्तोऽभूस्त्रिपुरदहन! क्वाऽपि विश्राम्य तिष्ठ ॥१४

वाष्पव्याजादिति—वाष्पव्याजात् वाष्पमिषात् अमरतटिनी सुरनदी-गङ्गेति। लोचनाभ्यां नेत्राभ्यां गृहीता धृता वस्तुतस्ते न वाष्पा अमरतटिनीति हेत्वाभासो ज्ञेयः एवमग्रेऽपि। तापव्याजात् तापरूपेण तथा हुतभुक् अग्निः मानसेन मनसा गृहीतो धृतः। मोहव्याजात् मोहयुक्तरूपत्वात् मुग्धया बालया विषमपि पीतम्। हे त्रिपुरदहन! एवं त्वं मुक्तः अभूः भवतः सर्वे संसारत्रासा-स्तया गृहीताः, अतस्त्वं क्वाऽपि कुत्रापि स्थले विश्राम्य तिष्ठ विश्रामं कुरु।१४

कानने सुभ्रुवः श्वासहुताशग्रासदूषिते।
[3]अद्यापि षट्पदव्याजात् कालिमा नोपशाम्यति ॥१५

काननेति—सुभ्रुवः सुष्ठु कुटिले भ्रुवौ यस्याः पार्वत्याः श्वासहुताशग्रास-दूषिते श्वासः स एव हुताशः अग्निः तस्य ग्रासेन भक्षितया दूषितं तस्मिन् काननेऽरण्ये षट्पदव्याजाद् भ्रमररूपेण कालिमा अद्यापि न उपशाम्यति शम-माप्नोति। अद्यापि कालिमा विद्यत एव तत् प्रत्ययो भ्रमर इति भाव।१५

जयाभाषणं सत्यमिति साक्ष्यं कविराह—

जयायाः कथिते साक्ष्यमिव दातुं पुरद्विषे।
क्षण[4]मालम्बत स्थैर्यं मध्येऽह्नि महसां पतिः ॥ १६

जयाया कथिते पार्वतीवृत्तं पुरद्विषे शङ्कराय साक्ष्यं साक्षितां इदं सत्यमिति तद्भाषणे प्रोत्साहनं तद्दातुमिव महसां पतिः सूर्यः मध्येऽह्नि मध्यदिवसे क्षणं स्थैर्यं स्थिरताम् आलम्बत गृहीतवान् क्षणं न चचाल कथं स्वेन ऊष्मणेव। १६

अधुना मध्याह्ने पार्वत्याः स्थितिमाह—

भ्रूच्छायान्तर्विशति नितरां नेत्रयोः [5]पक्ष्मपाली,
पक्ष्मच्छायां श्रयति नयनद्वन्द्वमिन्दीवराक्ष्याः।

१—नीतमेव ख। २—मुक्तोऽसि ख। ३—याऽद्यापि ख। ४—आलम्बते ख। ५—पक्ष्मच्छाया ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कामः पार्श्वे [1]भवति कुचयोस्तृष्णया स्वेदवाराम्,
प्रस्वेदाम्भस्तपति तरणौ नाभिकूपं प्रयाति ॥१७

भ्रूच्छायेति—तरणौ सूर्ये तपति सति इन्दीवराक्ष्याः कमलाक्ष्याः पार्वत्याः नितरां विशेषेण पक्ष्मपाली नेत्रलोमपटलं नितरां भ्रूच्छायान्तः भ्रूकुट्याश्छाया-मध्ये विशति प्रविशति पक्ष्मपाल्युपरि भ्रूच्छाया पततीत्यर्थः । तथा च नयन-द्वन्द्वं नयने पक्ष्मच्छायां श्रयति पक्ष्मच्छाया श्रयेण वर्तते । कामो मदनः तृष्णया तृष्णाक्रान्तत्वादिव कुचयोः स्तनयोः स्वेदवारां घर्मोदकं विन्दूनां पार्श्वे पार्श्व-भागे भवति प्रस्वेदाम्भो घर्मोदकं च नाभिकूपं प्रयाति तत्र जलस्थानत्वात् ।१७

छायामृगो समुद्दण्डे [2]चण्डभासा भयातुरा ।
अन्योन्यमाश्रयी कर्त्तुमन्योन्य [3]वा समीयति ॥१८

इति भानुदत्तकविविरचिते
गीतगौरीपति[4]महाकाव्ये
सप्तमसर्गः । ७

●

छायामृगी चन्द्रलाञ्छनम् । चण्डभासा तीक्ष्णतापेन समुद्दण्डे सति अति त्रासं ददति सति तेन भयातुरा भयपीडिता अन्योऽन्यं परस्परं आश्रयी-कर्तुम्, आश्रयितुं सन्तापनाशनार्थम् । अन्योऽन्यं मृगश्चन्द्रं प्रति चन्द्रः मृगं प्रति समीयति आलिङ्गतीत्यर्थो वा किमु । वामनीयतीति वा पाठः ह्रस्वीकरोति आकुञ्चयतीत्यर्थः । १८

समाप्तोऽयं टीकायां
सप्तमसर्गः ।७

●

१—भ्रमति ख । २—चण्डभासि ख । ३—वापनीतिपु ख । ४—काव्ये क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अष्टमसर्गः

●

अथाऽस्मिन् सर्गे श्रीपार्वतीशङ्करयोर्विलासो वर्ण्यते—

तदुपक्रममाह—

जया [1]सन्दर्शयामास प्रीतिपात्रं पुरद्विषः ।
[2]उद्योतिहसितज्योतिरवादीच्चतुरं वचः ॥१

जयेति—जयानाम पार्वतीसखी पुरद्विषः शिवस्य प्रीतिपात्रं सन्दर्शयामास तदा स पुरद्विट् उद्योति प्रफुल्लितं हसितेन ज्योतिः कान्तिर्यस्मिन् कर्मणि यथा भवति तथा चतुरं सुन्दरं वचः भाषणम् अवादीत् अवोचत् ।१

तद्भाषणमाह—

मुञ्च मुञ्च चकोराक्षि ! मुखमण्डलमानतम् ।
[3]वासरे प्रसरत्सूरकरः परिसमाप्यताम् ॥२

मुञ्चेति—हे चकोराक्षि ! चकोरस्य अक्षिणीव चञ्चले अक्षिणी यस्याः सा आनतं नम्रं मुखमण्डलं मुञ्च मुञ्च मुखमुपरि कृत्वा मां पश्येत्यर्थः । वासरे-प्रसरति यः सः सूरकरः सूर्यकिरणः परिसमाप्यतां समाप्तो भवतु, इदानीं तव मम च सन्तापो दूरीभवत्वित्यर्थः । २

इत्युक्ते च तेन सन्दर्शनेन तस्याः स्थितिमाह—

दिनमपि कियदस्ति तिग्मरोचिः,
स्फुरति कियानथ यामिनी कदा स्यात् ।
इति झटिति बहिः प्रयाति तल्पा-
न्तिकमुपयाति मुहुर्मुहुर्मृगाक्षी ॥३

दिनमपीति—मृगाक्षी पार्वती दिनं कियत् कतिप्रमाणमस्ति अपि संशये

१—तां दर्शयामास ख । २—उद्योत ख । ३—वासरः प्रसरे ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिग्मरोचिः सूर्यः कियान् स्फुरति उष्णत्वेन कति वर्तते यथा यथा तस्योष्णतोनता स्यात्तदा दिवसन्यूनता स्यादेव। इति—इति द्रष्टुमित्यर्थः। मुहुर्मुहुः बारम्बारं झटिति अञ्जसा बहिः शय्यास्थानात् याति मुहुर्मुहुः बारम्बारं तल्पान्तिकं शय्यासमीपम्, उपयाति समीपमायाति।३

दाम प्रकामसुभगं शरदिन्दुकल्पं,
तल्पं विहारभवने मृगनाभिधूपः।
आलीभिरेव सकलं [1]विदधे परन्तु,
वामभ्रुवो हृदि मनोरथ एव मेने[2]॥४

दामेति—दाम पुष्पमाला प्रकामं सुभगमतिशयेन सुन्दरम्। तल्पं शय्या शरदिन्दुकल्पं शरत्कालीनचन्द्र इव स्वच्छं सुखदातृ च। विहारभवने क्रीडास्थाने मृगनाभिधूपः कस्तूरीसुगन्धः सकलं सर्वम्, आलीभिः सखीभिः एव विदधे कृतम्। परन्तु वामभ्रुवः पार्वत्या हृदि मनोरथ एव मानसिकः एव मनसोत्पन्नः विधाने निमित्तमात्रमेव सख्यः। वस्तुतस्तु पार्वत्याः सर्वमिदं मनसोत्पादितमिति भावः। ४

अथेन्द्रवज्रया तदाशां वर्णयति—

रागप्रवालैस्तिमिरद्विरेफैस्तारप्रसूनैरुपशोभमाना।
आशालतेवायतलोचनायाः सन्ध्या ततः काचिदुपाजगाम॥५

रागेति—रागः प्रीतिः ओष्ठरक्तिमा वा प्रवाला इव त एव प्रवालाः तैः। तिमिरद्विरेफैः तिमिरं भ्रूकुटीकृष्णता त एव द्विरेफाः भ्रमराः तैः। तारा नेत्रकनीनिका ता एव प्रसूनानि पुष्पाणि तैः उपशोभमाना शोभायमाना लतेवोपशोभमाना आशा इदानीं मे प्रियसंगो भवेदिति इच्छा तत एवं शोभायमाना सन्ध्या सन्ध्याकालः काचित् विशेषशोभोत्पादानर्थंमुपाजगाम प्राप।५

तत्कालीनवर्णनमाह—

शय्यामम्बरभूरुहः किसलयैः सन्ध्यारुचिच्छद्मना,
[3]तेने वा किमु पद्मबन्धुविरहव्यग्रा हरिद्वारुणी।

१—निदधे ख। २—तेने ख। ३—व्यातेने ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तारास्तोमरुचिं वहन्ति यदमी वृन्तेषु तेषामिव,
क्षीरक्षोदकलापकोमलरुचो लग्ना पयोबिन्दवः ॥६

शय्यामिति—अम्बरभूरुहः भूरुट् वृक्षः अम्बरभूरुट् कल्पतरुः तस्य सन्ध्यारुचिच्छद्मना सन्ध्याकान्तिमिषेण किसलयैः पुष्पकेसरैः शय्यां तेने विस्तारयाञ्चकार । वा पद्मबन्धुः सूर्यः तस्य विरहो वियोगजन्यं दुःखं तेन व्यग्र उदासीना हरिद्वारुणी पश्चिमदिक् किमु किम् इति प्रश्ने उ इति वितर्के यत् यस्मात् अमी पुष्पसमूहाः वृन्तेषु तेषां पुष्पाणामेवेव । तारास्तोमरुचिं तारा नक्षत्राणि तेषां स्तोमाः समूहाः तेषां रुचिं शोभां वहन्ति धारयन्ति । तत्र क्षीरक्षोदकलापकोमलरुचः क्षीरक्षोदः क्षीरसमुद्रकल्लोलोत्पन्नः फेनः तस्य कलापः समूहः तस्येव कोमला रुचिः कान्तिर्येषां ते तथा पयोबिन्दवः उदकसीकराः लग्नाः संलग्नाः ।६

पुनः सहेतुकमुत्प्रेक्षति—

वारुण्या किमु तिग्मभानुविरहव्याधिव्यथाखिन्नया,
सन्तापोपशमाय काऽपि दलिता रम्भेति सम्भाव्यते ।
तस्याः गर्भदलं निशाविगलितं [1]पाथः पुनः कौमुदी,
कर्पूरं किमु तारका हिमकरं [2]कन्दं किमुन्मीलति ॥७

वारुण्येति—तिग्मभानुविरहव्याधिव्यथाखिन्नया—तिग्मस्तीक्ष्णः स चासौ भानुः तस्याः विरहव्याधिः वियोगदुःखं तेन या व्यथा पीडा तया खिन्ना कष्टीभूता तथोक्ता तया वारुण्या वरुणदेवताकया दिशा पश्चिमदिशा, सन्तापोपशमाय वियोगजन्यमदनोत्पन्नतापशमाय कापि काचित् रम्भा कदली दलिता त्रोटिता किमु इति सम्भाव्यते तर्क्यते । तस्याः कदल्याः गर्भदलात् अन्तःपर्णात् निशाविगलितं रात्रौ स्यन्दितं पाथः उदकं सा ज्योत्स्ना इति किमु तर्क्यते इत्यर्थः । तारकाः नक्षत्राणि कर्पूरं कर्पूररूपेण हिमकरं चन्द्रं कन्दं कन्दरूपेणोन्मीलति प्रापयति ।७

•

१—धृत्वा ख । २—कुन्दम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[1]अथ सप्तदशप्रबन्धो वसन्तरागेणैकतालीताले गीयते—

अधुना निशामिव पार्वतीं वर्णयति—

किसलयशयनसुगुप्तशशीसुललितकरतलकृतमुखभागा ।
अनुदिनपुरहर[2]चरणस्मरणप्रकटीभवदनुरागा ॥८
[3]दृष्टा पुररिपुणा ! विकसितकुवलयलोचना ॥ ध्रुवपदम्

किसलयेति—किसलयानां पुष्पपरागाणां यच्छयनं शय्या तस्यां सुगुप्तः सुसंरक्षितः चन्द्रसादृश्यात् सुललितः सुन्दरो मुखभागो यया सा तथोक्ता अनुदिनं दिने दिने पुरहरस्य शङ्करस्य चरणौ पादौ तयोः स्मरणं भजनं तेन प्रकटीभवद् स्पष्टीभवत् अनुरागः प्रीतिर्यस्याः । तत्स्मरणेन तस्मिन्नेव प्रीतिं दर्शयतीत्यर्थः । एतादृशी पुररिपुणा शिवेन विकसितकुवलयलोचना प्रफुल्लपद्मे इव लोचने नेत्रे यस्याः एतादृशी च पार्वती दृष्टा वर्तमानसामीप्ये वर्तमानवद् वा अथवा ध्याता एवमग्रेऽपि ।१

विधिकृतकुरवककुसुमदृष्टि[4]मिव घर्मजलं बिभ्राणा ।
निपतितरसतरुपुनरङ्कुरमिव तनुपुलकं विदधाना ॥२

विधिकृतेति—विधिकृतं सृष्टिकृता कृतं यत्कुरवककुसुमं शोणशेवन्तिकापुष्पं विधिकृतमिति विशेषणदानेन सौन्दर्यातिशयत्वं ध्वन्यते । तस्य दृष्टिः सौन्दर्यदर्शनम् । हेमन्ते च प्रातः प्रफुल्लेषु कुरुबकादिपुष्पेषु यथा हिमबिन्दुभिः सौन्दर्यातिशयेन द्रष्टृणां दृष्टेरतीवानन्दोत्पादनं तथा घर्मजलं घर्मोदकबिन्दून् बिभ्राणा धारयित्री । निपतितो नितरां पतितः रसतरुः आम्रतरुः तस्य पुनरङ्कुरः तमिव तनुपुलकं शरीरे रोमाञ्चं विदधाना धारणकर्त्री दृष्टेति । शेषं सुगमम् ।२

गिरिशमौलिशशिचकिततिमिरमिव चिकुरं संयमयन्ती ।
प्रियतमशकुनमीनमिव लोचनमध्वनि किमपि नयन्ती ॥३

गिरिशेति—गिरौ शेते गिरिशः तस्य मौलिर्मस्तकं तस्मिन् यः शशी चन्द्रः तेन भीतः यस्तिमिरोऽन्धकारः तमिव चिकुरं केशपाशं संयमयन्ती धारयन्ती । प्रियतमः पतिः शकुनमीनगमनं सुवेलादर्शकं मीनं मच्छनामकं राशिमिव

१—रामग्रीवैशाखसारङ्गसामेरीरागेण गीयते इति ख । २—नाम ख । ३—दृष्टा गौरी ख । अयमेव पाठः समीचीनः । ४—वृष्टिम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदपि युग्ममेव किमपि कथं तर्हि अध्वनि मार्गे नयन्ती कदाऽऽगच्छति आगतो नेति च द्रष्टुमित्यर्थः ।३

अद्य भविष्यति दयितविलोकन[1]मिव चेतसि कलयन्ती ।
अमृतपयोनिधिविहरमाणमिव मानसमाकलयन्ती ॥४

अद्येति—अद्य दयितविलोकनं पतिदर्शनं भविष्यति इति चेतसि कलयन्तीव जानन्तीव, अतः अमृतपयोनिधि विहरमाणम्, अमृतसमुद्रं क्रीडनकर्तृ एव मानसम्, आकलयन्ती ध्यायन्ती ।४

त्वरित[2]मुपैति चरमधरणीधरमिति तपनाय वहन्ती ।
भुवनमलङ्कुरु न कुरु विलम्बनमिति रजनी निगदन्ती ॥५

त्वरितमिति—शिव इति शेषः त्वरितं त्वरया उपैति प्राप्नोति—इति चरमधरणीधरम् कैलासं तपनाय सवितारं प्रेषयितुं वहन्ती धारयन्ती। भुवनं गृहमलङ्कुरु, दीपादिभिः शोभमानं कुरु विलम्वं वेलातिक्रमणं न कुरु त्वरया कुर्वित्यर्थः। इति रजनीं रात्रिं निगदन्ती भाषणं कुर्वन्ती ।५

कथयितुमेति गिरिशमिति पथिजनमाशु[3]गतं पश्यन्ती ।
किमु कथयति पतिगतिमिति कर्णं जनवचसि न्यस्यन्ती ॥६

कथयितुमिति—गिरिशं कथयितुं गिरिशस्थितिं ज्ञापयितुं एति आगच्छति इति पथि मार्गे आशुगतं शीघ्रगन्तारं जनं दूतं पश्यन्ती। पतिगतिं शङ्करवर्तमानं किमु कथयति इति हेतोः जनवचसि लोकभाषणे कर्णं श्रोत्रं न्यस्यन्ती श्रवणार्थं क्षेपयन्ती । ६

वामविलोचनललितस्यन्दं सानन्दं कथयन्ती ।
प्रियतमपथमपि [4]केवलनिकेतनमपि कपटेन भजन्ती ॥७

वामेति—वामविलोचननलिनस्यन्दं वामनेत्रकमलस्फुरणं सानन्दम्, आनन्दयुक्तं कथयन्ती । प्रियतमपथं पतिमार्गं कपटेन नाममात्रतः केवलनिकेतनं गृहं भजन्ती । तस्याः गृहे वसतिर्लोकदृष्ट्या वस्तुतस्तु मार्गे एव स्थितेत्यर्थः । ७

१—इति ख । २—उपैहि रमण ख । ३—गता ख । ४—केलि ख । अयमेव पाठस्समीचीनः । केवलनिकेतनपाठस्वीकारे गीते गतिभंगो भवति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भानुदत्त कवि[1]लपितमिदं शृणु न कृश[2]मिदं कुरु देहम् ।
सुकृतमहीरुहफलमिदमुदयति किमिति वहसि सन्देहम् ॥८

भान्विति—इदं पद्यस्थं भानुदत्तकविलपितं भानुदत्तेन कविना गीतं शृणु श्रवणं कुरु इदं देहं कृशं मा कुरु। हेतुमाह—इदं सुकृतमहीरुहफलम् उदयति पुण्यवृक्षस्य फलं उदयति प्राप्नोति इति अतः सन्देहं किमु वहसि मा सन्देहं कुर्वित्यर्थः ।८

यामस्ते पुनरेवमस्तु वनितावृन्दस्य पुण्यप्रसू-
र्यन्त्राज्ञा[3]नचरः समेत्य शमयेद् बाधामगाधां प्रियः ।
मातर्यामिनि ! मा पुरेव जनयेः किन्तु स्मरक्ष्मापति-
र्ज्यानिर्घोषकठोरकोपदहनज्वालाजटाला दिशः ॥९

याम इति—ते यामः प्रहरो वेलेत्यर्थः पुनरेवं पूर्वमिव सुखदातृ कथं वनितावृन्दस्य स्त्रीसमूहस्य पुण्यप्रसूः पुण्योत्पादी अस्तु भवतु । तदाह यत्र यस्मिन् यामे अज्ञानचरो गुप्तचरो लोकादृष्ट इत्यर्थः । प्रियः शिवः समेत्य प्राप्य अगाधां बाधाम्, अनन्तां पीड़ां शमयेत् शान्ति करोतु मातः ! यामिनि ! मातृवत् पालयितृ सुखदत्वेनेत्यर्थः रात्रे ! पुरेव पूर्ववत् स्मरक्ष्मापतिः स्मरराट् दिशः कर्म ज्यानिर्घोषकठोरकोपदहनज्वालाजटालाः ज्या धनुर्मौर्वी तस्या निर्घोषः रणत्कारः तेन कठोरः तीक्ष्णः कोपदहनः क्रोधाग्निः तस्य याः ज्वालाः ताभिः जटालाः भयङ्कराः मा जनयेः मा करोतु ।९

एवमाभाष्य विजया सखी शङ्करभवनादागता कथयति—

सान्द्रानन्दसुधास्यन्दसन्दोह[4]सुलभं वचः ।
[5]आलिः स्मरदृशालीढमानसामिदमब्रवीत् ॥१०

सान्द्रेति—आलिः विजया नाम्नी पार्वतीदासी स्मरदृशा मदनदृष्ट्या आलीढं कर्षितं मानसं मनो यस्याः एतादृशी पार्वती सान्द्रः स्निग्धः प्रीतियुक्तो

१—लिखितम् ख । २—इयम् ख । ३—अज्ञातचरः ख । ४—निवहम् ख ।
५—आलिस्मरशरालीढ ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यः आनन्दः सैव सुधा सुखोत्पादकत्वेन सादृश्यं स्यन्दः प्रस्रवणं तस्य सन्दोहो यथेच्छं प्राप्तिः अतः सुलभम् । वचो भाषणम् इदम्, एवं प्रकारेण अब्रवीत् उक्तवती ।१०

०

[1]अथ अष्टादशप्रबन्धो वसन्तरागेणाऽऽडवताले गीयते—

तदाह प्रबन्धेन—

विरचयहारं प्रसरतु तारं मदनयशो महनीयम् ।
फलमनवरतं कलयतु सुकृतं सकलभुवनकमनीयम् ॥१
विसृज विषादं मुञ्च विवादं च त्यज खरनिःश्वासम् ॥ ध्रुवपदम्

विरचयेति–हे पार्वति ! हारं रचय शिवपूजनाय हारं कुरु अथवा अलङ्कार-धारणं कुरु तारं उच्चैस्तरत्वेन महनीयं पूज्यं मदनयशो मदनजयः प्रसरतु । सुकृतं प्राक्तनं पुण्यं सकलभुवनकमनीयं सकले जगति कमनीयं सुन्दरत्वेन वर्णनीयम्–इष्टं वा फलं कलयतु प्राप्नोतु, अतो हे सखि ! पार्वति ! विषादं खेदं विसृज मुञ्च, विवादं विसंवादं भाषणं मुञ्च मा कुरु च खरनिःश्वासं तीक्ष्ण-श्वासं त्यज, मा भूत् तव क्रोधातिशय इति भावः । एवमग्रेऽपि ।१

लोचनकमलैरविरलममलैरर्चय मनसिजदेवम् ।
चन्दनललितैरपि [2]दहरसितैर[3]नुलेपय बहुसेवम् ॥२

लोचनेति—हे सखि ! अमलैः स्वच्छैः लोचनकमलैः नेत्रकमलैः अविरलं सान्द्रं सन्ततं मनसिजदेवं मदनमर्चय पूजां कुरु। अपिः समुच्चये परञ्च दहरसितैः हृदयस्वच्छैः चन्दनललितैः गन्धोत्तमैः बहुसेवं बहु सेवा यस्मिन् कर्मणि यथा तथा अनुलेपय लेपनं कुरु ।२

सरसिजवदने ! केलीसदने रचय चरणविन्यासम् ।
[4]इयमपि सहसा हिमकरमहसा वहति निशापरिहासम् ॥३

सरसिजेति—सरसिजवदने ! कमलमुखे ! केलीसदने क्रीडास्थानभूते

१—कर्णाटकीनटभैरवीरागेण गीयते इति ख । २—दरहसितैः ख । ३—अवलेपय क । ४—इदमपि सहसा सह हिममहसा रचयति निशि ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चरणविन्यासं चरणक्षपणं कुरु चल । इयं निशाऽपि हिमकरमहसा चन्द्रज्योत्स्नया सहसा अश्रमं परिहासं वहति करोतीति भावः ।३

स्मरमदकरणे ! मुखहिमकिरणे ! कलय तिलकमवदातम् ।
त्रिभुवनहारी हिमकरधारी सुखमावहतु [१]निशान्तम् ॥४

स्मरेति—हे स्मरमदकरणे ! स्मरस्य मदोत्पादनकर्त्री तत्सम्बुद्धिः । मुखहिमकिरणे ! मुखं हिमकिरणः चन्द्र इव यस्याः सा तत्सम्बुद्धिः । अवदातं निर्मलं तिलकं रचय कुरु तेन त्रिभुवनहारी त्रिजगद्दोषहरो लयंकारी वा हिमकरधारी चन्द्रधारणकर्त्ता चन्द्रमौलिरित्यर्थः । निशान्तं रात्रौ सुखमावहतु स्वयं त्वया साकं सुखानुभवयुक्तो भवत्वित्यर्थः । ४

नन्दय सदयं पुरहरहृदयं जनय विलोचनरङ्गम् ।
रतिरसनिलयं योजय [२]वलयं नर्तय सततमनङ्गम् ॥५

नन्दयेति—सदयं दयायुक्तं पुरहरहृदयं शङ्करमनो नन्दय आह्लादय आनन्दयुक्तं कुर्वित्यर्थः । विलोचनरङ्गं लोचनरागं रतिरसनिलयं जनय कुरु । वलयं योजय धारय हस्ते इति शेषः अनङ्गं मदनं सततं निरन्तरं नर्तय नर्तनं कारय । भवत्याः शिवेन संयोगे किं भवेत् तद्बाणताडनेन किन्तु सुखमेव ।५

लोचनयुगले निर्जितकमले कुरु कज्जलमभिरामम् ।
मनसिजलघिमा [३]खञ्जनमहिमा द्वयमपि [४]भवतु विरामम् ॥६

लोचनेति—निर्जितकमले निर्जितं कमलं सरोजं येन एतादृशं लोचनयुगलं लोचनयुग्मं तस्मिन् अभिरामं सौदर्यं यथा तथा कज्जलं कुरु मषीं रचय तेन मनसिजलघिमा मदनस्य बाणताडनविषये चापल्यं लाघवं, त्वन्नेत्रापाङ्गचापल्येन । तथा खञ्जनमहिमा खञ्जनमहत्त्वं च द्वयं लघिममहिमयोर्द्वयं विरामं वहतु पराजितं भवत्विति भावः ।६

१—निशातम् ख । अयमेव पाठस्समीचीनः २—नयनम् ख । ३—सखिजनमहिमा ख । ४—भजतु ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुरु ताटङ्कद्वयमविशङ्कं स्मरशररभसनिधानम् ।
गुरुभृगुमध्ये निवसति मुग्धे ! विधुरिति भवतु वितानम् ॥७

कुर्विति—स्मरशररभसनिधानं स्मरस्य मदनस्य शराः बाणाः तेषां रभसो वेगः तस्य कारणम्, यस्मिन् दृष्टे स्मरो वेगेन शिवं चेतयेदिति भावः । तत्ताटङ्कद्वयं यत् बाह्वोः भूषणद्वयम्, अविशङ्कं यथा तथा कुरु । हे मुग्धे ! तेन गुरुभृगुमध्ये गुरुशुक्रयोर्मध्ये विधुर्वसति चन्द्रः तिष्ठति इति, इति लोकेषु या शोभा गीयते इति तत् वितानं तुच्छं भवतु तदपेक्षया त्वं ताटङ्कद्वयेन शोभसे 'वितानं त्रिषु तुच्छके मन्दे' इत्यमरः ।७

इति निरवद्यं निगदति हृद्यं भानुरपाकुरु खेदम् ।
पतिरुपगन्ता मधुरनुमन्ता परिहर चेतसि भेदम् ॥८

इतीति—भानुः निरवद्यं अगर्ह्यं हृद्यं मनोमोदकरम् इति जयाभाषणं निगदति वन्धनेन वदति । अतः खेदं खिन्नताम्, अपाकुरु । पतिः शिवः उपगन्ता समीपं याता तत्र मधुर्वसन्तोऽनुमन्ता सम्मतिदायकः । अतः चेतसि मनसि भेदं शङ्कां परिहर मा कुरु ।८

एवं शङ्करं प्रति कृतगमनायां पार्वत्यां तदुत्साहमाह—

कटाक्षकुसुमाञ्जलिं किरति चक्षुरेणीदृशो,
मुखेन्दुरमृतद्रवैर्विहसितैः पुरः सिञ्चति ।
स्वनैः कनकमेखला पठति किञ्च नान्दीमिमा-
मुमापरिवृढे समागतवति स्मरो नृत्यति ॥११

कटाक्षेति—एणीदृशः एण्याः हरिण्याः दृग् इव दृष्टिर्यस्याः सा तस्याः पार्वत्याः चक्षुः नेत्रं कटाक्षकुसुमाञ्जलिं कटाक्षदृष्टयः एव कुसुमानि तेषामञ्जलिः समासे परिमाणमात्रे प्रथमा । अञ्जलिपरिमाणानि किरति विकिरति विक्षेपयतीत्यर्थः । मुखेन्दुः मुखचन्द्रः पुरोऽग्रे अमृतद्रवैः अमृतबिन्दुयुक्तैः विहसितैः हसनैः पुरोऽग्रे सिञ्चति सिञ्चनं करोति । कनकमेखला सुवर्णस्य काञ्ची स्वनैः शब्दैः इमां शब्दरूपां नान्दीं गमनकालीनं शुभं मङ्गलं पठति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एवमुमा पार्वती परिवृढे शङ्करमालिङ्गितुं समागतवती आगच्छत् । तदा स्मरो नृत्यति नृत्यं करोति स्वकीयवाणविषयत्वादिति भावः ।११

निर्दग्धं लास्यमेतस्या सन्तापशिखिधारया ।
सिन्दूरतिलकव्याजात् पुनरङ्कुरमादधे ॥१२

इति भानुदत्तविरचिते
गीतगौरीपति[1]महाकाव्ये
अष्टमसर्गः ।८

निर्दग्धमिति—एतस्याः पार्वत्याः सन्तापशिखिधारया सन्तापः क्रोधः स एव शिखी अग्निः तस्य धारा तैक्ष्ण्यं तया लास्यं नर्तनं दग्धम् । तल्लास्यं पुनः सिन्दूरतिलकव्याजात् सिन्दूरतिलकमिषेण अङ्कुरमादधे धारयामास ।१२

समाप्तष्टीकायां
अष्टमसर्गः ।८

卐

1—काव्ये फ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नवमसर्गः

एवं परस्परदर्शने परस्परसङ्केतादि सखीमध्यस्थत्वं च वर्णयति—

उक्ता भ्रूसंज्ञया नम्रमौलिना चन्द्रमौलिना ।
पार्वतीं बिभ्रतीं [1]वाचमुवाच त्वरया जया ॥१

उक्तेति—नम्रमौलिना नम्रः नतो मौलिर्मस्तकं येन स नम्रशिरस्केन चन्द्रमौलिना शिवेन भ्रूसंज्ञया भ्रूचिह्नेन उक्ता ज्ञापिता जया एतन्नामिका सखी वाचं बिभ्रतीं तूष्णीभूतामित्यर्थः पार्वतीमुवाच उक्तवती ।१

[2]अथैकोनविंशप्रबन्धो देशाङ्करागेण रूपकताले गीयते—

तदेतत् प्रबन्धेनाह—

पतिरनुनयति वदति पटु सततम् ।
किमितरदपि वा सुन्दरि ! सुकृतम् ॥१
शङ्करे मा कुरु कोपं विनयपरे ॥ ध्रुवपदम्

पतिरिति—हे सुन्दरि ! तव पतिः शिवः पटु यथा तथा सततं अनुनयति त्वां मानयति, अतः इतरत् एतद्भिन्नं तव सुकृतं किम् । अतः विनयपरे नतियुक्ते शङ्करे कोपं क्रोधं माकुरु, सारल्येन भाषणं कुर्वित्यर्थः ।१

शिवमवलोकय विरचय [3]सकलम् ।
सहजसुभगरुचि लोचनयुगलम् ॥२

शिवमिति—हे पार्वति ! सहजसुभगरुचि सहजं जात्यैव सुभगरुचि सौन्दर्यं कान्तियुक्तं यस्य तादृशं लोचनयुगलं लोचनद्वयं सकलं कलया कान्त्या सहितं विरचय कुरु मा वक्रं याहि किन्तु शिवमवलोकय सारल्येन पश्येत्यर्थः ।२

१—मानम् ख । २—'आसावरीरागेण गीयते' एतमात्रम् ख ।
३—सफलम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उदयति पुलकपटलम[1]पि सततम् ।
पुररिपुरेष हसिष्यति [2]नियतम् ।।३

उदयतीति—पुलकपटलं रोमाञ्चसमूहः सततं निरन्तरम् उदयति उदेति तेन एषः पुररिपुः शिवो नियतं निश्चयेन हसिष्यति ।३

यदि कोपं करिष्यसि तर्हि सर्वतो विफलत्वमाह—

जनुरपि दिनमपि लवमपि विफलम् ।
यत्र प्रेमणि चेतो विकलम् ।।४

जनुरपीति—यत्र ययोर्दम्पत्योः प्रेमणि प्रीत्या चेतोऽन्तःकरणं विकलम् । औदासीन्येन विद्यते तत्र तयोरिति शेषः । जनुरपि सर्वं जन्माऽपि विफलं निष्फलम् नन्वस्तु जन्मवैफल्यं कानिचिद्दिनानि भविष्यन्ति सफलानीति चेन्नेत्याह—दिनम्, एकोऽपि दिवसः सफलं न । तत्र क्षणोऽपि सफलो न इत्याह—लवमपीति ।४

त्वमपि [3]विमृश्यसि निर्मलमनसा ।
अभिमतमेव भविष्यति सहसा ।।५

त्वमिति—त्वमपि निर्मलमनसा शुद्धान्तःकरणा यदा भविष्यसि तदा विमृश्यसि विषादं प्राप्नोषि । तदा अभिमतमेव इष्टं भविष्यति तर्हीदानीं मद्भाषणमनुवर्तयेति भावः ।५

किमिति न पश्यसि निजवपुरलसम् ।
कर्म विधेयं परिणतिसुरसम् ।।६

किमिति—निजवपुः तव स्वकीयं शरीरम्, अलसम् आलस्ययुक्तम् इति न पश्यसि त्वं स्वयं मदनबाधाबाधितेति न जानासि किमित्यर्थः । अतः परिणतिसुरसं परिणत्या नम्रतया सुरसं सुष्ठु रसाः शृङ्गारादयो यत्र एतादृशं कर्म विधेयम् कार्यम् ।६

[4]शोणरुचं न च विरचय वदने ।
किमपि न[5]सिध्यति वैरिणि मदने ।।७

शोणेति—वदने मुखे शोणरुचं कृष्णकान्तिं न च विरचय आविष्कुरु प्रफुल्लित-

१ अति ख । २—नयनम् ख । ३—विमृश सखि ! सुचिरम् ख । ४—शोणरुचिम् ख । ५—सखि ! ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वदना भवेत्यर्थः। एवं यदि करिष्यसि तर्हि मदनः ते वैरी स्यात् तदा किं स्यात्तदाह मदने वैरिणि सति किमपि न सिद्ध्यति सिद्धं भवति ।७

वदति भानुकविरिति मधुरजनी ।
विहसति मानसवति ! मदशमनी ॥८

वदतीति—भानुकविः भानुदत्तो वदति हे मानसवति ! अन्तःकरणयुक्ते ! मदशमनी मदशमनकर्त्री विहसति हास्यं करोति, यदि त्वं मत्ता भविष्यसि तर्हि मधुरजनी पीडयिष्यतीति भावः ।८

प्राणेशस्य प्रभवति मनःप्रेम हेमप्रसूनं,
चेतश्चूतं दृगपि कमलं जीवनं [1]जीवबन्धुः ।
आशासूत्रे ग्रथितमखिलं वेधसा ! तस्य भङ्गे,
स्यादेतेषामपि निपतनं गौरि ! मानं विमुञ्च ॥३

पुनराह प्राणेशस्येति—प्राणेशस्य शिवस्य मनः प्रेम मानसप्रीतिः हेमप्रसूनं सुवर्णपुष्पं यथा तथा प्रभवति चेतो मनः चूतम्, आम्रपुष्पम्, अपि समुच्चये, दृग् दृष्टिः कमलं, जीवनं जीवः जीवबन्धुः बन्धुजीवः शैवन्तिका वेधसा ब्रह्मणा अखिलम् एतत् सर्वं यथोक्तं पुष्पाणीति मत्वा आशासूत्रे आशारूपे दोरके ग्रथितं प्रोतम्। अतः तस्याशासूत्रस्य भङ्गे एतेषां सर्वेषां निपतनं नाशः स्यात् । अतः मानं विमुञ्च तूष्णीं मा भूः, आशापूर्तिं कुर्विति भावः ।३

पुनरपि प्रार्थयत्याह—

दीर्घं न श्वसितं निधेहि यदसौ प्रेमद्रुमो वेपते,
वक्त्रं दर्शय[2]जायतां स्मृतिभुवश्चन्द्रानुकूलं दिनम् ।
गौरि ! ब्रूहि [3]यदस्तु कोकिलकलक्वाणैर्वसन्तभ्रम-
श्चक्षुर्विक्षिप पुष्पवृष्टिरतनोर्मौलौ समुन्मीलति ॥४

दीर्घं नेति—हे गौरि ! दीर्घं श्वसितं श्वासं न निधेहि मा कारय यद्यस्मात् असौ प्रेमद्रुमः प्रेमरूपस्तरुः वेपते कम्पते दीर्घश्वासेनेत्यर्थः । वक्त्रं मुखं दर्शय तेन स्मृतिभुवो मदनस्य चन्द्रानुकूलं चन्द्रेणानुकूलं यथा तथा दिनं दिवसः जायताम्,

१—बन्धुजीवम् ख । २—जायते स्मरभुवः ख । ३—यदस्ति ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य बाणताडनेऽद्य सुमुहूर्तो भवतु । ब्रूहि भाषणं कुरु यद्यस्मात् भाषणात् कोकिलकलक्वाणैः कोकिलस्य कलो रुतं तस्य क्वाणाः शब्दाः तैः वसन्तभ्रमः वसन्तर्तुदिनशङ्का अस्तु । तव कोकिलवच्छब्देन वसन्तभ्रमात् मदनसामग्री सर्वोपस्थिता स्यात् । तथा च चक्षुर्विक्षिप च कटाक्षान् प्रेरय । येनातनोः मदनस्य मौली मस्तके पुष्पवृष्टिः समुन्मीलति प्रफुल्ला भवेत् ।४

एवमुक्त्वा विरतायां जयायां शङ्करभाषणमुपक्रमते—

आनन्दकन्दे जगदेकवन्द्ये चन्द्रे समुन्मीलति कुन्दभासि ।
पुरद्विषा मन्मथराजधानी विस्तार्य पाणी जगदे भवानी ।।५

आनन्देति—आनन्दकन्दे आनन्दोत्पादनकारणे जगदेकवन्द्ये सर्वेण जगता एकोऽद्वितीयो वन्द्यः पूज्यः तस्मिन्, कुन्दभासि कुन्दस्येव भाः कान्तिर्यस्यैताद‍ृशे चन्द्रे कामोद्दीपके इत्यर्थः पुरद्विषा त्रिपुरविजयिना शिवेन कर्त्रा पाणी हस्तौ विस्तार्य प्रस्तार्य आदरेणेत्यर्थः । मन्मथराजधानी मन्मथस्य राज्ञः वसतिस्थानमिव भवानी पार्वती कर्म जगदे उक्ता ।५

●

अथ[1] विंशः प्रबन्धो मालवरागेणैकतालीताले गीयते—

तच्छिवभाषणं प्रबन्धेनाह—

वद किमपि जायताममृतरसवाहिनी परिणमतु मधुरमधुधारा ।
तनुरतनुलीलया पुलकमवगाहतां पटु नटतु मम नयनतारा ।।१

कमलदललोचने ! विरचय न रोषम् ।
मदनशरपावको भवति तनुपावको,
वहसि कथमुरसि न तोषम् ।।ध्रुवपदम्

वदेति—हे पार्वति ! किमपि वद किञ्चिदपि भाषणं कुरु तेनामृतरसवाहिनी पीयूषोदकनदी जायताम्, उत्पन्ना भवतु तया मधुरमधुधारा तेन भाषणेन मधुरा या मधुधारा सा परिणमतु विलयं प्राप्नोतु, तथा च अतनुलीलया मदनक्रीडया तनुः शरीरं पुलकं रोमाञ्चमवगाहतां रोमाञ्चयुक्तं भवत्वित्यर्थः मम मदीया नयनतारा नेत्रस्था कनीनिका पटु यथा तथा नटतु नृत्यतु । णट्

१—सामेरीरागेण गीयते इति ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नृत्ती। हे कमलदललोचने !कमलपत्रनेत्रे ! रोषं क्रोधं न विरचय मा कुरु। यदि त्वं रोषं करोषि तदा किं स्यात्तदाह मदनशरपावको मदनबाणोत्थिताग्निः तनुपावको शरीरदाहकः भवति। एवमपि उरसि मनसि तोषं तुष्टिं कथन्न वहसि धारयसि मा कुरु रोषमित्यर्थः।१

विरचय दृगञ्चलं [1]स्मरसमरचञ्चलं हरकमलदलमधुरिमाणम्।
[2]विकलय मदालसभ्रमरमधुमाधुरीं शिथिलय चकोरमहिमानम्॥२

विरचयेति—स्मरसमरचञ्चलं मदनयुद्धार्थं चञ्चलं दृगञ्चलं नेत्रकटाक्षं विरचय कुरु मां पश्येत्यर्थः। कमलदलमधुरिमाणं कमलदलस्य मधुरिमाणं सौन्दर्यं हर, अपनय, तत्सौन्दर्यंतस्तव नेत्रसौन्दर्यमधिकमित्यर्थः। मदालसभ्रमरमधुमाधुरीं मदेन मधुपानजनितोन्मादेन अलसो मन्दः स चासौ भ्रमरश्च तस्य मधुनो मकरन्दस्य माधुरी मधुरिमा तां विकलय निःसत्त्वां कुरु। त्वद्भाषणेन तन्माधुर्यं नष्टं भवेत्। चकोरमहिमानं रात्री चन्द्रोदये चकोराः ज्योत्स्नाकरम्भं भक्षयन्ति तत्तव दृगञ्चलप्रकाशेन ते चन्द्रिकाभ्रमेण तत् प्रकाशं भक्षयितुमायान्ति ज्योत्स्नाभावाच्च तेषां ज्योत्स्नाभक्षणमहिमा शिथिलो भवेदिति भावः। मां नेत्रकटाक्षेण पश्येत्यर्थः।२

[3]लुलितमणिकुण्डलं वदनशशिमण्डलं किमिति विनियमसि [4]वारम्।
अथ रजनिनायको धृतललितखेटको रचयतु धरणिवलयचारम्॥३

लुलितेति— लुलिते लोलायमाने मणीनां हीरकादीनां कुण्डले कर्णालङ्कारौ यस्मिंस्तत् तथोक्तं वदनशशिमण्डलं मुखचन्द्रं वारं वारं पुनः पुनः किं विनियमसि संयमयसि चञ्चलं न करोषीत्यर्थः। एवं यदि न करोषि तर्हि दोषमाह अथेति-हेतौ एवं यदि करोषि चेत्, रजनिचरनायको रात्रिचरनायकश्चन्द्रः रजनिचरनायकेत्यनेनैतस्य रक्षोवत्क्रौर्यं सूचितम्। धृतललितखेटको धृतो गृहीतो ललितं सक्रीडं खेटकः करवालो येन स एतादृशः सन् यदि त्वं स्वकीयं मुखमण्डलं नियमयसि तर्हि चन्द्रः शत्रोरभावात् मत्तो भूत्वा लोकान् पीडयतीति भावः। धरणिवलयचारम्-पृथ्वीमण्डलसञ्चारं रचयतु। अत एवं मा कुर्विति भावः।३

१—स्मररस ख। २—विफलय मदालसा ख। ३—ललित ख। ४—बहुवारं ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हास्यप्रार्थनामाह—

इदमपि न [1]यौक्तिकं सृजति गजमौक्तिकं यदिदमपि नीलमरविन्दम् ।
स्मितकिरणधोरिणी[2] मम नयनपारिणी भवति यदि सुकृत[3]मनवद्यम् ॥४

इदमपीति–इदं यौक्तिकं युक्त्या हासस्य कृतमित्यर्थः । गजमौक्तिकं गजगण्ड-मुक्ताफलं न चेत्तर्हि इदमपि नीलमरविन्दं नीलं कमलमपि न प्रभवतीति भावः । यथा चन्द्रोदये नीलं कमलं प्रफुल्लं भवेत्तथा भवत्विति यावत् । स्पष्टार्थमाह स्मितेति—तव स्मितकिरणधोरिणी हास्यकिरणवल्ली मम नयनपारणी भवति नयनयोः पारणं दुःखतो मोचनं तत् अतत्तत् भवति नयनपारणीभवति । तद्वत् सुखदातृ भवतीत्यर्थः । यद्यनवद्यम्, अनिन्द्यं सुकृतं पुण्यं भवेत्तर्हीति शेषः ।४

कथमपि न मन्यसे यदि न किञ्चिदीहसे गृहाण मुकुटतुहिनभासम् ।
कलय परिरम्भणं रचय परिचुम्बनं देहि[4]देहि रतिपतिहासम् ॥५

कथमपीति—यदि मामिति शेषः । कथमपि केन प्रकारेणापि न मन्यसे न ज्ञायसे अकिञ्चनत्वादिति भावः । अथवा यदि किञ्चिदीहसे इच्छसि चेत् तुहिन-भासम्, हिमवद्देदीप्यमानं मुकुटं शिरोभूषणं गृहाण । अथ च परिरम्भणम्, आलिङ्गनं कलय कुरु परिचुम्बनं वक्त्रसंयोगं रचय कुरु । रतिपतिहासं मदनस्य हास्यं देहि देहि, अतिशयेनोत्पादय । क्रीडया मदनस्यानन्दोत्पादकत्वात् क्रीडां कुर्विति भावः ।५

त्वमसि दृशि चन्द्रिका त्वमसि हृदि मालिका त्वमसि मम चेतसि पटीरम् ।
सकलगुण[5]सुन्दरि ! प्रणयतरुमञ्जरी [6]क्षिपसि किङ्करमधीरम् ॥६

त्वमसीति—हे पार्वति ! त्वं मे दृशि विषये चन्द्रिकाऽसि आनन्ददातृ-त्वादिति भावः । हृदि हृदयविषये मालिका हारः असि । आलिङ्गनेन स्पृश्यमा-नत्वादिति । त्वं मम चेतसि पटीरं मन आकर्षणेत्यर्थः हे सकलगुणसुन्दरि ! सकलगुणैः शोभने प्रणयतरुमञ्जरीं प्रीतिवृक्षस्य मञ्जरीं बीजसमुदायरूपां वल्लरीं बीजवत्पुनः पुनर्वृक्षजनकत्वात् मयीति शेषः । करं हस्तमधीरं यथा तथा शिथिल-

१—मौक्तिकं ख । २—धारिणी ख । ३—मपिवन्द्यम् ख ४—रतिर-सहासम् ख । ५—सुन्दरी क । ६—त्वमसि क्षिपसि करमधीरम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येत्यर्थः। किं क्षिपसि प्रेरयसि तर्ह्येवं मा कुरु धैर्यावलम्बनेन दृढतरं मामालिङ्गयेरिति भावः।६

ननु तव मनसि भुजङ्गाद् भीतिश्चेत्तदाह—

यदि भवति मानसी भीतिरपि भूयसी करोमि दूरमपि भुजङ्गम्।
गरलमव[1]नीयते वह्निरपि हीयते तदपि यदि वहसि मयि रङ्गम्॥७

यदीति——यदि मनसि भवा मानसी भूयः पुनश्च भीतिः भवति चेत् भुजङ्गं सर्पं दूरीकरोमि। यदि मयि रङ्गं प्रीतिं वहसि चेत् तदपि मयेति शेषो गरलं विषम् अवनीयते-ह्रीयते, तथा वह्निः अग्निः हीयते त्यज्यते। ओहाक् त्यागे।७

भानुकविभावितं विविधगुणलालितं [2]श्रवसि कुरु मधुरपरिणामम्।
मधुसमययामिनी कमलमुखि! वामनी भवति! कृपय पतिमभिरामम्॥८

भान्विति—भानुकविभावितं भानुकव्युक्तम् विविधगुणलालितं सर्वैर्गुणैर्युक्तं श्रवसि कर्णे मधुरपरिणामं मधुरः सुखकरः सुन्दरः परिणामो यस्मिन् कर्मणि तथा कुरु तच्छ्रवणेन मयि सन्तुष्टा भवेति भावः। हे भवति कमलमुखि! कमलवच्छोभमानमुखे! त्वं मधुसमययामिनी वसन्तसमये सुखकारिणी वामनी सुन्दरा च असि वामशब्दात् यामादित्वान्मतुबर्थे निः अतः अभिरामं सुन्दरं पतिं मामिति शेषः कृपय तोषयेति भावः।८

कृष्णः केशकलापः कामिनि! तव वामनो मध्यः।
कथय [3]कथं मम शम्भोरन्तः सन्तापमावहसि॥७

कृष्ण इति—हे कामिनि! तव वामनः कृश इत्यर्थः मध्यः कृष्णः केशकलापः केशसीमन्तश्च शम्भोः सर्वत्र कल्याणोत्पादकस्यापि मम अन्तः अन्तःकरणे सन्तापं कथमावहसि उत्पादयसि कथय।७

दृष्टा काऽपि चकोरी विकिरन्ती गरलपटलानि।
ज्ञातव्या कथमेषा हेमहिमांशोः सुधा कीदृक्॥८

दृष्टेति——काऽपि काचित् चकोरी गरलपटलानि विषसमुदायान् विकिरन्ती

१—अपनीयते। २-- कण्ठे श्रवसि ख। ३—कथय ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टा एषा कथं ज्ञातव्या। हेमहिमांशोः हेमवद्देदीप्यमानचन्द्रस्य सुधा अमृतं कीदृक् कथम्। एवमाशयः यदि चकोरी ज्योत्स्नाभक्षणकर्त्री विषं वमेत्तर्हि सा चकोरी कथं वा तज्ज्योत्स्नामृतं कथम्। एतावता आनन्दोत्पादकस्तव केशकलापः मद्यश्च यदि मां सन्तापयति तर्हि स कथं केशकलापो मद्यश्चेति। युग्मम्। उपमासङ्करः।८

इदानीमालिङ्गनमावश्यकमिति सहेतुकमाह—

चेतसा मिलितं चेतो वचसा मिलितं वचः।
चक्षुषा मिलितं चक्षुर्दोष्णा किमपराध्यते ॥९

इति भानुदत्तविरचिते
गीत[1]गौरीपतिमहाकाव्ये
नवमसर्गः। ९

●

चेतसेति—आवयोरिति शेषः चेतसा अन्तः करणेन चेतो मिलितम्। तत्र मम चान्तः करणं त्वेकमेव। तथा वचसा भाषणेन मम वचः भाषणं मिलितम्। चक्षुषा दृष्ट्या चक्षुर्मिलितम्। एवं मिलितेषु सर्वेष्वपि, इन्द्रियेषु दोष्णा बाहुना बाहुमेलने किमपराध्यते न किमपि। अतः आलिङ्गने को दोष इत्यभिप्रायः।९

इति नवमसर्गष्टीकनेन
समापितः। ९

●

1—गौरीपती काव्ये क।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दशमसर्गः

•

अथैकविंशः प्रबन्धः आडवताले[1] गुर्जरीरागेण गीयते—

अथाऽस्मिन् दशमे सर्गे द्वयोर्विलासं वर्णयति—

क्वचिदपि हसितं क्वचिदपि लपितं क्वचिदपि मदमाधुरी ।
क्वचिदपि चलितं क्वचिदपि मिलितं प्रसरति[2] रसचातुरी ॥१
गिरिसद्मनि वहुलं शिवयोरिह कुतूहलम् ॥ ध्रुवपदम्

तत्र प्रथमः प्रबन्धः क्वचिदपीति—तत्र ध्रुवपदम्—गिरिसद्मनि इति इह पार्वती सङ्गस्थले गिरिसद्मनि हिमवतो गिरेर्गृहे, गुहायां वा शिवयोः पार्वतीशङ्करयोः 'पुमान् स्त्रिया' इत्येकशेषः । वहुलम् अतिशयेन कुतूहलं । तत्कथमेतदाह क्वचित् कदाचित् हसितं परस्परं हास्यम्, कदाचिल्लपितं परस्परम्, अक्रमजल्पनम् । क्वचित् परस्परं मदमाधुरी कामेनोत्पादितमदस्य माधुरी सौन्दर्यम् । क्वचिदपि द्वयोश्चलनम्, इतस्ततो गमनम् तथा मिलितयोर्नाम द्वयोः परस्परमाश्लेषः । एवं रसचातुरी शृङ्गाररस प्रभावः प्रसरति विस्तारं प्राप्नोति ।१

पुररिपुरमलं विकसितकमलं पटु कलयति[3] कुन्तले ।
स्मरशरशरणं कनकाभरणं वहति वपुषि कोमले ॥२

पुररिपुरिति—पुररिपुः त्रिपुरारिः शिवः विकसितकमलं प्रफुल्लं पङ्कजं पटु सुन्दरं यथा तथा कुन्तले स्वकीयजटायां कलयति धारयति । किञ्च कोमले वपुषि शरीरे स्मरशरशरणं स्मरो मदनः तस्य शराः पञ्चबाणाः तेषां शरणम् अनन्यस्थानं कामोत्पादनयोग्यमित्यर्थः कनकाभरणं सुवर्णालङ्कारान् वहति धारयति ।२

१—देवगान्धाररागेण गीयते ख । २—रतिचातुरी—ख । ३—भूतले ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुखरितरशनं प्रविचलवसनं तरलितमणिकुण्डलम् ।
गिरिपतितनया मनसिजकलया [१]गमयति मुखमण्डलम् ॥३

मुखरितरशनमिति—गिरिपतितनया पार्वती मुखरितरसनं मुखरिता शब्दिता रसना काञ्ची यस्मिन् कर्मणि तथा । प्रविचलवसनम् प्रविचलं चञ्चलं वसनं वस्त्रं च यस्मिन् कर्मणि यथा तथा च तरलितमणिकुण्डलं तरलिते चञ्चले मणीनां हीरकाणां कुण्डले यस्मिंस्तत् मुखमण्डलं मुखं मनसिजकलया मदनकला-युक्तेन गमयति दर्शयति ।३

मणिमयवलयं रभसोपचयं रचयति [२]पटु भूषणम् ।
पतिरतिपुलकं कलयति तिलकं करमधिगतदूषणम् ॥४

किञ्चमणिमयेति—पटु सुन्दरं च तत् भूषणमलङ्कारश्च तत् रभसोपचयं रभसस्यानन्दस्योपसञ्चयः यस्मात् तत् 'रभसो हर्षवेगयोः इति विश्वः' मणिमय-वलयं हीरकमयं कटकं रचयति । किञ्च पत्युः शङ्करस्य रत्या प्रेम्णा पुलकाः यस्मात् (यस्य दर्शनात्) एतादृशं तिलकं चाधिगतदूषणं जडमित्यर्थः । यथा करं हस्तं च कलयति करोति ।४

कौतुकलपितं तनुते ललितं रतिचतुरिमसुन्दरम् ।
प्रथयति निभृतं गिरिजाहसितं विकसितरुचिबन्धुरम् ॥५

कौतुकेति—गिरिजा पार्वती रतिचतुरिमसुन्दरं रत्याः क्रीडायाः चतुरिमा चातुर्यं यस्मिंस्तेन सुन्दरमुत्तमं ललितं हृदयद्रावकं कौतुकलपितं कौतुकेन कुतूहलेन लपितं भाषितं तनुते विस्तारयति करोतीत्यर्थः । किञ्च विकसितरुचिबन्धुरं विकसिता प्रफुल्ला प्रसृतेत्यर्थः या रुचिः कान्तिः । 'स्युः प्रभारुग्रुचिस्त्विड्भा' इत्यमरः । तेन बन्धुरं सुन्दरम् उच्चावचं वा । हसितं हर्षं निभृतमतिशयेन प्रथयति विस्तारयति ।५

सरभसवचने मालारचने रचयति नखविग्रहम् ।
कलयति मधुरे रसनावसरे निवसनलघुनिग्रहम् ॥६

सरभसेति—सरभसं सहर्षं यद्वचनं भाषणं तस्मिन् च मालारचने माला-

१—नमयति ख । २—पदभूषणम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करणे नखविग्रहं नखप्रहारयुक्तं शरीरं करोति। मधुरे रसनावसरे शब्दश्रवणावसरे इत्यर्थः, निवसन् लघुनिग्रहं निवसनं स्थितिः तत्र लघु निग्रहं मन्दं निग्रहं निरोधं कलयति करोति।६

घटयति वनिता कैतवकुपिता पाटलरुचिलोचनम्।
किमपि न मनुते मुखमावृणुते हिमरुचिमदमोचनम्॥७

घटयतीति—वनिता पार्वती कैतवकुपिता धौर्त्येन प्रणयत इति यावत् नहि सत्यतयेत्यर्थः। कुपिता क्रुद्धा लोचनं नयनं पाटलरुचि रक्तकान्ति घटयति करोति। किञ्च किमपि भाषणं वस्तु च न मनुते मानयति, किञ्च हिमरुचिमदमोचनं चन्द्रगर्वापहारि कान्तिमदित्यर्थः, मुखमावृणुते वस्त्रादिनाऽऽवृतं करोति, अवगुण्ठयतीत्यर्थः।७

कृतहरविनयो गणपतितनयो निगदति हितकारणम्।
हिमकरमुकुटे विजयिनि निकटे विरचय [1]न च वारणम्॥८

कृतहरेति—कृतो हरस्य विनयो भक्तिर्येन सः, गणपतितनयः भानुदत्तः गणपतिरिति भानुदत्तस्य पितुर्नाम। हितकारणं हितहेतुं निगदति, कथयति किं तदाह—हिमकरमुकुटे हिमकरश्चन्द्रः मुकुटः मुकुटस्थानापन्नः यस्य सः तस्मिन् विजयिनि जयनशीले शिवे निकटे समीपे सति वारणं निषेधं न च विरचय कदापि मा कुरु।८

●

हारं काञ्चिधिया शम्भौ जघने कर्तुमिच्छति।
गौरी सहचरीवक्त्रे सस्मितं चक्षुरक्षिपत्॥१

हारमिति—हारं पुष्पमालां काञ्चिधिया रशनां मत्वा तस्यालङ्कारविशेषाज्ञानादिति भावः, जघने जघनप्रदेशे काञ्चीस्थले शम्भौ शिवे कर्तुमिच्छति सति तद् दृष्ट्वा गौरी पार्वती सहचरीवक्त्रे स्वीयसखीवदने चक्षुः नेत्रम्, अक्षिपत् प्रेरयतिस्म, अपश्यदित्यर्थः।१

१—नखवारणम् ख।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ पार्वत्या क्रीडाकरणे ऐकान्त्यापेक्षया तस्या भीत्यादिनाऽनन्यापेक्षत्वात् स्वकीयान् सहचरान्, अन्तर्भावायाज्ञापयति—

स्वैरं स्वैरमुदञ्च भालहुतभुग्: भोगिन् ! क्षणं गम्यतां,
गङ्गे ! गच्छ मनाक् सुधाकर ! जटाजूटोदरे लीयताम् ।
एषा यद् भ्रमरावधूतकमलस्पर्धाजुषा चक्षुषा,
मां निःशङ्कमुपेत्य शैलतनया द्रष्टुं समाकाङ्क्षति ॥२

स्वैरमिति—हे भालहुतभुक् ! ललाटस्थिताग्ने ! त्वं स्वैरं मत्तः स्वतन्त्रतया स्वैरं यथेच्छं उदञ्च उद्गच्छ । भोगिन् ! शेष ! क्षणं किञ्चित्कालं गम्यताम् । गङ्गे ! भागीरथि ! मनाक् किञ्चित्कालंगच्छ, सुधाकर ! चन्द्र ! जटाजूटोदरे जटाजूटः जटावगुण्ठः तदुदरे तस्मिन् लीयताम् अन्तर्भव । तत्र हेतुमाह यत् यस्मात् एषा शैलतनया पार्वती मामुपेत्य प्राप्य भ्रमरावधूतकमलस्पर्धाजुषा भ्रमरैः अवधूतं कम्पितं यत् कमलं तेन या स्पर्धा अमर्षः तां जुषते तत् तेन चञ्चलेनेत्यर्थः । चक्षुषा नेत्रेण निःशङ्कं द्रष्टुं समाकाङ्क्षति इच्छति तस्मात् इत्यर्थः ।२

पुलकमुकुलभाजोरीशयोः [1]कामकेली-
स्मितपरिचितगाढश्लेषवाचालदोष्णा ।
हिमरुचिसमुदञ्च[2]त्काञ्चि धाराभिरामा,
रतिरभसकलाभिर्निजगाम त्रियामा ॥३

पुलकेति—पुलका रोमाञ्चाः त एव मुकुलाः कुमुदाः ते पुलकमुकुलाः तान् भजेते तौ तयोः पुलकमुकुलभाजोः रोमाञ्चिततन्वोरित्यर्थः । तयोः पार्वतीपरमेश्वरयोः । कामकेलीस्मितपरिचितगाढश्लेषवाचालदोष्णा कामस्य मदनसम्बन्धिनी या केली क्रीडा सा कामकेली तस्यां यत् स्मितं हसितं तेन च परिचितः परस्परं प्रेमावलोकादियुतः च यः गाढश्लेषः दृढतरं आलिङ्गनं तेन वाचालाः शब्दिताः दोषः बाहवः भुजाः यस्मिस्तेन रतिरभसकलाभिश्च रतिः

१—कामकेलिः ख । २—कान्ति धारा ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रीडा तस्य रभसः आनन्दः स एव कलाः आकलनानि ताभिश्च हिमरुचिश्चन्द्रः स एव समुदञ्चती चासौ काञ्चीधारा रसनासन्ततिः तया अभिरामा मनोहरा एतादृशी त्रियामा रात्रिः जगाम गतवती ।३

तदेवाह—

अनङ्गरङ्गविच्छेद[1]धारिणि ! क्लेश[2]कारिणि ।
प्रभाते पुनरायाते भवानी भवमब्रवीत् ॥४

अनङ्गेति— अनङ्गस्य मदनस्य रङ्गः क्रीडा तस्य विच्छेदकारि नाशकारि तस्मिन्, अत एव पुनः क्लेशकारिणि दुःखकारिणि एतादृशे प्रभाते प्रातःकाले समागते सति भवानी पार्वती भवं शिवम् अब्रवीत् उक्तवती ।४

तदेतद् भाषणमाह—

अनुरागवशात् [3]चित्तमभिन्नीकृत्य कामिनोः ।
[4]तनुर्नैका कथङ्कारमकारि बत वेधसा ॥५

अनुरागेति—बतेति खेदे वेधसा ब्रह्मणा कर्त्रा अनुरागवशात् प्रीत्यायत्तत्वात् कामिनोः कामिनः कामिन्याश्च चित्तं मानसमेकीकृत्य तनुः शरीरं कथङ्कारं किं कृत्वा केन हेतुना एका एकत्वावच्छेदिका नाकारि न कृता । कर्मणि लुङ ।५

एवं पार्वत्याः प्रेमभाषणेन शिवानन्दं वर्णयति—

इति शिखरिसुताया वाचमाकर्ण्य कर्णा-
मृतमिव विदधानः सान्द्रमानन्द[5]मत्तः ।
वपुरकृत समीराहारहाराभिरामं,
पुलकमुकुल[6]पाली चारुवेषो महेशः ॥६

इतीति—इत्येवं प्रकारेण शिखरिसुतायाः पार्वत्याः वाचं भाषणम् आकर्ण्य श्रुत्वा तत् कर्णामृतमिव कर्णपेयमिदमन्यदमृतं किमु इति विदधानः सान्द्रं मृदु यथा तथेत्यर्थः आनन्देन धारकः 'सान्द्रं घने घटे मृदौ इति मेदिनी' आनन्देन मत्तः आनन्दातिशय युक्त इति यावत् पुलकमुकुलपाली रोमाञ्चरूपैः कुड्मलैर्युक्तः

१—धारिणी ख । २— हारिणी ख । ३—छिन्नम् ख । ४—तनुर्नौका ख । ५—अन्तम् ख । ६—माली क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चारुवेषः सुन्दरवेषः सुन्दरवेपधारी महेशः पार्वत्याः इति शेष । वपुः शरीरं समीराहारहाराभिरामं समीरो वायुः स आहारः भक्ष्यं येषां ते समीराहाराः सर्पाः त एव हारा माला इव धृताः तैः अभिरामं सुन्दरं यथा तथा अकृत अकरोत्, 'कृञो लुङि ह्रस्वादङ्गात् इति सिचो लुक्' स्वकीयधार्यलङ्कारयुतमकरोत् शरीरैक्यमकरोदिति भावः ।६

●

[1]अथ द्वाविंशः प्रबन्धो वसन्तरागेण रूपकताले गीयते--

तदेवैक्यं वर्णयति अष्टपद्या—

रजतसुवर्णघटितशशि[2]मण्डलं बन्धुरवदनविलासम् ।
द्रुतमन्थरगतिकारणसकलहरचरणयुगलविन्यासम् ॥१
अथ शिवयोरेकं [3]भजत वपुरतिसुन्दरम् ॥ ध्रुवपदम्

रजतसुवर्णेति—अथेति कात्स्न्र्ये कृत्स्नशः प्रत्येकमवयवशः इति यावत् शिवयोः शिवा च शिवश्च 'पुमान् स्त्रिया' इत्येकशेषः हरगौर्य्योः । एकं शरीरद्वयमपि एकीभूतम् अत एव अतिसुन्दरं वपुः शरीरं भजत सेवत हे नराः इति शेषः । तत् कथं तदाह—रजतसुवर्णघटितशशिमण्डलं रजतवत् शिवशरीरवर्णः 'कर्पूरगौरं करुणावतारम्' इत्याद्युक्तत्वात् । सुवर्णवत् पार्वतीशरीरवर्णः एवं द्वयोरेकीभूतत्वात् एकस्मिन् भाले, अर्द्धं शिवस्य यद्दक्षिणं वामं भागं पार्वत्याः तत्र मध्ये चन्द्राधिष्ठानात् एतादृशं तस्यामृतमयत्वेन पारदर्शकत्वात् । वामभागो रजतेन दक्षिणभागः सुवर्णेन घटितं शशिनः चन्द्रस्य मण्डलं यस्मिंस्तत् । अत एव-बन्धुरः रम्यः वदनविलासः मुखसौन्दर्यं यस्मिस्तत्, द्रुतमन्थरगतिकारणसकलहरचरणयुगलविन्यासम् द्रुतं तथा मन्थरं मन्दं च यथा तथा या गतिः गमनं तस्य कारणं सकलः सक्रीडः हरयोर्हरगौर्य्योः चरणयुगलस्य पादद्वयस्य विन्यासः प्रक्षेपो यस्मिन् तत्, शिवपादविन्यासः द्रुतं पार्वतीपादविन्यासश्च मन्दमेवं गमनकरणेन चमत्कृतिर्यत्रेति भावः ।१

१—धनाश्रीरागेण गीयते ख । २—मण्डल ख । ३—भजति ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुनः कथम्—

अतिसीमन्तमुदयदहिमद्युतिसुभगद्युतिसुन्दरम् ।
[1]फणिपतिचर्चितफणाविगलितमणिरिति[2] विमृश्य सक्रूरम् ॥२

अतिसीमन्तमिति—अतिसीमन्तम्, अतिशयेन सीमन्तः केशवेशः पार्वत्याः केशानां शिवस्य जटाजूटस्य चैकीभूतत्वात् यस्मिन् । पुनः कथम् उदयदहिमद्युति सुभगद्युति सुन्दरम् उदयन् स चासौ अहिमद्युतिः सूर्यः तस्य द्युतिरिव या सुभगा सुशोभना द्युतिः कान्तिः तया सुन्दरं रम्यम् । तत्रोत्प्रेक्षते फणिपतिः शेषः तेन चर्चिता फटायिता प्रसारितेत्यर्थः या फणा तस्याः विगलितः स चासौ मणिः अतः विमृश्य विचार्य पश्चात् क्रूरमिव सक्रोधमिवेत्यर्थः ।२

पुनः कथं तत्—

प्रतिफलितं वपुरनयोरुदयति कलयति [3]जगदतिपूतम् ।
परिहृतभागयुगलमिव विपुलप्रीतिभिरेकीभूतम् ॥३

अनयोः शिवपार्वत्योः प्रतिफलितं प्रतिनिष्पन्नमेतच्छरीरप्रतिमाभूतं एतत् वपुः सूर्यरूपं चन्द्ररूपं वा उदयति चन्द्रसूर्यवत् प्रकाशमानमिति भावः यच्चोदयं प्राप्य जगत् एतद्विश्वमतिपूतम्—अतिशयेन शुद्धं कलयति करोति 'आकृष्णेन' 'उदुत्यमित्यादि' मन्त्रेष्वाम्नातत्वात् । पुनरुत्प्रेक्षते परिहृतम् अपहृतं द्विधाभूतमिति यावत् केनचिद् वियोगकर्त्रा इतिशेषः । इवेत्युत्प्रेक्षया, भागयुगलं भागद्वयं विपुलप्रीतिमिवातिप्रीतिसमूहैः एकीभूतम् स्वत एवैकतां प्राप्तम्—निसर्गतः इति यावत् । एतदेव भूधातो प्रयोगस्वारस्यम् ।३

इदमिदमुरगराजचिरनिपतितकञ्चुकमिति बहुवारम् ।
पुररिपुरपसारयति तुहिनगिरितनयाकुचतटहारम् ॥४

इदमिति—पुररिपुः शङ्करः तुहिनगिरितनयाकुचतटहारं तुहिनगिरिः हिमाचलः तस्य तनया पार्वती तस्याः कुचतटी स्तनौ तयोर्यः हारः पुष्पमाला तम्, इदमिदम्, सम्भ्रमे द्विर्वचनम्, उरगराजनिपतितकञ्चुकम्, उरगराजः शेषः तस्येदं निपतितं कञ्चुकं निर्मोक इति शङ्कया बहुवारं वारं वारम्, अपसारयति दूरीकरोति । अङ्गयोरैक्यादाकस्मिकोऽयं स्वकीयशरीरत्वेन सम्भ्रम इति भावः ।४

१—अस्मिन् श्लोके टीकाकारस्वीकृतफणापाठस्वीकारे गीते गतिभङ्गः ।
२—विमृशति क्रूरम् ख । ३—जगदपि पूतम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृढपरिरम्भणमिलितभसितमिति गिरिजाकुचघनसारम् ।
प्रोञ्छति पश्यति पुलकति विहसति लुभ्यति[1] रतिपरिचारम् ॥५

दृढेति—दृढं गाढं यत् परिरम्भणम्, आलिङ्गनं तेन मिलितम् अङ्गसंल्लग्नं यद् भसितं शिवाङ्गलेपितभस्म इति हेतोः गिरिजा पार्वती कर्त्री कुचघनसारम् कुचलिप्ताङ्गरागविशेषं प्रोञ्छति अङ्गतः फूत्कारेण निष्कासयति । पुनः पश्यति इदं किं लग्नमिति, पुलकति आश्चर्येण, विहसति हासं करोति रतिपरिचारं क्रीडाव्यापारं प्रति लुभ्यति वा विमोहति मोहयुक्ता भवति । अथवा शिवःकर्त्ता पूर्ववत् पार्वत्या गाढालिङ्गनेन मिलितं शरीरे सङ्गतं यत् भसितं भस्म तत् इदम्, इति सम्भ्रमेण पार्वत्याः कुचस्य घनसारं प्रोञ्छति शेषं प्राग्वत् ।५

पवनतरलतरसुरतटिनीजलफेनधिया बहुकालम् ।
पुररिपुरभिनवकुरबककोरकदाम स्पृशति विशालम् ॥६

पवनेति—पवनेन वायुना तरलतरम् अतिचञ्चलं यत् सुरतटिनीजलं मस्तकधृतगङ्गाजलं तस्य फेनः तस्य धिया स फेन इति मत्वा पुररिपुः शङ्करः कर्ता तस्याः पार्वत्या इति शेषः विशालं विस्तीर्णम्, अभिनवकुरबककोरकदाम- अभिनवाः नवीनाः सुन्दरा वा कुरवककोरकाः कुरवककलिकाः तेषां दाम हारः तत् स्पृशति । अयं फेनो वा इति हेतोः ।६

पश्यति शैलसुताकरकङ्कणमधिकरुचिररुचिपूरम् ।
स्वयमपि विहसति विलसति कलयति भुजगराजकेयूरम् ॥७

पश्यतीति—शङ्करः अधिकरुचिररुचिपूरम्, अधिकम् अतिशयेन रुचिर- रुचिपूरः मनोहरसौन्दर्यसमूहः यस्मिन्नेतादृशं शैलसुताकरकङ्कणं पार्वती- हस्तस्थितं कटकं पश्यति दृष्ट्वा च विहसति हास्यं करोति विलसति क्रीडति सम्भ्रमेणेति यावत्, स्वयमपि भुजगराजकेयूरं भुजगराजरूपं केयूरमलङ्कार- विशेषं कलयति धारयति ।७

भानुदत्तकविरिति बहु विनयति वितरतु सकलस्नेहम् ।
एकीभूतममृतकरशेखरभूधरतनया[2] देहम् ॥८

भानुदत्तेति—भानुदत्तकविः इत्येवं बहु वारं वारम्–विनयति प्रार्थयति,

१—पतिमविचारम् ख । २—स्नेहम् ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति किं एकीभूतं स्वयं प्रीत्यैवैकतां प्राप्तम् । अमृतकरशेखरभूधरतनयादेहम्- अमृतकरः चन्द्रः शेखरे मस्तके यस्य स अमृतकरशेखरः शिवः भूधरतनया पार्वती च तौ तयोः देहं कर्तृ अस्मभ्यं सकलस्नेहं सर्वप्रीतिं वितरतु ददातु । अथ शिवयोरिति अर्थं उक्तपूर्वं इति च बहु विनयति ।८

अथैकीभूतस्य शिवस्य क्रीडाचरितमाह—

आत्मीयं चरणं [1]दधाति पुरतो निम्नोन्नतायां भुवि,
स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशङ्कया ।
तल्पे किञ्च मृगत्वचा विरचिते निद्राति भागैर्निजै-
रन्तःप्रेमभरा[2]लसां प्रियतमामङ्के दधानो हरः ॥९

आत्मीयमिति—अन्तःप्रेमभरालसाम्, अन्तः अन्तःकरणे स्वाभाविकेनेत्यर्थः नतूपरितनं कापट्येन । यः प्रेमभरः प्रेमातिशयः तेनालसां प्रियतमां यतोऽन्यज्जगति प्रियतमं नास्ति एतादृशीम् अतिशयप्रियां 'अतिशायने तमबिष्ठनौ' इत्यनेन तमप् । तां पार्वतीमङ्के शरीरे अर्धाङ्गित्वेनेति यावत् दधानो धारकः हरः शङ्करः गमने इति शेषः, श्रमाशङ्कया पार्वत्याः श्रमो भवेदिति आशङ्कया तस्याः श्रमो मा भूदिति हेतोरित्यर्थः । निम्नोन्नतायां नीचोच्चभूतायां भुवि भूमौ पुरतः अग्रे आत्मीयं स्वकीयं दक्षिणं चरणं पादं दधाति स्थापयति । तरोः पुष्पं स्वीयेन एव स्वकीयेन करेण कर्षति त्रोटयति । किञ्च मृगत्वचा विरचिते हरिणाजिनकृते तल्पशय्यायां निजैर्भागैः शरीरस्य दक्षिणभागेन च निद्राति शेते ।९

अर्धे वक्षसि शैलराजदुहितु[3]र्वक्षोरुहः स्फूर्जतः,
संवीक्ष्य प्रतिबिम्बमिन्दुसुभगे भागे निजे [4]वक्षसि ।
स्वस्यापि स्तन[5]मण्डलाङ्कुरधिया व्यालोलमालोकयन्,
देवो दैन्यमपाकरोतु गिरिजादेहार्ध[6]धारी शिवः ॥१०

अर्द्ध इति—गिरिजादेहार्धधारी पार्वतीदेहार्धेन धारणशीलः देवः शिवः अर्धे वक्षसि वक्षोऽर्धे शैलराजदुहितुः हिमवतः कन्यायाः पार्वत्याः स्फूर्जतः उन्नतस्य वक्षोरुहः स्तनस्य इन्दुसुभगे चन्द्रकान्तियुक्ते भागे प्रतिबिम्बं संवीक्ष्य निजे स्वकीये वक्षसि हृदये स्तनमण्डलाङ्कुरधिया स्तनमण्डलोन्नतिदृष्ट्या

१—ददाति ख । २—अलस ख । ३—वक्षोरुहि ख । ४—वक्षसः ख । ५—मण्डलान्तरधिया ख । ६—हारी ख ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यालोलं सर्पम् आलोकयन् पश्यन् स्वस्यापि स्वस्य स्तनविषयकं दैन्यं न्यूनताम-पाकरोतु दूरीकरोतु । एतेनैकभागस्तनत्वेन तच्छरीरवैचित्र्यं दर्शितम् ।१०

अथ ग्रन्थान्ते आशीरूपं मङ्गलमाह कविः—

भवानी [1]नर्तनैर्यावदङ्गलग्ना पुरद्विषः ।
विद्वत्[2] कण्ठगता तद्वद् भानोर्वाणी विराजताम् ॥११

भवानीति—भवानी पार्वती यावत् पुरद्विषः शिवस्य अङ्गलग्ना यथा शोभते तावत् कालं तद्वच्च भानोर्वाणी भानुदत्तकविकृतिरिदं गीतगौरीपतिकाव्यं विद्वत्कण्ठगता विद्वद्भिर्गीतेति यावत् विराजताम् सर्वोत्कर्षेण वर्तताम् ।११

अथैतद्गाने विदुषः प्रार्थयति—

[3]गौरीपतेर्गीतिरियं सुरम्या यस्याननाम्भोरुहि चारु लीना ।
तस्याऽपि पादाम्बुजसंविलीनां सुचञ्चरीकामि शिरोजराजीम् ॥१२

इति श्रीभानुदत्तकविविरचिते
गीतगौरीपतौ महाकाव्ये
दशमसर्गः ।१०

●

गौरीपतेरिति—गौरीपतेः शङ्करस्य गौरीसहितस्य पत्युः प्रत्यासत्या पार्वत्या एव शङ्करस्येति यावत् पार्वतीशङ्करयोरियं सुरम्या सुष्ठु आनन्ददात्री गीतिः सङ्गीतरीत्या स्तुतिः यस्य विदुषो गायकस्य आननाम्भोरुहि मुखे चारु यथा तथा लीना भवेदिति शेषः । यः गायकः तालेन रागादिभिः शास्त्ररीत्या गास्यति इति भावः,—तस्यापि तस्य गायकस्य अहं स्वकीयामिति शेषः, शिरोजराजीं मदीयमस्तकजटापङ्क्तिं पादाम्बुजसंविलीनां पादकमले सम्यक् लीनां एतादृशीं सतीं सुचञ्चरीकामि भृङ्गवत् करोमि नैरन्तर्येण भ्रमरी यथा कमले लीनो भवति तथाऽहमपि तत्र लीनो भवामीत्यशेषमतिमङ्गलम् ।१२

इति भानुदत्तप्रणीतगीतगौरीपतिकाव्यस्य दशमसर्गस्य टिप्पणं सम्पूर्णतां प्राप श्रीशक्तपयेति मङ्गलम् ।

●

१-वर्तते ख । २-स्वान्तस्थिता तावत् ख । ३-खपु० नायं श्लोकः । ४-काव्ये क ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिशिष्टम्

गीतगौरीपतौ प्रयुक्तानां छन्दसां लक्षणानि

अनुष्टुप्—श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ।।
१, ५, १२, १६, २०, ३२, ३७, ४०, ४१, ४४, ४७, ५५,
५८, ६२, ६६, ६७, ६८, ६९, ७४, ७८, ७९, ८५, ८६,
८९, ९१, ९६ ।

आर्या— यस्याःपादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ।।
१७, ५८, ८५

इन्द्रवज्रा—स्यादिन्द्रवज्रा यदि तौ जगौ गः
७०, ८२, ९६

उद्गीतिः—आर्या सकलद्वितये विपरीते पुनरिहोद्गीतिः ।
१७

गीतिः—आर्यापूर्वार्धसमं द्वितीयमपि भवति यत्र हंसगते ! ।
छन्दोविदस्तदानीं गीतिंताममृतवाणि ! भाषन्ते ।।
२८, ३२

द्रुतविलम्बितम्—द्रुतविलम्बितमाह नभौ भरौ ।
३१

प्रहर्षिणी— म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।
५९

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुष्पिताग्रा—अयुजि नयुगरेफतो यकारो ।
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥
१५, ३७, ३८, ४०, ४६, ४७, ६९

पृथ्वी— जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
७७

भुजङ्गप्रयातम्—भुजङ्गप्रयातं चतुर्भिर्यकारैः ।
६

मन्दाक्रान्ता—मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।
५४, ६७, ८१

मालिनी— ननमयययुतेयं मालिनी भोगलोकैः ।
९०, ९१

वसन्ततिलका—उक्ता वसन्ततिलका तभजा जगौ गः ।
२४, ३७, ४४, ७०

शार्दूलविक्रीडितम्—सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्
१, २, ५, ६, ९, १०, १३, २५, ३२, ४१
४६, ५३, ६३, ७०, ७१, ७४, ८१, ९०, ९५

शिखरिणी—रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी
३६, ५०, ५१

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतगौरीपतौ समागतश्लोकानामकाराद्यनुक्रमणिका

पद्यानि	छन्दांसि	पृष्ठसंख्याः
अ		
अकरोः किमु	पुष्पिताग्रा	१५
अगर्वो गर्वोऽभूत्	शिखरिणी	३६
अतिदीर्घं निःश्वसन्ती	गीतिः	२८
अथ कनकसरोरुहा	पुष्पिताग्रा	४६
अनङ्गरङ्गविच्छेद	अनुष्टुप्	९१
अनुरागवशाच्चित्तं	,,	९१
अन्तःसंतापमार्तण्ड	,,	५५
अन्तश्चारिणि	शार्दूलविक्रीडितम्	२
अर्थं वक्ति विलोचनं	,,	४१
अर्धं वक्षसि	,,	९५
अविरलमधुकरवृन्दे	गीतिः	३२
अहो पन्थानमुत्सृज्य	अनुष्टुप्	१६
आ		
आकाशे भ्रमराः	शार्दूलविक्रीडितम्	२५
आज्ञा न त्रिपुरान्तकस्य	,,	१३
आत्मीयं चरणं	,,	९५
आनन्दकन्दे	इन्द्रवज्रा	८२
आयातस्य वसन्त	शार्दूलविक्रीडितम्	९
आशारज्जुषु	,,	६
आशासु तिष्ठति	वसन्ततिलका	२४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानि	छन्दांसि	पृष्ठसंख्या
इ		
इति शिखरिसुतायाः	मालिनी	८१
इदमर्थयामि	आर्या	१७
उ		
उक्ता भ्रूसंज्ञया	अनुष्टुप्	७८
उद्दामधाम	,,	४७
उन्मीलत्कलिका	शार्दूलविक्रीडितम्	१०
क		
कटाक्षकुसुमाञ्जलिं	पृथ्वी	७७
कानने सुभ्रुवः	अनुष्टुप्	६७
किमितरदपि	पुष्पिताग्रा	४१
कृष्णः केशकलापः	आर्या	८५
के वा केलिकला	शार्दूलविक्रीडितम्	५
ग		
गौरीपतेर्गीतिरियं	इन्द्रवज्रा	८६
च		
चेतसा मिलितं	अनुष्टुप्	८६
छ		
छायामृगी	,,	६८
ज		
जगदफलं	१ गीतांश.	५८
जयान्वितदयाहेतोः	,,	५८
जयायाः कथिते	,,	६७
जया सन्दर्शयामास	,,	६८
जानाति कोन्वलं	,,	४१
जानीमहे महेशस्य	,,	४०

1—त्रयोदशप्रबन्धस्य चतुर्थंपदम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानि	छन्दांसि	पृष्ठसंख्याः
जानीमः सुदृशो	शार्दूलविक्रीडितम्	६३
जीवेन तुलितं प्रेम	अनुष्टुप्	२०
त		
तव वाचा मम	अनुष्टुप्	४४
तस्याः काञ्चनकङ्कणस्य	शार्दूलविक्रीडितम्	५३
तात! क्षणं मदन!	वसन्ततिलका	४४
द		
दाम प्रकामसुभगं	"	७०
दिनमपि कियदस्ति	पुष्पिताग्रा	६९
दीर्घं न श्वसितं निधेहि	शार्दूलविक्रीडितम्	८१
दृष्टिरस्य द्विरेफस्य	अनुष्टुप्	६
दृष्टा काऽपि चकोरी	"	८५
देवि! पश्य मधोः	"	५
न		
नयनसलिलबिन्दुभिः	द्रुतविलम्बितम्	३१
नाभिं कूपधिया	शार्दूलविक्रीडितम्	६३
निर्दग्धं लास्यमेतस्याः	अनुष्टुप्	७८
नीचैर्याति	"	६६
न्यस्तो मणिः	वसन्ततिलका	३७
प		
पुरहर! तव कामिनी	प्रहर्षिणी	५९
पुलकमुकुलभाजो	मालिनी	९०
प्रतीमः पञ्चेषोः	शिखरिणी	५०
प्राणेशस्य प्रभवति	मन्दाक्रान्ता	८१
प्राप्य शम्भोः कराः	अनुष्टुप्	५५
प्रियसखि! सुधांशु	उद्गीतिः	१७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानि	छन्दांसि	पृष्ठसंख्याः
भ		
भवानीनर्तनैः	अनुष्टुप्	६६
भानोर्गीतं	,,	१
भ्रूछायान्तर्विशति	मन्दाक्रान्ता	६७
म		
माधवीमुकुलामोद	अनुष्टुप्	५
मुञ्च मुञ्च चकोराक्षि !	,,	६६
मैनाकोऽभूत्	शार्दूलविक्रीडितम्	३२
य		
यतस्तल्लावण्यं	शिखरिणी	५१
यामस्ते पुनरेवमस्तु	शार्दूलविक्रीडितम्	७४
युगमिव दिवसः	पुष्पिताग्रा	३७
र		
रजनिविरहताप	,,	३८
रागप्रवालैस्तिमिर	इन्द्रवज्रा	७०
व		
वक्षो वासपुरी क्षरः	शार्दूलविक्रीडितम्	१०
वदन्ती कामलेखाय	अनुष्टुप्	४१
वारुण्या किमु	शार्दूलविक्रीडितम्	७१
वाष्पव्याजादमर	मन्दाक्रान्ता	६७
विपत्सिन्धुं	शिखरिणी	३६
विश्लेषदहन	अनुष्टुप्	१२
श		
शय्यामम्बरभूरुहः	शार्दूलविक्रीडितम्	७०
स		
सखीभिः श्रवसि	अनुष्टुप्	३७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पद्यानि	छन्दांसि	पृष्ठसंख्या:
स		
संवीक्ष्य मूर्च्छितामेतां	अनुष्टुप्	३२
समीरस्य मल्ली	भुजङ्गप्रयातम्	६
सन्ध्यानृत्यविधौ	शार्दूलविक्रीडितम्	१
सान्द्रानन्दसुधा	अनुष्टुप्	७४
सुवर्णसुतनोरङ्गे	,,	६२
स्कन्धात् भ्रष्ट	शार्दूलविक्रीडितम्	४६
स्नेहा इव वर्धन्ते	गीतिः	२८
स्मर विरम विधेहि	पुष्पिताग्रा	४०
स्रष्टुं बिम्बाधरमंभि	मन्दाक्रान्ता	५४
स्वप्रकाशमनिर्वाच्य	अनुष्टुप्	२०
स्वैरं स्वैरमुदञ्च	शार्दूलविक्रीडितम्	६०
ह		
हरविरहदीनदेहां	आर्या	५८
हारं काञ्चिधिया	अनुष्टुप्	८६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतगौरीपतौ–गीतानामनुक्रमः

गीतानि	पृष्ठसंख्या:
अ	
अङ्गारकभरितेव	२६
अञ्जलिविगलित	१९
अतिसीमन्तमुदयदहि	९३
अद्य भविष्यति	७३
अन्धी भवति न	३९
अपनयसि मधुपद्रुम	३४
अभिनवनीरजनी	६०
अभिनवयौवन	२१
अलिधेयं किमितर	६५
अवनतवदन	२२
अविरलमदजल	८
अश्रु च वैतरणी	२७
अश्रुजलेन विलोचन	६५
अहमिति. वेदनमिति	४३
इ	
इति निरवद्यं	७७
इदमपि न यौक्तिकं	८४
इदमिदमुरगराज	९३
इन्दुरखण्डसुधाभि	५१
इयमियमालि	२८
उ	
उदयति पुलकपटल	८०
उपचयसमुचित	४९
उरसि वसति	५७
उरसि वहसि	३०
ऊरुयुगं किमु	४८
क	
कथमपि न मन्यसे	८४
कथयितुमेति	७३
कपटकोपपटु	२२
कपटकोलदशने	४
कलयसि देवकुलं	३
कलितकलङ्कममृत	२६
कविगणनाथसुतस्य	५३
कानने भवने	१४
किं भवामि भणामि	१३
किं हितं किमिवाहितं	१३
किमिति विषीदसि	२९
किमिति न पश्यसि	८०
किसलयशयनसुगुप्त	७२
कुचयुगमध्य	४९
कुत्र न भवति मदन	२९
कुपितभुजङ्गभीषण	३०
कुरु ताटङ्कद्वय	७७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानि	पृष्ठसंख्याः	गीतानि	पृष्ठसंख्याः
क		त	
कृतहरविनयो	८६	त्वमपि विमृश्यसि	८०
केलिनिकेतन	१६	त्वमसि दृशि	८४
कोकिलमलयसमीर	६२	त्वमसि किरीटं	५६
कौतुकलपितं	८८	त्वरितमुपैति चरम	७३
क्वचिदपि हसितं	८७	तत्र गतो वदतामिति	५७
क्षीरसिन्धुलहरी	३	तरुणलवङ्गरसाल	८
ख		तस्य च दिशि	५३
खरकरजक्षतकातरया	२२	तापकृशानुरनुक्षणमेति	४०
ग		तारकीयति चन्द्रशेखर	१५
गिरिशमौलिशशि	७२	तिलकिततुहिनकरं	१८
घ		त्रिदशतरङ्गवती	११
घटयति वनिता	८६	द	
घटयितुममरीमर्थं	५२	दिनकरमण्डल	५६
घनतिमिरचयं	३	दृढपरिरम्भण	६४
च		न	
चम्पकचर्चितचाप	७	नन्दय सदयं पुरहर	७६
चरणनखावलि	४८	नयसि सुरभि	६५
चरणे नूपुरमपि	३०	प	
चलितकपोल	२३	पतिरनुनयति	७६
चूचुकयुगमति	५०	पथि तव समजनि	५६
ज		परिचितविकलित	३८
जनुरपि दिनमपि	८०	पवनतरलतर	६४
जयति न तारावलमिति	६४	पश्यति शैलसुता	६४
जीवनधनहरणाय	६१	पाणिपद्मगतो	१४
ज्वलति न हृदयमिदं	३६	पुररिपुरमलं	८७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानि	पृष्ठसंख्याः
प्रचलति हन्तुमचल	६६
प्रतिफलितं वपुरनयोः	६३
प्रथयति मदनमहीपति	२७
प्रवहसि मधुमथन	३
प्रविततविकटजटा	११
प्रसरति केसर	२६
प्रसरति तस्य च	१२
प्रसरति मलयज	५६
प्रसरति तापो	६४
प्रेम यदि क्व वियोग	४२
ब	
बद्ध्वा नैव	६५
भ	
भानुदत्तकविरिति	६६
भानुदत्तकविलपित	७४
भानुकविभाषितं	८५
भानुरिति वदति	३५
भानुकवेरिति	२३
भानुकोविद एष	१५
भानुदत्तकविकृत	८
भानुदत्तकविरिति	६४
भानुदत्तरचितं	४
भानुभणितमिति	२०
भानुभणितमिति	१२
भानुभणितमिति	२७

गीतानि	पृष्ठसंख्याः
भावयामि तदास्य	१४
भुजङ्गविभूषण	२१
भुजपटलं पटु	५२
भुवनमद्य विगत	३५
भ्रमसि जगति	२
म	
मणिमयवलयं	८८
मधुकरनिकर	३६
मधुरपसरतु	६१
मरुरवनिवलय	३४
मानत्रितयं	४६
मुखतुलया शशिना	५२
मुखरितरशनं	८८
मौलौ सलिलं	५७
य	
यदि भवति मानसी	८५
यामवती युवती	८
र	
रजतसुवर्णघटित	६१
रतिपतिरथपथं	८
रतिरसविकलित	१७
रिपुरिव मरुदपि	२७
रोमराजिरपि	४६
ल	
लपति भानुरिति	५७
लपितुं कर्त्तुं यदि	४३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गीतानि	पृष्ठसंख्याः
लुलितमणिकुण्डलं	८३
लोचनकमलैरविरल	७५
लोचनजलरुहि	६५
लोचनदहनगहन	११
लोचनयुगले निर्जित	७६
व	
वद किमपि जायताम्	८२
वदति भानुकवि	८१
वदति भानुरति	३०
वदति भानुरिति	४४
वदति भानुरिति	५०
वदति भानुरिति मुग्ध	६२
वदनं मलिनं	४३
वर्षसि वरुणतर	३४
वहति सखीजन	६१
वहसि ग्रहनिवह	४
वहसि शिखा	४
वामविलोचन	७३
वारितो दयितो	१४
विकसितकिंशुक	८
विदितुमितरदितर	४२
विधिकृतकुरबक	७२
विरचय दृगञ्चलं	८३
विरचय पुरहर	२६
विरचयसि सखि	३३
विरचय हारं प्रसरतु	७५

गीतानि	पृष्ठसंख्याः
विरचितुमुत्तमरुचि	५३
विरहो जीवनमिति	४२
विहृतपतिव्रतधैर्यं	१२
श	
शमनमहिषचिर	६०
शिवमवलोकय	७६
शोणरुचं न च	८०
श्रमजलसीकर	२३
श्रवणपुटभेद्य	३५
श्रुसितरपि नैषा	३६
स	
सकुतुकसरभस	११
समधिकनर्तित	१६
समुचितमिति	४३
सरभसवचने	८८
सरसिजवदने	७५
सरसिजसौरभ	७
सुकविभानुरिति	४०
सुरतटिनीजल	१६
सैकतमुष्णमिन्दु	२७
स्मर मदकरणे	७६
ह	
हरसि मदननृपति	३४
हिमरुचिरनुभवमेष	३६
हिमरुचि रुचि	१८
हृदयगतं हरमव	१२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खप्रतौ निम्नलिखितश्लोका अधिकाः सन्ति

•

मनसो विषयः कान्तः सन्तापो विषयस्तनोः ।
चक्षुषो विषयस्तस्य, वाष्पधारैव केवलम् ।।

मलयगन्धवहैर्नलिनीरजः,
प्रकरदन्तुरितैर्दुरितैरिव ।
परिचितामभितापविमूच्छितां,
प्रियसखी सुमुखीमिदमब्रवीत् ।।

द्वितीयसर्गे तृतीयप्रबन्धात्पूर्वम् ।

वियोगयोगयोः श्रेयो वियोग इति मन्यते ।
प्राणाः पश्चापि सेवन्ते कान्तमन्तरचारिणम् ।।

तृतीयसर्गे षष्ठप्रबन्धात्परम् ।

विरहे विपिनच्छायां, तन्वङ्गि ! किमु काङ्क्षसि ।
एकस्य बिससूत्रस्य, छाया तव महीयसी ।।

चतुर्थसर्गे अष्टमप्रबन्धान्ते ।

हारेण बद्ध्वा हरगुम्फितेन,
मुद्राङ्कितं मुद्रिकया विधाय ।
चिराय निःश्वस्य हरस्य लेखं,
सखीकरे पद्ममुखी बभार ।।

पञ्चमसर्गे सर्गसमाप्तेः पूर्वम् ।

•

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समागतरागाणां लक्षणानि

•

कर्णाटकरागः

देशीयभाषायामयम्-'कानड़' नाम्नाऽपि प्रसिद्धोऽस्ति ।

अस्य लक्षणम्—

शुद्धाः सप्तस्वरास्तेषु गान्धारो मध्यमस्य चेत् ।
गृह्णाति द्वे श्रुती गीता कर्णाटी जायते तदा ॥

[लोचनकृतरागतरङ्गिण्याम्]

गान्धारैकस्तीव्रतरो धैवतश्चैककोमलः ।
गैकस्तीव्रतरे मेले कर्णाटः ककुभाभिधः ॥

[हृदयनारायणविरचिते हृदयप्रकाशे]

केदाररागः

सङ्गीतग्रन्थेष्वस्य भिन्नलक्षणानि प्राप्यन्ते ।

अस्य लक्षणम्—

गनीतीव्रतरे मेले केदारः श्यामनाटकः ।
भूपाली चेति केदारः सम्पूर्णो गादिमूर्च्छनः ॥

[हृदयप्रकाशे]

गुर्जरीरागः

अयं मिश्रितरागः

शास्त्रेऽस्य स्वरूपं यथा—

धैवतांशग्रहन्याससम्पूर्णा गुर्जरी मता ।
सप्तमी मूर्च्छना तस्यां बहुल्या सह मिश्रिता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रामकलीटोडिसंयुक्ता वराटीमिश्रिता पुनः ।
गुर्जरी जायते विद्वन् ! आद्ययामे प्रगीयते ॥

[नादविनोदे]

ताडिकैव किल गुर्जरी मता, पञ्चमेन रहिता यदा भवेत् ।
संवादऋषभधैवतांशिनी, गीयते सुमतिभिश्च सङ्गवे ॥

[रागकल्पद्रुमाङ्कुरे]

देशाखरागः

अस्य देवसागः, देशाक्षीः, देशाख्यः इत्यन्यानि नामानि ।

लक्षणञ्च —

रितीव्रतरसंयुक्तो गतीव्रेणापि संयुतः ।
धगवर्ज्योऽवरोहे स्यात् गान्धारस्वरमूर्च्छनः ।
तीव्रो यत्र निषादः स्याद्देशाख्यः स विराजते ॥

[सङ्गीतपारिजाते]

रिमौ पमौ सधपमाः परिगमरिसास्तथा ।
देशाखो हि विशेषेण बाडवः कथितो बुधैः ॥

[हृदयनारायणकृतहृदयकौतुके]

अस्य ध्यानम्

पृथुलतरशरीरो मल्लविद्यासुदक्षः,
परमत्रलवरिष्ठो बाहुदण्डप्रचण्डः ।
अतिशयदृढकक्षो मूर्द्धचूडाविहीनः,
प्रचरति नृपशालामेष देशाखरागः ॥

[सङ्गीतकल्पद्रुमाङ्कुरे]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालवराग:

अस्य लक्षणम्—

नितम्बिनीचुम्बितवक्त्रपद्म:,
शुकद्युतिः कुण्डलवान् प्रमत्त: ।
सङ्केतशालां प्रविशन् प्रदोषे,
मालाधरो मालवरागराज: ॥

गौडमालवराग:

सङ्गीतशास्त्रे मालवगौडराग: विद्यते गौडशब्दस्य पूर्वनिपातेनास्य नामान्तरमिव गौडमालवराग इति नाम व्यवह्रियते इति प्रतीयते ।

लक्षणञ्चास्य

अथ मालवगौडेऽस्मिन् गौरीस्वरसमुद्भवे ।
त्यक्तधे रिस्वरोद्ग्राहे नह्यारोहे सुगस्वर: ।
आरोहे यदि गान्धार: पादिमन्तो विधीयते ॥

[सङ्गीतपारिजाते]

रामकरीराग:

विभिन्नसङ्गीतग्रन्थेषु रागस्य रामकलीरामकृतिरामगिरीति नामान्तराणि सम्प्राप्यन्ते ।

अस्य लक्षणम्—

रिकोमला गतीव्रा या मतीव्रतरसंयुता ।
धकोमला नितीव्रा च ख्याता रामकरीति सा ।
आरोहे मनिवर्ज्या स्यात् पांशा धैवतमूर्च्छना ॥

[सङ्गीतपारिजाते]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वराडिरागः

अपभ्रंशोऽयम् वराटीरागस्य । शास्त्रेष्वस्यानेके भेदा उपलभ्यन्ते ।

अस्य लक्षणम्—

वराटीपूर्वसंयुक्ता वरारी लक्ष्यविश्रुता ।
पूर्णारोहावरोहा च मारवा मेलनाश्रिता ॥
गान्धारोऽङ्गीकृतो वादी धैवतोऽमात्यसंनिभः ।
गानमस्याः समीचीनं दिनान्तेऽतिमनोहरम् ॥
प्राचुर्यान्मारवाङ्गस्य क्वचित्तच्छङ्कनं भवेत् ।
मारवा पञ्चमत्यक्ता॰ रागभेदस्ततः स्फुटः ॥
सङ्गतिः सपयोश्चात्र तथैव गपयोः क्वचित् ।
स्यान्मध्यमस्य दौर्बल्याद् विशेषेण सुखप्रदा ॥
देशिकारस्तथा तोडी त्रिवेण्यपि यथायथम् ।
मिलन्त्यत्रेति संप्रोक्तं गानशास्त्रविशारदैः ॥

[भातखण्डेकृतलक्ष्यसङ्गीते]

वसन्तरागः

लक्षणं स्वरूपञ्च—

षड्जादिमूर्च्छने मान्ते गनीतीव्रौ वसन्तके ।

[सङ्गीतपारिजाते]

वसन्ते प्रहरे तुर्ये मकरध्वजवल्लभः ।
सम्भोगे विनियोक्तव्यो वसन्तस्तत्समुद्भवः ॥
पूर्णस्तल्लक्षणो देशी हिन्दोलोऽप्येष कथ्यते ।

[सङ्गीतरत्नाकरे]

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पंजी सं० ९७४४/६४ REG. No. 9744/64

चन्द्रकलानाटिका (कविराज-आचार्यविश्वनाथप्रणीता) संस्कृतव्याख्या-हिन्दीटीकाभूमिकाभि:संवलिता । सं० श्रीतारिणीशझा:, । मूल्यम् ६.५०

छत्रपतिसाम्राज्यम् (नाटकम्) स्वर्गीयश्रीमूलशङ्करयाज्ञिक-प्रणीतमिदं नाटकं संस्कृतहिन्दीटीकोपेतं प्रकाशितम् । मूल्यम्— ७.००

हास्यचूड़ामणि: (प्रहसनम्)–चन्देलनृपतिपरमर्दिदेवामात्येन वत्सराजेन रचितमिदं प्रहसनम् । मूल्यम्—३.५०

गीतगिरीशम् (रागकाव्यम्)— गीतगोविन्दपरम्परायां श्रीरामभट्ट-लिखितस्येदम् प्रथमप्रकाशनम् । विस्तृतभूमिकापादटिप्पण्यादिभि: सनाथीकृतमिदं काव्यं पाठकानां कृते सर्वथा समुपयोगि । मूल्यम् ६·००

रामगीतगोविन्दम् (रागकाव्यम्) मैथिलश्रीजयदेवकविप्रणीतमिदं काव्यं पाठकानां मनसि रामचरणेषु रतिं द्रढयति । सं०श्रीप्रभातशास्त्री । मू०–१०.००

गीतपीतवसनम् (रागकाव्यम्) शृङ्गाररसाप्लुतस्यास्य काव्यस्य प्रणेता श्रीश्यामरामकविमहोदय: । सम्पादक: श्रीप्रभातशास्त्री । मूल्यम् । ५.००

चिमनीचरितम् (प्रेमकाव्यम्) इदमैतिहासिकं काव्यं कविश्रीनीलकण्ठ-रचितम् । सम्पादक: श्रीप्रभातशास्त्री । मूल्यम् ८·००

प्रतापविजयम् (नाटकम्) स्व० श्रीमूलशङ्करयाज्ञिकप्रणीतस्य संस्कृतहिन्दी व्याख्यासनाथस्यास्य नाटकस्येदं प्रथमप्रकाशनम् । सं०श्रीप्रभातशास्त्री मू० १०.००

लिङ्गानुशासनम् (व्याकरणम्) श्रीहर्षवर्द्धनप्रणीतम् । पृथ्वीश्वरकृत-संस्कृतव्याख्यासहितम् । सम्पादक: श्रीप्रभातशास्त्री । मूल्यम् ५·००

भगवदज्जुकम् (प्रहसनम्) श्रीबोधायनविरचितम् । सं० श्रीप्रभातशास्त्री । मूल्यम् ४.००

गीतगौरीपति: (रागकाव्यम्) गीतगोविन्दपरम्परायां कविश्रीभानुदत्त-विरचितमिदं गौरीगिरीशयोर्भक्तिभरितं भूमिकाटीकासंवलितञ्च । सम्पादक: श्रीप्रभातशास्त्री । मूल्यम् १५.००

सनत्सुजातीयदर्शनम् हिन्दीव्याख्यायुतम् । मूल्यम् ५.००

देवभाषाप्रकाशनम् दारागंज इलाहाबाद–६

Dr. Urmila Sharma Collection, Varanasi